अथेदृग्बृहत्कार्यसिद्धयेकनिमित्तभूतं सामग्र्यन्तरसंपत्त्येकाधारमिव च सन्तमर्थसंग्रहमधिकृत्याऽऽदौ तावद् भूतपूर्वो **बडौदानरेशो** महामान्यो **महाराजो** गायकवारः सरपूर्व-तृतीय-**सयाजिराव्**समाख्यश्च पूर्व**मिन्दौरा**ऽधिपतिर्महामान्यो महाराजो होल्करः श्री**तुकोजिराव्**समाख्यश्च महत्या कृतज्ञतया संस्मर्त्तव्यौ भवतः, यौ लाभपुरीयसांस्थिकप्रारम्भात् पुरा **स्वामिविश्वेश्वरानन्दस्य** प्रोत्साहकभूतावेतत्कार्यसंपादनार्थं प्रत्येकमुपविंशसहस्ररूप्यकमितं परमोदारं साहाय्यविशेषमकुरुताम् । एवमेव भूतपूर्वः **पटियालानरेशो** महामान्यो महाराजाधिराजमहेन्द्रः सरपूर्व**भूपेन्द्रसिंह**समाख्यश्च **क्योंथलनरेशो** महामान्यो राजा **विजयसेनश्च** कार्तज्ञेनोत्कीर्त्यौ भवतः, यौ सिमला-पत्तन एतत्कार्यीयप्रवृत्त्युदयस्थानभूतायाः **शान्तकुट्या** निर्मापणार्थं तस्मा एव स्वामिवराय महार्घं भूमिखण्डं सहैव प्रादत्ताम् । इदं च भूयो विशेषेणोत्साहं जनयति यद्वर्तमानौ **बडौदानरेशश्च पटियालानरेशश्च** स्वपूज्यपितृपादपद्धतिं योग्यतया सुतरामनुसरन्तौ पुष्कलार्थप्रदानतः संस्थानेनाऽनेन सद्युक्तावेव भवतः । अथ सांप्रतिकेषु वर्षेषु तावद् अस्य कार्यस्य पूर्त्यर्थं भारतीय-पञ्चापीय-संयुक्तप्रान्तीय-हैद्राबादीय-महीशूरीय-ट्रावन्कोरीय-जम्बुकाश्मीरीय-योधपुरीय-कोल्हापुरीय-सांगलीय-नाभीय-क्योंथलीय-शाहपुरीय-राजकोषेभ्यश्च अवागढसंस्थानाच्च पञ्चापीय-कालिकातीय-विश्वविद्यालयाभ्यां च विश्वेश्वरानन्दनिधानतश्च मूलचन्द्रखैरातीरामनिधानतश्चास्थिरं सदपि महार्घं च महोपकारकं चार्थिकं साहाय्यकं संप्राप्तं भवति । मुंबई-विहार-मद्रास-प्रान्तीयराज्यैश्च संस्थानीयानां कियतांचिद् ग्रन्थानां क्रयणं व्यवस्थापितं भवति । सार्वदेशिक-पाञ्चापिकाभ्यामार्यप्रतिनिधिसभाभ्यां च प्रस्तावविशेषतोऽत्रत्यं कार्यं प्रमाणितं भवति । अपि च बहुभिर्बहुदायिभिः श्राद्धैः सज्जनैः संस्थानीयायाः सभायाः **संरक्षकत्वं** वा **सदस्यत्वं** वा स्वीकृतं भवति । एषां खलूक्तपूर्वाणां नानाविधानां सहायकप्रवेकाणां मध्य एकैकमपि प्रति तथाविधं मम हृदयमाभारनिर्भरं भवति, यत् तदीयं किमपि वाचनिकं प्रकाशनं कथमपि कर्त्तुं नितान्तमशक्नुवानः सन्नेतदेवाऽहं भावयेयं यथा कथंचिदप्यहमेतत्-कार्यीयपरिशीलनेन तुच्छतुच्छेनापि सता वैदिक्याः शेमुष्याश्च विशेषतो भाषाशास्त्रीयायाः प्रवृत्तेश्च सामान्यतः कमपि प्रकर्षलवं प्रयोजयेयमिति ।

७. उपसंहारः

यथा चेदं विभावयामि ग्रन्थमिमं संप्रति सांप्रतिकानां वैदिकविद्याविशारदानां करगतीकुर्यामिति, तथा चैव मदन्तर्महद् भयमिवोत्थितं भवति । जानाम्येव ह्यतिदुर्मर्षा एतदीया दोषा इति । एवं स्थिते वितर्कयेऽहं यदस्मिन्नतिगहने च विशाले चाऽजस्रं प्रगामुके च कार्ये सामान्यतोऽप्यनिवार्याऽनेकजनीयहस्तानुसंक्रमवशाच्च विशेषतोऽपि निर्देशवैतथी च व्यवस्थापनवैषमी च दुष्परिहरे इव स्यातामिति । अपि चेदमनुभवाम्यहं यथा प्राबन्धिके चाऽऽर्थिके च भारेऽन्यत्र संक्रान्ते सत्यहं चेद् ग्रन्थसंपादनमात्रनियोगोऽभविष्यं तर्ह्यत्राऽवरतो दोषाणां मात्रा नूनमूनतामैष्यदिति । उभाभ्यामपि त्वेताभ्यां वितर्कानुभवाभ्यां मिथ्यात्मतोषैककराभ्यां सद्भयां प्रेक्षकाणां समाधानलेशस्याऽप्यसंभावनादेतदेव तावत् तान् प्रार्थये यद् येऽपि दोषास्तेषां दृष्टिपथमवतरेयुस्तेऽपि तैर्यथावत् समाधाय विज्ञाप्येरन्निति । एतच्चात्राऽऽश्वासनमपि भूयः कैमुतिकीक्रियेत यथाऽस्मिन् विषये क्रियमाणोऽल्पाल्पोऽपि सहयोगो मयका प्रह्वोत्तमाङ्गतयोरीकरिष्यते चाऽऽगामुके कार्यशेषे सुतरामिवोपयोक्ष्यते चेतीति विदुषां वशंवदः कश्चिद्—

लाभपुरे वि. वै. शो. संस्थाने }
श्रावणे, वि. १९९९ तमेऽब्दे }

विश्वबन्धुशास्त्री

भूमिका

१. सजातीयसाहित्य-भित्तिका

(क) वैदिका निघण्टवः

येन क्रमेण गतेषु तेषु प्राचीनेषु दिनेषु वैदिकी सरस्वती भगवती विस्तरभरमुत्तरोत्तरं संबभार, तमेव नितरामुपचितप्रामाण्यनिर्भरेण वचःप्रवेकेण स्वकेन **यास्कः** किलोल्लिलेख। तथाहि **‘साक्षात्कृतधर्माण ऋषयो बभूवुस्तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् संप्रादुः । उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च (१,२०)’** इति। एवं तेषु लक्षिताऽलक्ष्याऽऽर्षदृग्व्यापारेषु प्राप्तश्रुतिशेमुषीजुट्परिचितसंचितप्रचारेषु षाट्संख्यसमन्वयेन सिद्धलोकप्रसिद्धिषु वेदाङ्गेषु तावच् **शिक्षायाश्च** स्थान-प्रयत्न-स्वर-मात्राऽऽद्यानुगुण्यतस् तत्तद्वर्णसदुच्चारणस्य, **कल्पस्य** च श्रौत-गृह्य-धर्म-भेदतस्तत्तद्विधिसंगतविविधसत्कर्मणः, **छन्दसश्च** प्रतिप्रस्तारविशेषं यति-पादाऽर्धविभागतस्तत्तद्गायत्र्यादिमितिमानस्य, **ज्योतिषस्य** च दिव्यज्योतिःसंचारतस्तत्तन्नक्षत्रयोगसमयप्रतीतेः, **व्याकरणस्य** च प्रकृति-प्रत्ययाऽऽगमाऽऽदेश-लोप-परिभाषातस्तत्तद्वाक्यस्थशब्दप्रातिस्विकवृत्तिस्थस्वरूपपरिचापुकसूत्रस्य, **निरुक्तस्य** च वर्ण-लोपाऽऽगम-विपर्यय-विकार-सहकृताऽर्थवैशिष्ट्याऽऽत्मकपाञ्चविध्यप्रमाणतः परोक्षाऽतिपरोक्षवृत्तिद्वयप्रत्यक्षतासंप्रयोगतश्च तत्तच्छब्दीयप्रकृतिसिद्धसदर्थभानस्य प्रवर्तनेन यथायथं चारितार्थ्ययोगः संपेदे। यथा यथा च कालेन वाचिकमूलविप्रकर्षप्रकर्षतो वैदिकानां शब्दानां परोक्षाऽतिपरोक्षता वृद्धिमुपजगाम, तथा तथा खलु **निरुक्त-वेदाङ्गोपयोगाऽपेक्षाऽप्यधिकाधिकमनुबभूवे**। तत्र सौकर्यार्थमेव च तैस्तैराचार्यैस्तत्तच्छाखीया बहवो **निघण्टु**समाम्नायाः समामम्निरे (या ७, १३)। तेषामेवाऽयमन्यतमो भवति, य एको यास्ककृतसंस्कारतः (तु. या. गपू.) मुद्रितकायः संस्तदीयेन तदाप्रभृतिस्वायत्तीकृत**निरुक्त**संज्ञाधिकारेण भाष्येण संगुप्तिमिवोपगतोऽधुनापि शाखात्रयेण (शौप १, ३०५) हस्तगतो भवति। एतन्निदर्शनत इदं विदितं भवति, यथा **निघण्टुग्रन्था नैघण्टुक-नैगम-दैवत-**प्रभेदतः काण्डत्रय्या क्रियन्ते स्म। तत्राऽपि **नैघण्टुके** काण्डे यथार्थविभागत एकार्थाऽनेकाऽभिधानानाम्, **दैवते** काण्डे च यथालोकत्रयविभागतः प्राधान्यस्तोतव्यदेवतानाम्नां सरलः संग्रह इति च, **नैगमे** काण्डे त्वनेकाऽर्थैकाऽभिधानानां चाऽनवगतार्थानां च व्यतिकरितः संग्रह इति चाऽपरः सुवेचो विशेष आधीयते स्म। यतश् चैते समाम्नाया अप्रत्यक्षसंस्कारदुरूहाणां च संग्राह्यकिंचिद्वैशिष्ट्याऽन्तरवतां च सतां कतिपयानामेव शब्दानां संस्मारुकमात्रत्वेन प्रवृत्तिमुपागमन्, तत एव प्रकृत**कोषी**यप्रकारकः पारायणिकः पदसंग्रह एषामविषय इति कैमुतिकायते। तदेतदत्र निदर्शनं स्याद् यत् सांप्रतिकोपलब्धिविषये **निघण्टुग्रन्थे** प्रकृत**कोषी**येषु प्रथमेषु ५०० शब्देषु केवलं २४ शब्दाः समाम्नायिषतेति।

(ख) प्राक्-प्रतिष्ठाः कोषाः

अथोत्तरस्मिन्ननेहसि बहवः परिसाधितपुरातननैघण्टवविधानकनैपुणीका निघण्टुकारमतल्लिका **अमरसिंह**प्रमुखा यांस्तांस्तान् पद्यात्मकान् कोषोत्तमानकुर्वन्, तेषां किलैष प्रविभागो भवति यथैक एकार्थाऽनेकाऽभिधानस्वरूपा एके चाऽनेकार्थैकाऽभिधानस्वरूपा इति। किन्तूभयविधानामप्येषां प्राधान्येनाऽर्वाक्काव्यीयसंस्कृतैकदृष्टीनां सतां

निगमाऽवबोधे न कश्चिदुपयोग इव संभवेत् । तथाहि । संकेत्यमानैतत्कोषग्रन्थराशिप्राथम्यभाज्यमरकोषे प्रकृत**कोषीयेषु** प्रथमेषु ५०० शब्देषु केवलं २५ शब्दाः समावेशमलप्सत । न त्वेष्वत्यल्पसंख्याकेष्वपि सत्सु शब्देष्वेकोऽपि वेदमात्रविषय इति खलु सुस्मरं स्यात् । यदप्येषां कोषाणां सुदुश्छदं नैगमं नैयून्यं संपूरयितुकाम इव **भास्कररायो** मध्येवैक्रमोनविंशाऽब्दशतकं **वैदिककोषाऽऽख्यं** निबन्धमकरोत्, तदप्यकिञ्चित्करमिव स्यात् । ग्रन्थो ह्यसौ स्वरूपत उक्तपूर्ववैदिकनिघण्टुपर्यीकरणमात्रत्वादनतिरिच्यमानः सन्नैव कामपि वस्तुनिकाये नवर्द्धिमादधीत ।

(ग) अर्वाञ्चः कोषाः

यावत् प्राचीनां पद्धतिमनु शिक्षणविधौ श्रवणस्य च कण्ठाग्रकरणस्य चाऽप्रतिहतं प्रभुत्वमभवत्, तावत् संस्कृतविद्याप्रचारौपयिकत्वेनोक्तपूर्वाश्छन्दोबद्धाः कोषा अपि महान्तमुपकारं खल्वकुर्वन् । परं यतःप्रभृति मुद्रणयन्त्रोपयोगः समारम्भि, तत एवाऽऽरभ्य नूत्नं विधानक्रमन्वकारादिक्रमेणोपनिबद्धानां कोषाणां साऽवसरत्वस्य प्रतीतिरप्युत्तरोत्तरं वृद्धिमगात् । सर्वप्रथमश्चाऽत्र विषये प्रयत्नः **कलिकाता-पत्तनीयानां** पण्डितानां स्मर्यते । तदाधारेण विलसनेन विदुषा विरचितः कोषः (१८७४) प्रकाशं प्रपेदे । तदुपरिविततानां कृतिततीनां च मध्ये **रोथ-बोह्टलिङ्काभ्यां** विरचितः **सैंटपीटर्ज़्बर्ग**-पत्तनीयः कोषः (१९०९-३२) मुकुटमणीयते । यत् प्रकृत**कोषीयेषु** प्रथमेषु ५०० शब्देष्विह ४५० अपाठिषत, तदस्य वेदाध्ययनौपयिकंभावस्य निदर्शनं स्यात् । **ग्रासमन्नस्य** बाह्वृचः कोषोऽपि तस्य विधानकपाटवस्य च कृतिपारग्यस्य च प्रमापको भवति । **मोनियरविलिअम्जस्य** कोषश्च प्राधान्येन कोषान्तरीयविषयस्य संग्राहुकत्वेन च क्वचित् क्वचित् स्वोपज्ञवस्तुनः समर्पुकत्वेन च विशेषतः सुग्रहैकपुस्तकस्वरूपत्वेन चोपकारको भवति । **तारानाथीयो वाचस्पत्याऽऽख्य**-कोषः (१९३०–४१) आकारत एतद्वर्गीयभारतीयकृतीनां मध्ये प्राधान्यं भजते । वेदाध्ययनौपयिकत्वेन त्वस्य न कश्चिदप्युपयोगसंकेतः सुकरः । तथाहि । प्रकृत**कोषीयैः** प्रथमैः ५०० शब्दैः साऽवधिकेष्वेतदीयेषु प्रथमेषु ८०० शब्देषु केवलं ४० शब्दा एव वेदगोचरत्वेनोदाह्रियन्ते ।

(घ) वैदिक्योऽनुक्रमण्यः

पुरातने कालेऽध्ययनार्थप्रयोजिताश्च कर्माऽर्थप्रयोजिताश्च सत्यस् तत्तच्छाखीयपाठानुक्रमेण मन्त्रप्रतीकानां चर्षिनाम्नां च देवतानां च छन्दसां च कण्ठाग्रकरणे साचिव्यं दधाना गद्यपद्याऽन्यतराऽऽत्मिका **अनुक्रमण्यो** ग्रन्थनं संप्रापुः । आदौ तावत् प्रतिशाखं मन्त्रप्रतीकादीनि चत्वारि वस्तुजातानि पृथक्त्वेन, कालेन च क्वचित् क्वचित् सर्वाण्येतानि वस्तूनि समुह्य सार्वसाधारण्येनाऽनुचक्रमिर इत्येवमेतदीयो विकासक्रमः संभाव्येत । न त्वेतासाम**नुक्रमणीनां** व्यूढानां वा समूढानां वापि सतीनां पदपाठीयतया विविक्ते सति नैगमपदाऽनुक्रमणे किमपि तात्पर्यमिति कृत्वा तदपेक्षयाऽपि प्रकृत**कोषस्य** विषयविवेकः स्पष्टो भवति ।

(ङ) एकग्रन्थीयाः पदानुक्रमाः

साकल्येन वैकांऽशेन वा वर्णमात्राऽनुक्रमेण समूढानि सन्ति तत्तद्ग्रन्थीयानि पदजातानि खलूक्तपूर्वाणामर्वाक्कोषाणां संपादन औपयिकतामभक्षतेति सहजं प्रतीयेत । एवं तावत् प्रवृत्तिकालतस् तत्तद्ग्रन्थीयपदानुक्रमसूचीनामुक्तपूर्वकोषानपेक्ष्य किञ्चिदिव पूर्वत्वमभूत् । तासां सूचीनां मध्ये कासांचिदेव पृथक् प्रकाशः समजनि । एतासां मध्ये याः प्रकृत**कोष**प्रस्तुत**विभागीया**ऽभिसंबन्धास्तासामिह संकेतः क्रियते । तद् यथा—

१. **मोक्षमूलरीया बाह्वृची पद-सूची** (१९२९-३१, १९४९-५१), यस्यां योगतोऽसमूढमेव सत् पदपाठमात्रं वर्णमात्रानुक्रमेण धृतं भवति । मन्त्राऽऽवृत्तीयानां च पदानामत्र समावेशो न भवति ।

२. इयमेव **सूची** स्वामिभ्यां **विश्वेश्वरानन्द-नित्यानन्दा**भ्यामप्यभिनवं प्रकाशमनीयत (१९६५) ।

३. **ग्रासमन्नीये बाह्वृचे कोषे** (१९३०) यथाऽऽवृत्तिपुनरुक्तभागीयपदवर्जं पदान्तरसर्वस्वस्य यथायोगं च यथास्थलं च समावेशो भवति, तथाऽनेन **पदसूच्यर्थो**ऽपि सुसाधो भवति । इहाऽऽख्याताऽनाख्यातयोर्विभागो यथा स्फुटो भवति, न तथाऽनाख्याताऽवान्तरभेदानां सतां कृत्तद्धितसमासानां पारस्परिको विवेकः । एतदीयमन्त्याक्षरीयं परिशिष्टं प्रत्ययीययोगान्वीक्षणस्य बहूपकरोति ।

४. **स्वामिनोर्विश्वेश्वरानन्द-नित्यानन्दयोर्यजुर्वेदपदानामकारादिवर्णानुक्रमीयाऽनुक्रमणिकायां** (१९६५) माध्यन्दिन-यजुर्वेदीयानि पदानि योगतोऽसमूढान्येव सन्ति पदपाठमनु वर्णमात्रयाऽनुक्रान्तानि भवन्ति ।

५. महा. **परशुरामीया**ऽजादिपदखण्डमात्री **तैत्तिरीय-संहितायाः पदानुक्रमणी** (१९८७) वर्णमातृकं व्यवस्थापनं विहायाऽणुमात्रेणाप्यनुकृतेतिकृतिद्विरुक्तिपर्यन्तात् सतः पदपाठाद् न भिद्यते । स्थलसंकेतोऽप्येतदीयोऽन्यतः शब्दसंख्याविमिश्रणादन्यतश्च रोमकसंख्यासंमिश्रणात् प्रेक्षकाणामप्रीतिकरः ।

६. **सायमनीये काठक(चरक)यजुर्वेदीये पदानुक्रमे** (१९६९) योगसमूहनमर्धजरतीयते । तथाहि । यथाधात्वाख्यातसमूहने च यथाप्रातिपदिकं नामिकसमूहने चेष्यमाणेऽपि सर्वेषामपि सकृच्छ्रुतीनां पदानां विषये धातुप्रातिपदिकाऽन्यतरप्रदर्शने च यथायोगं प्रातिपदिकाऽनुक्रमणे चाऽनादर एव प्रादर्शि ।

७. स्वामिनोर्विश्वेश्वरानन्द-नित्यानन्दयोः **सामवेदपदानामकारादिवर्णानुक्रमीयाऽनुक्रमणिकायां** (१९६५) कौथुम-सामवेदीयानि पदानि स्वरतः प्रतिपदसमुचितपरिवर्तनेनाऽसनाथितानि यथासंहितापाठमेव धृतानि सन्ति बुधां क्लेशैककराणि भवन्ति । तथाहि । **'अग्निः'** इति वस्तुतोऽभिन्नस्वरोऽपि सन्नन्यायमेव सप्तधोल्लिखितो भवति । एवम् **'अभि'** इत्यस्य दशधा-कृत्या न कोऽप्यर्थः । अन्यच्च । उपसृष्टस्याऽऽख्यातस्य विषयेऽनियमो भवति । तद्धि क्वचिदेकपदतया क्वचिच्च द्विपदतयाऽकारणमेव भेद्यते । अतः शोधकार्यस्याऽनुपकुर्वाणेयम**नुक्रमणिका**ऽकिंचित्करी स्यात् ।

८. **ह्विट्नि** इत्यस्य **शौनकाऽथर्वपदानुक्रमः** (१९३८) ग्रन्थनविधानके **ग्रासमन्नीयां** बाह्वृचीं कृतिमनुविदधानस्तत्रत्येनैव संकेतेन गतार्थः सन् नितरामुपकुर्याच्छोधपराणाम् । एतदीया बाह्वृच-संमेलनविमेलन-प्रक्रिया तु बाह्वृचस्थलसंकेताऽभावेऽपर्याप्ता स्यात् ।

९. **शङ्करपाण्डुरङ्गपण्डितीयः शौनकाऽथर्वपदानुक्रमः** (१९५५) योगतोऽसमूढः सन् पदपाठस्य यथावर्णमात्रं प्रणयनमात्रं भवति । यत्त्वनुपलभ्यमानपदपाठेषु स्थलेषु यथासंहितापाठं स्वरसंकेतोऽकारि तन्नितान्तमन्याय्यं च व्यामोहकं च स्यात् (तय.तु.**अश्वस्य, मंहिष्ठः** इत्येतत्स्थानीयस्तत्संकेतभारः) ।

१०. स्वामिनोर्विश्वेश्वरानन्द-नित्यानन्दयोर् **अथर्ववेदपदानामकारादिवर्णानुक्रमीयाऽनुक्रमणी** (१९६५) नान्तरीयपूर्वस्यैव मुद्रणाऽभ्यासमात्रम्[1] ।

---

[1] उक्तपूर्वैस्तैस्तैर्वैधानिकैर्दोषैश्चाऽपर्याप्तभावैश्च साकमेतेषु पदानुक्रमेष्वन्येऽपि सर्वे एतद्वर्गीयग्रन्थनस्वरूपसहजा दोषाः सामान्येनैव सुलभा भवन्ति । त एवेह प्रविभज्य निदर्शनमात्रार्थं संकेत्यन्ते । आवसानिक्यः कोष्ठबद्धाः संख्या उक्तपूर्वाणां दशानां **पदानुक्रमणीनां** वर्णनक्रमाऽनुप्राप्ताः संख्या एव संवादुका भवन्ति–

१. **स्थलाऽसंकेतः**, तय. **अश्वाः** ऋ ५, ६१, २ (३); **अश्वासः** ऋ ५, ६२, ४ (१, २); **अ-सपत्नम्** शौ १९, २७, १४, **अ-सतः** शौ ५, ६, १ (८); **असि** ऋ १, ९४, ७; ५, ९, ४; ८, ९२, २८; ९३, ३३; ९५, ३; ९७, ५; ९८, ५; ६ (३); **असितम्** शौ १०, ४, ५; १३, **असु-तृपः** शौ १०, ५, ४९; **अस्ताम्** शौ १२, ४, ५२ (८); **अस्तु** ऋ १, १६२, ११; ८, १७, १० (३); **अस्मत्** शौ ७,

(च) बहुग्रन्थीया अनुक्रमकोषाः

अथ यथा यथा नवजागरितसंस्कृताऽभिरुचौ पश्चापथे यथोपलभ्यग्रन्थराशिपारायणिकस्य वेदाऽध्ययनस्य वेदार्थोपदर्शनप्रयोजकत्वेन च प्रभारतीविकासैतिह्यक्रमप्रतिसंदर्भकत्वेन चोपयोगस्य प्रतिभानमभूत्, तथा तथा

२४, १; १८, ४, ६९; अस्मि शौ ६, ५८, ३, अस्मे शौ १८, ४, ४६, अहानि शौ १८, १, २७; २८ (८); आ ऋ ८, ८१, ६; ९, ८१, ४ (१, २); आह शौ १८, २, ३७, स्याम शौ ९, १५, २०; १८, ३, १७; ४, ६९ (८)।

२. अप-मुद्रणम्, तय., अंशम् < अंशम्, अंशाय < अंशाय, अकृष्टपच्या° < °च्या° (५); अववपति < अप° (६); अभि–शार्चः < °सार्चः (१०); उपलान् < °लान्, चकृम < चकृम मा १९, ५५, चर्य्यम् < चर्प्यम् (४); जजायथाः < अजायथाः (५); तवसा < तवसा (४); ततृपाणा <°पाणा (१, २); शवसानम्<°नम् (२); प्रविदम्<°द्म (४); सुप्रशस्तिर्म्<सु–प्रशस्तम् (९, १०), पचेत < पचते (२)।

३. मिथ्या-पदत्वम्, तय., अनुवासि < अनुवा । असि, अनुव्रताः < °ता, अनुवृद्धिम् < मनुः । ऋद्धिम् (६); अभिसंचरण्यम् < अभि । संचरेण्यम् (३); अर्वाकः < अर्वा । अकः (६); अवसः < अवसे (४); अवान्तरा < अव । अन्तरा (६); अश्मन्वतीः < अश्मन्वती (४); अश्विना < अश्विनौ ऋ १, ११६, ५; १८२, ७; ७, ७२, ४; ७३, २, अश्विना (सं.) < अश्विना ऋ ४, ४५, ५ (३); अहीतमुख्यस्या < अहीतमुखी । अस्याः (६); आदित्याः < आदित्या ऋ २, ४१, ६ (१, २); आसन् । इषून् < आसन्नि(न्[न्]-इ)षून् काठ ४५, २१, का < एका काठ २२, ८^{३}, गायत्र्युविभक्ता < गायत्री । अविभक्ता (६); ततऽअपसे < ततऽअपसे (२); तरत् < प्रतरत मा ३५, १० (४); परिवृताः < परिवृता ऋ ३, १७, १ (१, २); बहिष्कनीनिके < बहिः । कनीनिके, मत्सपत्नाः < मत् । सपत्नाः (६); मा (< अस्मद्-) < मा शौ ८, १, ८ (८); वाजिनः < वाजि । नः ऋ ६, १३, ६, सूनृता < सूनृताः ऋ ८, १३, ८ (१, २)।

४. मिथ्याऽवग्रहः, तय. २नि-शित- < १निशित- अ-निशित- इत्यत्र (१, २); ?अनु-दु- < *आ-नुद- अनानुद-, इत्यत्र अनु-भूति- < *आऽनु-भूति- अनानुभूति- इत्यत्र (१,२,३)।

५. मिथ्या-प्रातिपदिकत्वम्, तय., अहि-हन्->अहिघ्ने<१अहि-घ्न-(६); अ-निमिष्->अनिमिषम् < °मिष-, अनेन- > अनेनः < अनेनस्- (३); ऋतु- > ऋत्वा < √ऋ, √१अस् > आसन् < आसन्- (६)।

६. मिथ्या-स्थलत्वम्, तय., अप मा ५, ८६ < ५, ८^{६} (४); एति ऋ ४, ७, ४; ५ < ४, ६, ४; ५ (२); खर्ववासिनीम् शौ ११, ११, ७, १६ < ११, ११, १६ (१०); प्र शौ २०, ७६, ७^{२} < २०, ७७, ७^{२} (९, १०); प्रलेन शौ १०, ११५, २ < २०, ११५, २, मदन् शौ २, २८, ४ < २०, २८, ४ (१०); युक्तः ऋ १, १५९, ३ < १, १५८, ३ यूथे ऋ ९, ११०, ७ < ९, ११०, ९, रक्ष ऋ ७, १५, ३ < ७, १५, १३ (२); रोचनानाम् ऋ ७, ५, १० < ३, ५, १०, वितूर्य ऋ १०, ३, ३ < १०, ६८, ३, विश्वध ऋ ४, १९, ६ < ४, १६, १८ (१, २); विव्ये ऋ ९, २२, २ < ४, २२, २ (२); श्रयन्ताम् ६०२, ८ < ८४४(=ऋ १०, १८), १२ (३).

अधिपञ्चाशेभ्योऽब्देभ्य एदमन्वभावि, यथैतदर्थं बहूनपि वैदिकान् ग्रन्थान् संमेल्य तदीयं साधारण्यं समर्पुकाश्च वस्तुवैविध्यं संग्राहुकाश्च तुलनाऽऽत्मकपरामर्शौपयिकंभावुका **अनुक्रमकोषाः** संकलनीया इति । अथ ये चैवमभिप्रायुका ग्रन्था अद्याऽवधि व्यरचिषत, ते संकेततः परिचाय्येरन् । तद् यथा—

१. **जैकबीयेऽनुक्रमकोषे** (१९४८) भगवद्गीतासहकृतानाम् उपनिषदां **वाक्यानां** प्रातिपदिकीभावित-यथावर्णमात्राऽनुक्रान्त-तदीयमुख्य**पदा**ऽनुपातित्वेनाऽयौगिकश्चापूर्णस्थलीयश्च सन्नप्युपादेय एव संग्रहो भवति ।

२. **ब्लूमफील्डीयेऽनुक्रमकोषे** (१९६३) ऋग्वेदादीनां ११९ ग्रन्थानां यथावर्णमात्राऽनुक्रान्तानां **मन्त्रपादप्रतीकानां** संग्रहो भवति । एषां ग्रन्थानां मध्ये ५६ एव मौलिका ग्रन्थाः साकल्येन संगृहीता भवन्ति । अन्येषां तु यथाऽपेक्ष्यमंशत एव संकलनं व्यधायि । यत्त्विहाऽन्यथा सर्वथा बहूपकारके सति संग्रह उपलभ्यमानस्वराङ्कना अपि पाठाः स्वरराहित्येनैव प्रादर्शिषत, तदस्य गुरुदोषतामावहेत ।

३. **कीथसहकृतमैकडानलीये वैदिकाऽनुक्रमकोषे** (१९६९) वैदिककालिकसांस्कृतिकविकासं वा प्राचीनेतिहासविज्ञानप्रभृतिविषयान्तरसामान्यं वाऽधिकृत्य संकेतनिर्भरांश्च सतो यथावर्णमात्रमनुक्रान्तांस्तांस्ताञ्छब्दाञ् शीर्षकीकृत्य विरचितानां स्वपरोभयोपज्ञमतवैविध्यसारं समर्पुकाणां च **निबन्धानां** संग्रहो भवति ।

४. **हंसराजीये वैदिककोषे** (१९८३) १५ ब्राह्मणग्रन्थानधिकृत्य प्राचीननिर्वचनप्रमुखकतिपयविषयप्रदर्शनपरकाणि यथावर्णमात्रमनुक्रान्तानि संकेतितविशिष्टस्थलीयपरामृश्यवाक्यावलिसनाथितानि सन्ति कतिपयान्येव **पदानि** संगृहीतानि भवन्ति ।

२. सामान्येन लक्ष्यं क्षेत्रं व्यवस्था च

(क) लक्ष्यम्

१. तत्तत्प्रकारान्तरतश्चरितार्थानामपि सतां नान्तरीयपूर्वाध्यायवृत्तोपवर्णनानामनुक्रमग्रन्थानां मध्ये न केनचिदपि यावदुपलब्धनिःशेषवैदिकवाङ्मयीयपदसर्वस्वाऽनुक्रमकोषीया चिरादनुभूयमानाऽपि सती शोधाऽभियुक्ताऽपेक्षा सुपूरा भवति । तस्याः सदपेक्षायाः पूर्तिरेव तावत् प्रकृतस्य ग्रन्थस्य मुख्यं लक्ष्यं भवति ।

२. अन्यच्च । एकान्तरीयोत्तराध्यायसमर्पितया प्रक्रिययेह प्रतिशब्दं विशेषेण योगचिन्ताप्रयोजकं सद् विविधं वस्तुजातं तथा संगृह्यते, यथैतदाधारेण पुरा प्रक्रियमाणे **वैदिकशब्दार्थकोषे** साक्षाच्छ्रुत्यर्थपर्यालोचनमप्रतिहतवेगं प्रवर्त्ततेति ।

(ख) क्षेत्रम्

१. अत्र तावद् अद्य यावत् **४०७** आधार-ग्रन्था वृत्तसंग्रहाः समपत्सत । आऽन्त्यखण्डीयप्रकाशं चैषा संख्या **४२५** भावुकेति संभावनीयम् ।

२. अस्यां तावत् संख्यायां मुख्यात् सतो वैदिकात् साहित्याद् बाह्यानां सतां स्वरूपतो विषयतश्च तस्य संनिकर्षविशेषमादधानानां च तत्तदङ्गोपाङ्गसामस्त्याऽभिसंबद्धानां चाऽपरेषामपि बहूनां ग्रन्थानां समावेशो भवति ।

३. अथाऽऽधारग्रन्थाः स्वरूपविभागतः संकेत्यन्ते । तद् यथा—

(क) **संहिताः**, (ख) **खिलसूक्तानि**, (ग) **ब्राह्मणानि**, (घ) **आरण्यकानि**, (ङ) **उपनिषदः**, (च) **श्रौतसूत्राणि**, (छ) **गृह्यसूत्राणि**, (ज) **मन्त्रपाठाः**, (झ) **धर्मसूत्राणि**, (ञ) **पितृमेधसूत्राणि**, (ट) **शुल्बसूत्राणि**, (ठ) **परिशिष्टानि** (ड) **अनुक्रमण्यः**, (ढ) **शिक्षाः**, (ण) **प्रातिशाख्यानि**, (त) **पाणिनीये सूत्रपाठः, उणादिपाठः, धातुपाठः, गणपाठः, फिट्सूत्राणि, वार्तिकानि, इष्टयः,**

गतपूर्वतत्तद्विभागीयलक्ष्यसर्वस्वं च, (थ) निघण्टवः, (द) निरुक्तम्, (ध) छन्दः, (न) ज्यौतिषम्, (प) पूर्व-मीमांसा, (फ) उत्तर-मीमांसा, (ब) सांख्यम् , (भ) योगः, (म) भगवद्गीता च ।

(ग) व्यवस्था

१. प्रकृते ग्रन्थ उपयुज्यमाना एते विभागा यथा समूह्यन्ते तथाऽधुना संकेतो भवति । तद् यथा—

१. संहिताः खिल-सूक्तानि च, २. ब्राह्मणान्यारण्यकानि च, ३. उपनिषद उत्तर-मीमांसा सांख्यं योगो भगवद्गीता च, ४. अवशिष्टाः षोडश विभागाश्च ।

२. यथैतेषां विभागानां सामान्येन संहिता-ब्राह्मणोपनिषत्-सूत्राऽऽत्मतया चतुर्व्यूढानां सतामन्योन्यविवेक-प्रयोजिततत्तद्व्यूहीयवैशेष्यनिर्भरः स्वाध्यायाऽभ्यास उत्तरोत्तरं संप्रवर्तेत, तथा प्रतिव्यूहं पार्थक्येन प्रवर्तमानाः प्रकृतग्रन्थीयाश्चत्वारो **विभागा** अक्लृप्सत । तद् यथा । **प्रथमो विभागः** सांहितिकः, **द्वितीयो विभागो** ब्राह्मणाऽऽरण्यकीयः, **तृतीयो विभाग** औपनिषदः, **तुरीयो विभागः** सौत्रश्च । अपर आवसानिकः **पञ्चमो विभागो**ऽपि क्लृप्तो भवति, यस्मिन् प्रथमेषु चतुर्ष्वपि **विभागेषु** संगृहीतानां सतां शब्दानामाद्याऽन्त्योभयवर्णाऽनुक्रमेण सकलपाठश्च संस्मरणीयपरामर्शीयैतत्क्षेत्रीयग्रन्थराशिपरिचयीयोपयोगवन्ति कानिचिद् विषयान्तराणि च समावेशायाऽभिप्रेयन्ते । एते पञ्च **विभागाश्च** यथाप्रकृतखण्डं प्रविभज्य प्रकाश्यन्ते ।

३. आधार-ग्रन्थाः

(क) अथ प्रकृते **विभागे** येषां संहिता-ग्रन्थानां समावेशो भवति[१], त इम इह नामोद्देशमात्रतः कीर्त्यन्ते । तद् यथा—

१. ऋग्वेद-संहिता (संक्षे. ऋ.)
२. ऋग्वेद-खिलसूक्तानि (संक्षे. खि.)
३. वाजसनेय (माध्यन्दिन)**-शुक्ल-यजुर्वेद-संहिता** (संक्षे. मा.)
४. वाजसनेय (काण्व)**-शुक्ल-यजुर्वेद-संहिता** (संक्षे. का.)
५. तैत्तिरीय-कृष्ण-यजुर्वेद-संहिता (संक्षे. तै.)
६. मैत्रायणीय-कृष्ण-यजुर्वेद-संहिता (संक्षे. मै.)
७. काठक (चरक)**-कृष्ण-यजुर्वेद-संहिता** (संक्षे. काठ.)
८. कपिष्ठल (कठ)**-कृष्ण-यजुर्वेद-संहिता** (संक्षे. क.)
९. कौथुम-सामवेद-संहिता (संक्षे. कौ.)
१०. जैमिनीय-सामवेद-संहिता (संक्षे. जै.)
११. शौनकीयाऽथर्ववेद-संहिता (संक्षे. शौ.)
१२. पैप्पलादाऽथर्ववेद-संहिता (संक्षे. पै.)[२]

(ख) कस्याः कस्याः संहितायाः प्राक्प्रोक्ताः पदपाठा इदानीमुपलब्धिविषया भवन्ति, **किंलक्षणश्च** तदीयः प्रकृतग्रन्थीयाऽभिसंबन्ध इत्येतद्विस्तर उपरि उपादीयमानः द्रष्टव्यः (तु. भू. ४, क, ७) ।

---

[१] एतद्ग्रन्थीया विचित्रपदाः पुष्पिका अप्यत्र द्वितीयखण्डात् प्रभृति समाविष्टा द्रष्टव्याः ।

[२] एतदीयदेवनागरमुद्रणसापेक्षः सन्नस्या आ षोडशकाण्डान्तादिह समावेशः समभावि । चरम-काण्डचतुष्कं तु विभागाऽन्ते परिशेष्यमाणं द्रष्टव्यम् ।

(ग) आधारग्रन्थीयपरिशोधपरिज्ञानयोर्विषये तत्र तत्रोपयुक्तचरीणां चोपयोक्ष्यमाणानां च प्रागर्वाग्भाष्यटीकाटिप्पणनिबन्धादिप्रकारककृतीनां तन्नामतश्च तत्कर्तृनामतश्च संक्षेपेणूल्लेखो भवतीतीहापि तत्पुनर्वचनेऽभिरुचिर्न भवति ।

४. विधानक-सारसंग्रहः

१. सामान्य-प्रकरणम्

(क) सामग्र्याः संपूर्णत्वम्

एतद्ग्रन्थीये प्रकृते विभाग आधारभूतेषु श्रुतिग्रन्थेषु यावन्मात्रप्रयुक्तस्य सत एकैकस्य शब्दस्यैकैकस्य रूपस्य स्थल-नैःशेष्येण समावेशोऽकारीत्येतदीयं विशिष्टं लक्षणं भवति । एषाऽनतिशयितपूर्वकायविस्तरा सती शब्दसामग्रीहैव तावत् सर्वप्रथमं सर्वाङ्गीणया यौगिक्या प्रक्रियया व्यवस्थाप्य यथावद् निर्दिश्यते । अथ विश्वप्रागर्वाग्विबुधीयतत्तद्वैदिकविषयीयतत्तन्मतसामस्त्योल्लेखाऽऽलोचनोभयनिर्भरैश्च तस्य तस्य पाठस्य स्वरूपं च तस्य तस्य शब्दस्य व्युत्पत्तिं च तत्र तत्र विचारणीयतयोपतिष्ठमानास्तास्ताः सांहितिकीर्वा वैयाकरणीर्वा वाक्यान्वयीया वा सौवरीर्वा छान्दसीर्वाऽर्थमीमांसीया वा सांशयिकीः स्थितीश्चाधिकृत्य प्रवर्तमानैश्च प्रतिपृष्ठीयैष्टिप्पणैः समग्रोऽयं ग्रन्थो मूलार्थविशदीकृतिप्रयोजनिकया वृत्त्येव सनाथ्यते ।

(ख) आधिश्रुतिकौ संवाद-विसंवादौ

१. यदा बाह्वृचे श्रावितपूर्वः सन् पाठः पुनः श्राव्यते, तदा तस्य तत्तच्छब्दविशेषीयपुनःपाठाऽपाठविवेकतो यथायोगं प्रतिनियतस्वरूपः संकेतः क्रियते ।

२. यदा बाह्वृचः श्रुतिविशेषो ग्रन्थान्तरीयतया श्रुतिगोचरतामुपैति, तदा तस्य तत्तच्छब्दविशेषीयतद्गतपाठाऽपाठविवेकतो यथायोगं प्रतिनियतस्वरूपः संकेतः क्रियते ।

३. यदोक्तपूर्वस् तत्तच्छब्दविशेषीयः पाठभेदः स्वर-प्रत्ययान्यतरमात्रीयस्वरूपो भवति, तदा बाह्वृचमूलपाठो नित्यं टिप्पणे प्रदर्शितो भवति, तय. पृ. ३४८^{c} ।

४. यदोक्तपूर्वस्तत्तच्छब्दविशेषीयः पाठभेदस्तत्पर्यायाऽपर्यायान्यतरभूतशब्दान्तराऽऽत्मको भवति, तदापि बाह्वृचमूलः पाठो नित्यं टिप्पणे प्रदर्शितो भवति, तय. पृ. १५^{k} ।

५. यदा तूक्तपूर्वस्तत्तच्छ्रुतिविशेषीयः पाठभेदस्तच्छब्दविशेषीयप्रातिस्विकस्थानाऽऽपन्नशब्दान्तरतया व्यवस्थापयितुं दुःशको भवति, तदा बाह्वृचं मूलं स्थलाङ्कनमात्रेण विज्ञापितं भवति[1], तय. पृ. ३९^{c} ।

६. बाह्वृचभिन्न-ग्रन्थान्तरीया अन्योन्याऽपेक्षया वर्तमानाः पाठभेदा अप्येवं यथायथं टिप्पणेषु प्रदर्शिता भवन्ति, तय. पृपृ. ३४^{e}, ६५^{i}, ८०^{c}, ३७३^{k} ।

७. तत्तद्ग्रन्थीयमूलकोषीया विशिष्टपाठभेदीयाः संकेता अपि यथासंभवं टिप्पणेषु प्रदर्शिता भवन्ति, तय. पृपृ. ४७^{b}, ६१^{k}, ३५४^{a}, ३६७^{a} ।

८. प्रागर्वाग्भाष्योपलभ्या दुरूहपाठविमर्शीया विशिष्टसंकेता अप्येवं टिप्पणेषु प्रदर्शिता भवन्ति, तय. पृपृ. ६८^{f}, ७८^{f}, ४२६^{d} ।

---

[1] उपरितनात् खण्डात् प्रभृति बाह्वृचाऽपेक्षयाऽपि तुलनात्मकाध्ययनस्य सौकर्यसंपादनार्थं ग्रन्थान्तरीयास्तत्पाठभेदा अपि समानमेव टिप्पणेषु प्रदर्शयिष्यमाणा द्रष्टव्याः ।

९. कृष्णयजुर्वेदीयब्राह्मणभागीया शब्दावलिश्च श्रुत्यन्तरविवेकतोऽध्ययनसौकर्यार्थं संकेतपार्थक्येन निर्दिष्टा भवति।

(ग) पाठ-प्रतिष्ठापनम्

१. इहत्यादेकैकस्माद् निर्देशाच्च प्राक् तद्विषये वर्णतः स्वरतो योगतोऽन्वयतश्चाऽसकृच्च निःशेषं च स्थितिसमीक्षणं व्यधायि। येषां ग्रन्थानां प्राचीनाः पदपाठा उपालप्सत, तदीयानां निर्देशानां समये तेषामुपयोगोऽकारि। येषां तु ग्रन्थानां प्राचीनाः पदपाठा नोपालप्सत, तदीयनिर्देशसौकर्य्यार्थं तेषां प्राग्विधयैव नवीनाः पदपाठा अकृषत। एवं यावन्मात्रं प्रागर्वाग्भाष्यीय उपयोगः समभूत्, तावन्मात्रमसौ सम्यगकारि। दीर्घप्रततस्य नितरां परिश्रमसाध्यस्य चाऽस्य पर्यालोचनाऽऽत्मकस्य वैदिकग्रन्थाऽध्ययनकार्यस्य संपादनात्तावदयमनुभवः प्रापि यथा पाठपरिशुद्धिमुद्दिश्य सर्व एवैते ग्रन्थाः पुनःसंस्करणविशेषाऽपेक्षा भवन्तीति।

२. अस्याश्चाऽऽधारग्रन्थीयाया अपेक्षाया विषये खलु स्थले स्थले तां तां विकटां स्थितिमुद्देशतश्च यथासंभवं समाधानतश्चोदाहरन्ति टिप्पणानां शतानि साक्षीणि स्युः। एषां टिप्पणानां तावदेते मुख्याः प्रकारविशेषा भवन्ति—

(अ) यत्राऽदर्शितसमाधानं दुरूहतामात्रं संकेतितं भवति, तय. पृ. ७^{k}।

(आ) यत्र समाधानप्रयत्नसहकृता दुरूहता संकेतिता भवति, तय. पृपृ. १९९^{c}, ३७३^{b}।

(इ) यत्र शुद्धतया प्रसिद्धपूर्वाणां पाठानां विषये सांशयिकत्वं प्रदर्शितं भवति, तय. पृपृ. ६,^{g} ६६^{c}।

(ई) यत्र शुद्धतयोरीकृतपूर्वाणां पाठानां प्रत्याख्यानमिष्टं भवति, तय. पृपृ. ७^{j}, ४०^{f}, ७७^{p}, १४६^{f}।

(उ) यत्र यथाऽभिप्रेतं शोधविशेषः समर्थितो भवति, तय. पृपृ. ७^{m}, १०१^{d}, १७०^{e}, २३०^{b}, ३०९^{r}।

(ऊ) यत्र ग्रन्थविशेषीयमूनमिव सद् यथोपलम्भ-संस्करणं पूर्तिमिव नीतं भवति, तय. पृपृ. ७^{o}, १७^{p}।

(ऋ) यत्र प्राचीनाः कृतयोऽर्घत आलोचिता भवन्ति, तय. पृपृ. १०^{g}, ३६^{c}, १७६^{h}, २०६^{j}।

(ॠ) यत्राऽर्वाक्कन्यः कृतयोऽर्घत आलोचिता भवन्ति, तय. पृपृ. ११^{d}, १८^{h}, २२६^{b}, २३४^{h}।

(घ) पाठानामर्थतोऽनुसंधानम्

यद्यपि श्रौतपदजातीयवैयाकरणव्यवस्थितिसहकृतनिर्देशमात्रोद्देशस्य सतोऽस्य ग्रन्थस्य श्रुतिपरंपरीयमर्थाऽनुसंधानं विषयो न भवति, तथाऽप्युक्तपूर्वपाठप्रतिष्ठापनशोधनप्रसङ्गाऽनुरोधतस्तत्र तत्र तदपि प्रसक्तं भवति, तय. पृपृ. १०^{g}, १४^{h}, १८^{i}, ३८^{b}, ४२^{f}, ५८^{i}, ५९^{g} २५८^{b}, २५९^{b}, २८१^{b}।

(ङ) श्रौतश्छन्दोविमर्शः

तत्तत्पाठपर्यालोचनप्रतिष्ठापनीयप्रयत्नप्रयोजितश्चेह तस्य तस्य मन्त्रस्य यथातत्तत्स्थितिविशेषविचारं छन्दोविमर्शोऽप्यानुषङ्गिकधर्मभाक् सन् समावेशं लभते। यच्चाऽस्मिन् विषये छन्दोऽनुलक्षणीकरणतत्त्वानुप्रापणोभयप्रयोजनकं विधानकं प्रवर्त्तितं चाऽनुसृतं च भवति (तय. पृपृ. ४५८^{j}, ४९४^{k}, ५००^{j}) तस्याऽपराङ्गभावेन च पूर्णभावेन च क्रियमाणोऽभ्यासक्रमो भूयिष्ठानां पाठानां यथायथं प्रतिष्ठापुकः स्यादिति प्रतीयते।

(च) सांहितिकं दीर्घत्वम्

संहितापाठीयं दीर्घत्वं स्वरूपभेदतस्त्रेधाविशिष्टाया निर्देशिकायाः प्रयोजकं भवति। त इमे तावत् त्रयोऽपि विशेषा भवन्ति—

१. यत्र (यथा मै.) उदात्ताद्यच्के पदे परतः पदान्त्याऽऽकारात्मिका श्रुतिर् **अस्**, **ए** इत्येतयोर्मध्येऽन्यतरेण समूला भवति, तदाऽसौ यथास्वमूलविवेकतो व्यवस्थाप्य प्रत्यापन्नतन्मूलस्वरूपतया निर्दिष्टा भवति, टिप्पणगतश्च तद्विस्तरो भवति, तय. पृ. ५६१^{a} ।

२. कानिचित् तिङ्रूपाणि चाऽव्ययानि च ह्रस्वदीर्घोभयविधान्ततया श्रूयन्ते । तानीमानि प्राक्तनेषु पदपाठेषु नित्यं ह्रस्वान्ततयैव प्रदर्शितानि भवन्ति । इह तावत्तदीयस्याऽस्यौभयविध्यस्य सूचनार्थं समूढस्य सतस्तदीयस्य स्थलाङ्कनस्य मूर्धन्यः संस्तदुभयप्रकारसाधारणभूत एव तदीयो निर्देशो भवति (तु. भू. ४, ४, ग), तय. **अध > धा, अभि > भी, अभि√रक्ष् > अभि···रक्षथ > था, √ अव् > अव > वा** ।

अथ यदा कश्चिदुपसर्गः पूर्वपदतां गतोऽनयैव द्विविधतया श्रूयते, तदाऽसावपि तदुभयप्रकारसाधारणभूतमेव निर्देशं भजते, तय. **१अनु, >नू-राध-** ।

३. **यङि** परतोऽभ्यासांशः प्रायेण दीर्घान्ततया श्रूयते, क्वचिदेव त्वपि ह्रस्वान्ततया वा ह्रस्वान्तमात्रतया वा । इहैतत् त्रैविध्यं यथाप्रयोगं संहितापाठमनु निर्दिष्टं भवति, तय. **वावृधध्यै, ततृषाण-** इति **तातृषाण-** इति च, **ततृदान-**(वैतु. पदपाठानां प्रायिकी ह्रस्वान्तता-मात्रीया क्वाचित्क्येव च दीर्घान्ततामात्रीया प्रवृत्तिः, तय. **ववसान-ववृषाण-, चाकनत्, चाकशीति**) ।

(छ) प्राक्तनाः पदपाठाः

१. ऋग्वेदस्य च माध्यन्दिनतैत्तिरीययोर्यजुर्वेदयोश्च कौथुमस्य सामवेदस्य च शौनकीयस्याऽथर्ववेदस्य च प्राक्तनाः पदपाठा मुद्रिताः सन्त उपलभ्यन्ते । मैत्रायणीयः पदपाठोऽप्यंशतस्तत्संस्करणीयेषु टिप्पणेषु समाविष्टो भवति[१] ।

२. अस्मिन् कोष एतेषां पुराणानां पदपाठानामुपयोगप्रकारमधिकृत्य तावदिमे केचिद् विशेषा भवन्ति—

(अ) यदाऽत्रत्यो निर्देशः पदपाठादविशिष्टो भवति, तदा पदपाठविषया परामर्शिका नैव क्रियते ।

(आ) यदाऽत्रत्यो निर्देशः पदपाठाद् विशिष्टो भवति, तदा पदपाठो नित्यं टिप्पणगोचरीक्रियते प्रायेण तत्त्वत आलोच्यते च, तय. पृपृ. ८५^{b}, २१९^{c}, २४२^{d}, २९५^{c}, ३४६^{c}, ५८७^{a} ।

(इ) यदाऽत्रत्यो निर्देशः सांशयिको भवति, तदा पदपाठष्टिप्पणे दीयते, तत्तत्पक्षोपवर्णनं चाऽपि तत्रैव क्रियते, तय. पृपृ. ६^{a}, १४७^{b}, १५४^{d} ।

(ई) नञ्समासेषु नञ उत्तरमवग्रहो न क्रियत इति पदपाठीया सामान्या प्रवृत्तिर्भवति । इह तावद् यथापेक्षं नञ उत्तरमप्यवग्रहः क्रियते । ततः खल्व् **अ-पतिघ्नी-** इत्येवंप्रकारकाणां समासोत्तरपदानां सतां नञ्-समासानां स्वरः सुस्पष्टतरः स्यात् (वैतु. **अपति-घ्नी-** इति पदपाठीयो निर्देशः, यत इह पृथग्भूतेन **पति-**शब्देन नञः समासोऽनभिप्रेतो भवति, **पति-घ्नी-** इत्येतेन समासेन चाऽभिप्रेतो भवतीति दुर्वचमिव स्यात्) ।

(उ) यत्राऽप्यन्यत्र संदिग्धस्वरूपेषु समासेषु पदपाठीयाऽवग्रहाऽप्रवृत्तिर्भवति, तत्र सर्वत्रेहाऽवग्रहः क्रियते च टिप्पणीयेनाऽऽलोचनेन सनाथ्यते च, तय. पृ. ६१^{g} ।

---

[१] एतदीयः समग्रो मूलकोषोऽप्येकः पञ्चापविश्वविद्यालयपुस्तकालयीयतयाऽस्मत्पार्श्ववर्तितां भजते । यस्तु **रावण**कर्तृकत्वप्रसिद्धिबाह्वृचपदपाठीयसप्तमाष्टकमात्रीयोऽप्येको मूलकोष उक्तपूर्वे पुस्तकालये विद्यते, तस्य **शाकल**प्रसिद्धेः पदपाठान्नितरामभेदाद् **रावण** इत्यत्र प्रतिलेखक एव कश्चित् स्यान्नतु स्वतन्त्रपदपाठकारः कश्चिदिति स्पष्टम् ।

(ऊ) यदाऽत्रत्यनिर्देशाऽवग्रहीया स्थितिः पदपाठाऽवग्रहीयायाः स्थितेर्भिन्ना भवति, तदाऽयं स्थितिभेदष्टिप्पणे सम्यगालोचितो भवति, तय. पृपृ. ९१^{d}, १५९^{1}, १६३^{m} ।

(ऋ) श्रौता उपसर्गा उपसर्ज्यतिङपेक्षया व्यवहिताश्च भवन्त्यव्यवहिताश्च । ये तावद् व्यवहिता भवन्ति ते नित्यं सस्वरा भवन्ति, ये त्वव्यवहिता भवन्ति त उभयथा भवन्ति सस्वराश्च निःस्वराश्च । तद् ये निःस्वरा भवन्ति त एव पदपाठेषु पूर्वपदतया निर्दिश्यन्ते नेतरे । इह तु व्यवहिता अप्यव्यवहिता अप्यथ निःस्वरा अपि सस्वरा अपि येऽपि तिङ्-सापेक्षा भवन्ति, ते सर्वेऽपि पूर्वपदतया निर्दिष्टा भवन्तीत्येवमयं सहस्रशो निर्दिष्टिभेदकरः सुमहान् विशेषो द्रष्टव्यः।

(ॠ) संहितापाठीयस्य दीर्घत्वस्य निर्देशस्य विषये च यथाऽस्य कोषस्य पदपाठेभ्यो विसंवादाऽतिरेको भवति तथोपवर्णितचरमेव भवति (तु. भू. ४, १, च) ।

(ज) वर्गिता-निर्देशिका

१. इह तावदाधारग्रन्थीयानि पदानि तिङन्तानि सुबन्तान्यव्ययानि चेति त्रेधा वर्गीकृत्य च यथासंभवं यौगिकीभाव्य च सामान्येन सतैकेन वर्णमात्राऽनुक्रमेण निर्दिष्टानि भवन्ति ।

२. यावत् प्रतिवर्गीया नैर्देशिका विशेषा उपरितनानां यथास्वप्रकरणानामेव विषयतां भजेरन्, सामान्यायाः सत्या निर्देशव्यवस्थाया विषये केचिद् विशेषास्तावदिहाऽप्युल्लिख्येरन् —

(अ) तिङन्तीये वर्ग उपसृष्टाऽनुपसृष्टोभयविधानां सतां मूलधातूनां नामधातूनां च यथोपलम्भं सर्वलकारीयाणि रूपाणि समाविष्टानि भवन्ति ।

(आ) शुद्धक्रियाख्याणि रूपाणि च णिच्प्रभृत्यर्थविशिष्टक्रियाख्याणि प्राक्रियिकाणि रूपाणि च पृथगुपवर्गकल्पनेनाऽन्योन्यतो विभज्यन्ते । एवं सार्वधातुकनिष्पन्नानि रूपाण्यार्धधातुकनिष्पन्नेभ्यो रूपेभ्यो निर्देशक्रमपार्थक्येन विविच्यन्ते ।

(इ) सुबन्तानि रूपाणि यथास्वधातु-साक्षात्परंपरिताऽन्यतराऽभिसंबद्धप्रातिपदिकशिरस्कतया निर्दिश्यन्ते । अस्पष्टयोगत्वाद् धातवीयवंशपरंपराबाह्यनिर्देशानां सतां प्रातिपदिकानां च योगपरीष्टिष्टिप्पणगता भवति ।

(ई) तद्धिता यथास्वप्रकृतिभूतेभ्यः कृद्भ्यः श्रेणि-भेदेन निर्दिश्यन्ते ।

(उ) कृतां च तद्धितानां च पूर्वपदतश्चोत्तरपदतश्च सकलं सामासिकं वृत्तं यथायथं निर्दिश्यते च तुलनात्मकाऽध्ययनविशेषप्रयोजनकेन प्रतिपरामर्शिकासुभिक्षेण सनाथ्यते च ।

(ऊ) कार्तं वा ताद्धितं वा सामासिकं वा स्त्रीवृत्तं यथायोगप्रतिविविक्तेन सता श्रेणिबन्धेन पृथङ् निर्दिश्यते ।

(ऋ) यथायोगं निर्दिष्टानां सतां सुब्योगिनां प्रातिपदिकानां वैयक्तिकसंज्ञात्वेन वा सामान्यसंज्ञात्वेन वा भावपदत्वेन वा सर्वनामत्वेन वा विशेषणपदत्वेन वा क्रियाविशेषणत्वेन वा कथंचिदन्यथात्वेन वा यथाश्रुति वृत्तिवैशिष्ट्यं यावदपेक्षं टिप्पणेषु निर्दिश्यते ।

(ॠ) विलक्षणानि सन्ति तिङ्-रूपाणि वा सुब्-रूपाणि वा द्विर्निर्दिश्यन्ते, यौगिकेनाऽनुक्रमेण च प्रतिपरामर्शिकासनाथितेन सता यथाप्रातिस्विकेनाऽनुक्रमेण च ।

(ऌ) यौगिकत्वेन चाऽयौगिकत्वेन चोभयथाऽपि निर्देशभाञ्जि सन्त्यव्ययानि सौपतैङाभ्यां वर्गान्तराभ्यां सुवेचानि भवन्ति ।

(ए) अव्ययीया पृथक्-कृतिस्त्वेषा यथाप्राक्प्रसिद्धिप्रेक्षणसौकर्यमात्रप्रयोजना भवति। व्याकृतिसीमान्तदृशा हि तत्तदव्ययं तत्तत्प्रातिपदिकीयतत्तद्विभक्तीयं रूपं क्रियाविशेषणत्वेन वोपसर्गत्वेन वा समुच्चयपदत्वेन वा तत्तद्वृत्तिवैशिष्ट्ययुतं सद् भूयो भूयोऽभिन्नतयैव श्रूयमाणत्वात् कालेनाऽसौपमित्यस्याः प्रतीतेर्विषयोऽभूत् । एवं च तावदास्थायेहाऽनेकानि प्राक्प्रसिद्धितोऽव्ययाख्यानि सन्त्यपि पदानि सुबन्ताऽन्तरसन्यायतया प्रातिपदिकशिरस्कीकृत्य निर्दिष्टानि भवन्ति । अन्यानि चापि बहून्येवमनिर्दिष्टान्यपि सन्ति टिप्पणेषु तथात्वेन व्याख्यातानि भवन्ति ।

(ऐ) कर्मप्रवचनीयानामन्यत उपसर्गगतीनां चाऽन्यतो विवेक इह सम्यक् प्रदर्शितो भवति ।

(ओ) प्राक्प्रसिद्धित उपसर्गेतिसामान्यसंज्ञावतामव्ययविशेषाणामिह यथाश्रुतिलक्षणतः क्रियाविशेषणाऽऽत्मकान्यव्ययानि, औपसर्गिकाण्यव्ययानि, उपसर्गात्मकान्यव्ययानि चेति त्रेधा विषयविभागः कृतो भवति, तय. पृपृ. ३१९^{k}, ३२३^{v} ।

(औ) प्रतिसमासं यथाश्रुत्यर्थालोचनमिह तत्पुरुषादिभेदनिर्देशः कृतो भवति यथायोगसवग्रहश्च । अनया विधया खलु तत्तत्समासवच्छ्रुतिभागीया वृत्तिरिव विरचिता भवति ।

(अं) यद्यपि सवर्णानां सतां भिन्नवर्गीयाणां शब्दानां संकेतविशेषप्रयोजितो वर्गविवेक एव पर्याप्त इति कृत्वा सामान्येन तदीयः सांख्यो विवेकोऽन्यथासिद्धत्वादुपेक्षितो भवति, तथापि यत्र यत्र स्वरतो वाऽर्थतो वा वैशद्याऽर्थं सांख्यो विवेकोऽपेक्षितो भवति, तत्र तत्र सोऽपि कृतो भवति ।

(झ) स्वरः

यद्यप्युपरिष्टात् सौवरं प्रकरणं पृथग् विरचयिष्यमाणं भवति, तथाऽपि तद्विषयीयं यत् किंचित् सामान्यलक्षणं भवति, तत्तावदिदं सूच्यते—

१. एकैकः सौवरो निर्देशष्टिप्पण उपपादितो भवति ।

२. यथाश्रुतिशाखाभेदमुपलभ्यमानः स्वरभेदष्टिप्पणे सूचितश्च व्यवस्थापितश्च भवति, तय. पृ. ३७०^{a} ।

३. यथाऽपेक्षाविशेषं स्वर-शोधः कृतश्च यथायथं सूचितश्च भवति, तय. पृपृ. ७^{m}, ३७^{c}, १४५^{g}, २२१^{f} ।

४. अनङ्कितस्वरग्रन्थीयः स्वरः क्वचिदेवेहाऽङ्कितो भवति, तय. पृपृ. ६०^{f}, ६५^{e} ।

५. यद्यप्युदात्तश्च जात्यः स्वरितश्च यथाश्रुति सर्वत्राऽङ्कितौ भवतस्तथाप्युदात्त एव मौलिकः स्वर इत्यास्थाय जात्यस्य स्वरितस्य तन्मूलकतया प्रतिपादनेन तदीयः क्षैप्रस्वरितेनाऽभेदाऽन्वय इष्टो भवति, तय. पृपृ. ५३७^{l}, ५६६^{d} ।

६. यद्यप्येकपदाऽवच्छेदेन द्विस्वरत्वमपि यथाश्रुतीहाङ्कितं भवति, तथाऽप्यस्मिन् विषय एवमास्थितं भवति, यथा मौलिकस्थित्यनुदृष्ट्या सर्वत्राऽपि द्विस्वरवदेकपदताया विषय एकैकस्वरवतोर्द्वयोर्द्वयोः पदयोर्यथारूपयोश्च यथास्वरयोरेव च सतोः प्रारम्भिकसमासस्वरूपभूतं पारस्परिकसंनियोगमात्रं भवतीति च तस्मिंश्च संनियोगे सति नैरुक्तिकवर्णलोप-विकाराभ्यां च तयोः पदयोर्द्वयोः सतोरप्येकतेवाऽखण्डरूपा संपन्ना भवतीति च (तु. यथोत्तरखण्डम् एतवै, वाव, बृहस्पति- इह च पृपृ. १७८^{j}, १८४^{f}, १८५^{p}, ३१७^{i}, ३१९^{c}) ।

७. अत्रत्य उदात्तस्य चोदात्तभूमिस्वरितस्य च यथायोगमङ्कनप्रकारो नूतन इव प्रतीयमानोऽपि सन् पुराणाऽऽधारसुप्रतिष्ठो भवति । अस्य प्रकारस्य प्रकामं सारल्याच्च साक्षादिव प्रतीतिकरत्वाच्चेत ऊर्ध्वं करिष्यमाणेषु वैदिकग्रन्थीयेषु संस्करणेष्वपि तत्स्वराङ्कनसाम्यकरी सती महती खलूपादेयता स्यात् ।

(ञ) व्युत्पत्ति-योगः

१. यास्क-पाणिनिमूर्धन्यानां प्राचां निरुक्तव्याकरणप्रधान-शब्दमीमांसायाः प्रवर्त्तकानामाचार्याणां मतेन प्रत्येकमाख्यातं च नाम च योगजं भवति । तत्र तावदाद्यः प्रकृत्यात्मको भागो धातुरित्युच्यतेऽन्त्यश्च तिङ्सुबन्यतरविभक्त्याऽऽत्मकश्चाऽन्यतः कृत्तद्धिताऽन्यतरनामकरणाऽऽत्मकश्चाऽन्यतः प्रत्यय इति । केवलौ सन्तौ धातुश्च प्रत्ययश्च न प्रयुज्येते । तदीय-योगसिद्धानि सन्ति शब्दरूपाण्येव तु वाग्व्यवहारं लभन्ते । प्रत्येकं चेदृक्-स्वरूपं शब्दरूपं तत्तत्प्रत्ययीयेन काल-संख्या-कारकाऽऽदिभेदकोपाध्यात्मकेनाऽर्थेन युक्तं सन्तं क्रियामात्रस्वरूपं धात्वर्थमाह । तथाहि । **'अत्ता'**, **'अदनम्'**, **'अन्नम्'** इत्येतेषु त्रिष्वपि शब्दरूपेषु समानधात्वंशीयभक्षणाऽऽत्मकाऽर्थवाचकत्वसामान्ये सत्यपि यत्तदीयं यथाक्रमं कर्तृपरत्वं च भावपरत्वं च कर्मपरत्वं च परिणतं भवति, तत्तद्गत-**तृज्-ल्युट्-क्त**-प्रत्ययीययथायोगोपाधिसंभवं भवति । एवं तावद् धातूनां तत्तत्प्रातिस्विकाऽर्थवत्त्वं भवति प्रत्ययानां तु प्रातिस्विकाऽर्थवत्त्वाऽभावे सति धातवीयतत्तत्प्रातिस्विकार्थोपाधाथकमात्रत्वमिति विवेकः स्पष्टो भवति ।

२. यद्यप्यस्याः प्रकृति-प्रत्ययविभागीयायाः प्रक्रियाया निरुक्त-व्याकरणोभयवेदाङ्गीयं प्रामाण्यं प्रसिद्धं भवति, तथापि व्याकरणस्यैवाऽनया प्राधान्येन स-विषयता संपद्यत आनुषङ्गिकमात्रत्वेनैव तु निरुक्तस्य । तस्य हि तावत् प्राधान्येन तत्तत्प्रकृतिकत्वेन तत्तच्छब्दार्थपरीक्षणनित्यत्वेन प्रवृत्तिर्भवति । एवमपि तदतिपरोक्षवृत्तीनां च परोक्षवृत्तीनां च सतां शब्दानां वर्णविकाराऽऽगम-लोप-विपर्ययाऽनुसंधानतः प्रत्यक्षवृत्तित्वस्य प्रत्यापादनेन तदीयप्रकृतिप्रत्ययविभागीयं सौकर्यविशेषमातन्वद् व्याकरणस्य कात्स्न्र्यमेव प्रयोजयति ।

३. अस्ति तावद् निरुक्त-व्याकरणीययोः प्रक्रिययोरन्योऽप्येको विशेषः । तथाहि । ये पदे पदे वर्णाऽऽगमलोप-विकार-विपर्यया भवन्ति, ते वैयाकरण्यां प्रक्रियायां तत्तत्कार्यसूचकतत्तदनुबन्धवत्तत्तत्प्रत्ययसंनियोगेनाऽनुशिष्टा भवन्ति । त एव तु नैरुक्त्यां प्रक्रियायां तत्तत्प्रकृतिप्रत्ययप्रतिनियतसंनियोगनिरपेक्षं वाग्व्यवहारमात्रसिद्धेन सता तत्तद्विशेषधर्मकेण प्रातिस्वाभाव्येनोद्दिश्यन्ते ।

४. अथ शाब्दिकीं निष्पत्तिमधिकृत्य या प्रक्रियाऽस्मिन् कोषे चरितार्था भवति, तस्या अयं संक्षेपो भवति—

(अ) या नामोक्तपूर्वा पाणिनीयेति प्रसिद्धा सती प्रकृतिप्रत्यययोगनिर्भरा वैयाकरणी प्रक्रिया भवति, तन्मात्राऽनुसारीहत्यं निर्देशसर्वस्वं भवति ।

(आ) विस्पष्टव्युत्पत्तिकत्वाद् यौगिकवंशपरंपरीयत्वेन निर्दिष्टानां सतां शब्दानां विषये धातवीयांऽशस्य निगदसिद्धत्वात् प्रत्ययीयांश एव टिप्पणीयस्य विचारस्य प्राधान्येन विषयतां भजते ।

(इ) ये शब्दास्तावद् दुरूहव्युत्पत्तिकत्वाद् यौगिकवंशपरंपरातो बाह्यत्वेन निर्दिष्टा भवन्ति, तेषां व्युत्पत्तेर्विषये यत् किंचित् पुरातनं वा नूतनं वा कल्पनारूपं समभूत्, तत् सकलमपि यावच्छक्येन स्वीयेनोहापोहेन साकं टिप्पणेषु दीयते ।

(ई) बहुष्वपि शब्देषु लक्ष्यमाणानां वर्णविकारादीनां विषये व्याकरणाऽनुसारं च निरुक्ताऽनुसारं चोभयथाऽप्युपपत्तिः प्रदर्शिता भवति । एवं खलु द्वयोरपि तयोः प्रक्रिययोराधारभूतयोर्यथास्वसंज्ञापरिभाषयोरितरेतरीयतयाऽनुवाद इव कृतो भवति ।

५. यद्यपि पाणिनीयायाः प्रक्रियायाः प्रातिस्विकगुणप्रकर्षाच्च सुप्रतिष्ठितचतुर्दिक्प्रामाण्याच्च तद्वित्तिकविधानकत्वेनैवाऽयं कोषः प्रवर्त्तितो भवति, तथाऽपीहोपसप्तशतेषु टिप्पणेष्वार्य्यभाषीयां मौलिकीं स्थितिमुद्दिश्य स्वोपज्ञतयोपकल्पिताया नितरां स्वतन्त्रायाश्च सत्या अपरस्या नवीनाया वैयुत्पत्तिक्याः प्रक्रियाया अप्युपयोगः कृतो भवति । तद्विषयीयास्तावदिमे कतिपये वादाः संग्रहेण सूच्यन्ते—

(अ) मूलभूताऽऽर्यभाषा सार्थक-सस्वरैकाच्क-ध्वनीनामाधारेण प्रथमां प्रवृत्तिं लेभे ।

(आ) त आधारंभूता ध्वनयः स्वगताऽनेकखण्डा इव सन्त आदितो महाप्राणव्यञ्जनाऽऽत्मका अन्ततश्चाऽनुनासिकंभावुक-विलोलस्वराऽऽत्मकाश्च बभूवुः ।

(इ) संख्यातस्तावत्ते ध्वनयः पञ्चाऽनतिरिक्ततया संभाव्यमानाः सन्तो *घॄ, *झॄ, *धॄ, *भॄ, *अॄ इत्येवं निर्दिश्येरन्[1] ।

(ई) उच्चारणविषये प्रतिवक्तृभेदप्रातिस्वाभाव्यादेव त एत आधारभूता ध्वनयो व्यञ्जनखण्डतश्च स्वरखण्डतश्च प्रत्येकं बहुविधस्योच्चारणस्य विषयतां व्रजन्तः कालेन पश्चात्परिनिष्ठित-प्रतिविविक्तस्वरूप-तत्तत्स्वरव्यञ्जनाऽऽत्मतया परिणता बभूवुः[2] ।

(उ) त एते बहुविधमुच्चार्यमाणाः सन्त आधारभूता ध्वनयः प्रत्ययप्रकारकध्वन्यन्तरसंयोगनिरपेक्षाऽव्ययप्रकारकतयैवाऽऽदिमं प्रयोगं लेभिरे ।

(ऊ) आधारभूता ध्वनयो मूलतो नामतयैवोपकल्प्यमानाः सन्तस्तस्य तस्येतरेतरार्थसापेक्षतया संबद्धस्य सतोऽर्थस्य बोधनार्थमादिमवाक्यभूततत्तत्स्वीयपरंपरारूपतां चाऽन्यतस्तत्तद्वृत्तिवैशिष्ट्यतश्च समासतश्च व्यक्तिसामान्य-भाव-त्रितयपरकसंज्ञाऽन्यतमतया च विशेषण-सर्वनामाऽन्यतरतया च कर्मप्रवचनीयतया च संसर्गा[3]ऽन्तर्गा[4]न्यतरतया चाऽऽख्याततया च क्रियाविशेषणतया

---

[1] दीर्घताऽतन्त्रा भवति । अस्या **ऋ> अर्, इर्, उर्** इत्यस्य त्रैविध्येनाविर्भवतः परिणामस्य पाणिनीयायां प्रक्रियायामेवमेव संभवात् तत्संवादनैकदृष्टिकत्वेनोपकल्पितमात्रत्वात् ।

[2] अस्योच्चारणीयस्य परिणामस्य प्रवृत्तिप्रकारसामान्यमुपरिष्टान्निदर्शयिष्यमाणं भवति (तु. आचि.४)। इहापि तावदाधारध्वनीयाऽऽद्यव्यञ्जनांशनिवृत्त्याऽवशिष्टाच्च *ऋ इत्यवं निर्दिष्टव्याच्च सतो मौलिकात् स्वरात् स्वरान्तरीयो निवृत्तिपर्यवसानः परिणामक्रमोऽयं निदर्श्यते—.

$$\text{१.}\quad {*}\text{ऋ} > \begin{cases}\text{अर्} > \text{आ} > \text{अ} > \ldots.\\ \text{इर्} > \text{ई} > \text{इ} > \ldots.\\ \text{उर्} > \text{ऊ} > \text{उ} > \ldots.\end{cases}$$

$$\text{२.}\quad \text{अर्य्} > \begin{cases}\text{आय्} > \text{आइ} > \text{ऐ} > \text{ए} > \text{ऍ} > \text{इ} > \ldots.\\ \text{अय्} > \text{अइ} > \text{ए} > \text{ऍ} > \text{इ} > \ldots\end{cases}$$

$$\text{३.}\quad \text{अर्व्} > \begin{cases}\text{आव्} > \text{आउ} > \text{औ} > \text{ओ} > \text{ऑ} > \text{उ} > \ldots.\\ \text{अव्} > \text{अउ} > \text{ओ} > \text{ऑ} > \text{उ} > \ldots\end{cases}$$

[**विशेषः–ऍ, ऑ** इत्येतयोः सांध्यत्वविलयाऽनुपाती द्विमात्रत्वस्यैकमात्रत्वेन परिणामो द्रष्टव्यः ।]

[3] संसृज्यते वाक्यीयो वा वाक्यप्रदेशीयो वाऽर्थोऽनेनेति कृत्वोपसर्ग-कर्मप्रवचनीयोभयभिन्नानां सतां समुच्चयापादकानां निपातानामेषा संज्ञा द्रष्टव्या (= conjunction)।

[4] अन्तर्गच्छन्तीति कृत्वा वाक्यीयपदैरन्वयाऽभावेऽपि वाक्यीयाऽर्थसामान्यस्य तदन्तःप्रवेशेनेव प्रातिस्विकेनाऽऽश्चर्यादि-मानसभावपरेणाऽर्थेनोपाधायुकानां निपातानामेषा संज्ञा द्रष्टव्या (= interjection) ।

चोपसर्गतया चाऽऽर्थपरिणामवैविध्यं चाऽन्यतो भेजिरे[1] ।

(ऋ) तस्य तस्य संबद्धस्य सतोऽर्थस्य वाचकभूताभ्यस्ताभ्यस्ताभ्य आधारध्वनीयपरंपराभ्यो भूयोनियतप्रयोगाभ्यः सतीभ्य आदौ यथावस्थिताऽवयवीयस्वरपार्थक्यं चाऽपरिनिष्ठितसमासधर्मं च सत्[2] कालनैकस्वरतामापन्नं सकलं द्वन्द्वादिकं सामासिकं वृत्तं प्रादुर्बभूव। द्वन्द्व-तत्पुरुषावन्तोदात्तौ प्रादि-बहुव्रीही चाऽऽद्युदात्तौ बभूवतुरित्येतया मौलिकसामान्यविवेकदृष्ट्या येऽप्यन्तोदात्ताः समासा बहुव्रीहित्वेन च मध्योदात्ताः समासास्तत्पुरुषत्वेन च पाणिनीयेऽनुशिष्टा भवन्ति[3], तेऽवग्रहस्थितिपरिवर्तनेन यथायोगं तत्पुरुषत्वेन च बहुव्रीहित्वेन चोद्देश्याः स्युः ।

(ॠ) अनेकाच्काः सन्तः कृतश्च तद्धिताश्च तत्परकप्रसिद्धिकप्रत्ययाऽऽख्यानामभावाद् मौलिकस्थित्यनुरोधेनाऽऽधारध्वनीयाः समासविशेषा एव भवन्ति ।

(ऌ) स्त्रीप्रत्ययान्ततया प्रसिद्धानि शब्दरूपाण्यपि तत्परकप्रत्ययाऽभावसामान्याद् मूलतः समास-सवृत्तकान्येव भवन्ति (तु. पृ. ३९१^{g}) ।

(ऍ) सुप्तिङन्यतरप्रत्ययान्ततया प्रसिद्धानि चाऽपि शब्दरूपाणि तत्तत्प्रत्ययाऽभावसामान्यात् समास-सवृत्तकान्येव भवन्ति[4] ।

(ए) बहवः पाणिनीया धातवोऽप्यनेकाऽवयवत्वात् समास-सधर्माणो भवन्ति (तु. पृ. ४७९^{g}) ।

(ऐ) ये चाऽनेकार्था इत्येवं प्रसिद्धिभाजः शब्दा भवन्ति, ते स्वीयतत्तदर्थपरस्परवैशिष्ट्यात्मकत्वाऽभावे सति मूलतस्तत्तदर्थवाचकत्वेन भिन्ना एव सन्तः कालेन वर्णविकाराऽऽदितः परिणतायाः सवर्णताया वशादेकत्वमिवाऽऽपन्ना भवन्ति (तु. पृपृ. ४१६^{d}, ४३७^{j}, ४७९^{g}) ।

(ऑ) ये चाऽप्यभिन्नार्था इत्येवं प्रसिद्धिभाजः शब्दा भवन्ति, तेषामपि बहवो मूलतोऽन्योन्यमभिन्ना एव सन्तः कालेन विवर्णतया परिणता भूत्वा परस्परं भेदतो व्यवहारमापन्ना भवन्ति (तु. पुनस्-, भूयस्-)।

---

[1] प्रथममसमस्तानां च कालेन समस्तानां च सतामाधारध्वनीनामयं तत्तद्वृत्तिवैशिष्ट्यक्रमस्तावदनया तालिकया भूय इव स्पष्टः स्यात्—



[2] यतु. वाव इति *भर्-भर्- इत्येतदादिस्वरूपतयोपपाद्यमानम् ।

[3] तु. पा ६, २, २ उउ; १६२ उउ ।

[4] 'तवै' इत्यन्तानि द्विस्वराणि पदानि चान्यतोऽलुक्समासाश्चान्यतोऽत्र ज्ञापकतां यान्ति (तु. एतवै, बृहस्पति-) ।

(ओ) उदात्त एव मौलिकः स्वरः सन् कालेन सामासिके वृत्त आविर्भूते सत्यनुदात्तं चान्यत उदात्ताऽनुदात्ताऽन्यतरभूमिं स्वरितं चान्यतः प्रयोजयामास ।

(औ) एवं तावत् समस्ताऽसमस्ताऽऽधारध्वनिमात्राऽऽधारेण प्रथमतो नामिके वाग्व्यवहारे परिनिष्ठिते सत्येव सकल आख्यातिको वाग्व्यवहारस्तन्मूलकतयाऽऽविर्बभूवेति च तत्तन्नाम्ना पश्चादेव तन्त्रमात्रतः प्रसिद्धिं गताः सत्यः सुप्तिङ्कृत्तद्धितवृत्तयश्चाऽपि स्वरूपतः प्रातिस्विकार्थहीनतत्तत्प्रत्ययाऽऽख्यशब्दरूपाऽन्तत्वाऽभावे सत्याधारध्वनीयसमासाऽऽत्मकतां न व्यभिचेरुरिति चाऽत्र संग्रहो भवति ।

(ट) प्रक्रिया-संवादनम्

मौलिकाऽऽर्य्यभाषीयतत्त्वाऽनुसंधानतो वैयुत्पत्तिकस्य प्रकृतिप्रत्ययीयस्य विभागस्याऽनभ्युपेयत्वे (तु. पृपृ. ४३९^{j},४४३^{e}) सिध्यत्यपि कथमेतत्कोषोपनिबन्धो यथापाणिनि प्राचीनयौगिकसंज्ञा-परिभाषानुसारित्वेनैव प्रवृत्तिमान् भवतीत्युपदर्शितपूर्वम् । यया रीत्या त्वेवं सति नूतना मौलिकस्थितीया नाम प्रक्रिया पाणिनीयया प्रक्रियया संवाद्यमाना सती टिप्पणविषयतां भजते, सा खल्विदानीमत्र संक्षेपेणोच्यते—

१. **अर्, इर्, उर्** इत्येतेषां मौलिकाऽच्कानां त्रयाणामादेशानाम् **ऋकार** एव साधारणभूतः स्थानी स्यादिति कृत्वाऽऽधारध्वनयस्तदन्ततया निर्दिष्टा भवन्ति[1] ।

२. यदा कश्चिदाधारध्वनिराख्यातिकवृत्तिविशिष्टतया विवक्षितो भवति, तदाऽसौ पाणिनीयधातुसामान्येन धातवीयसंकेतपुरस्कारतो निर्दिष्टो भवति (तु. भू. ४, २, क, १), तय. पृ. ५८५^{l} ।

३. यदा कश्चिदाधारध्वनिर्नामिकवृत्तिविशिष्टतया विवक्षितो भवति, तदाऽसौ क्विबन्तीकृत्येव निर्दिष्टः सन् सुब्योगीयप्रतिपदिकाऽन्तरसामान्येनाऽऽवसानिकेन विच्छेदकाऽऽख्येन संकेतेन सनाथ्यते (तु. भू. ४, ३, क, १), तय. पृ. ५८७^{h} ।

४. परःसहस्राः पाणिनीया धातवः साऽवयवा भवन्तीति सूचितचरं वादमनुसृत्य ते धातवो यथाऽपेक्षमवयवप्रदर्शनपूर्वं टिप्पणेषूपयुज्यन्ते, तय. पृ. ४७९^{g} ।

५. एकः शब्दो वृत्तिवैशिष्ट्यभिन्नस्वरूपाऽनेकार्थवाचको न भवतीत्युक्तपूर्ववादेन पाणिनीयायाः प्रक्रियायाः संवादनार्थं धातूनां बहुप्रस्थानत्वमुपकल्प्य तज्जानां कृतामेकवृन्तगताऽनेकफलन्यायतोऽनेकार्थवाचकत्वमुपपाद्यते, तय. पृपृ. ४१६^{d}, ४३७^{b}, ४७९^{g} ।

६. पाणिनीयायां प्रक्रियायां ये स्वतन्त्रप्रयोगाऽनर्हाश्च प्रातिस्विकाऽर्थरहिताश्च सन्तः प्रत्यया भवन्ति, ते मौलिकस्थित्यपेक्षया स्वतन्त्रप्रयोगाऽर्हप्रातिस्विकाऽर्थवदाधारध्वनिपरिणतशब्दीयवर्णविशेषाः सन्तः पृथग्-निर्देश्याऽवयवधर्माणो भवन्तीत्युपवर्णितपूर्वं वादमनुसृत्य यत्र तत्र पाणिनीयानां प्रत्ययानां वास्तविकाऽऽधारभूतास्ते ते मौलिकाः शब्दा अपि निर्दिश्यन्ते, तय. पृपृ. १६३^{b}, ३४१^{k}, ३८१^{c}, ४०३^{n}, ४२५^{c}, ४२६^{m}, ४३०^{a}, ४८६^{b}, ४९०^{n}, ४६४^{b}, ५०२^{b}, ५०४^{n} ।

७. सर्वनामान्यव्ययानि च प्रातिपदिकानि सन्ति नामाऽऽत्मकप्रातिपदिकाऽन्तरसामान्येन तत्र तत्र यौगिकवंशपरंपरितेन सनाथ्यन्ते, तय. तु. २अनु, अस्मद्- ।

(ठ) अधिपाणिनीयमनुसंधानम्

यथाऽयं **कोषः** पाणिनीयमनुशासनं साक्षादिवाऽधिकृत्य सर्वाङ्गीणं च तुलनात्मकं चानुसंधानं प्रयोजयेत्, तथेदानीं संग्रहेणोच्यते—

---

[1] पाणिनीयायाः प्रक्रियाया बहिरस्य दीर्घत्वस्यान्यथासिद्धत्वमित्यभिसंधिर्भवति ।

१. नामाख्यातोपसर्गनिपातात्मकतया चत्वारि पदजातानीति यास्कः (१, १) आह । उपसर्गान् निपातेष्वन्तर्भाव्य (पा १, ४, ५८) च निपातान् स्वरादिगणसामान्येनाऽव्ययीभाव्य (पा १, १, ३७) चाऽव्ययानि लुप्तसुप्कतामात्रेण (पा २, ४, ८२) प्रातिपदिकान्तरेभ्यो भिन्नानि सन्त्यपि प्रातिपदिकान्येवेति कृत्वा च पाणिनिस्तु धातवः प्रातिपदिकानि प्रत्ययाश्चेत्येतत् तत्तत्पदस्वरूपापादकं सद् लाक्षणिकमात्रस्वरूपकपदार्थत्रितयमित्याह । एवं तावत् प्रत्ययानां साक्षान्निर्देशानर्हत्वाद् धातवश्च प्रातिपदिकानि चेत्येतद् वर्गद्वयमेव निर्देश्यत्वमापद्यते । एवं स्थितेऽपि त्वस्मिन् कोषे लुप्तसुप्कान्यव्ययानि संगृहीतार्थवैस्पष्ट्यार्थं सुब्योगीयेभ्यः प्रातिपदिकान्तरेभ्यो विशेष्य पृथगेव निर्दिश्यन्ते ।

२. अत्रत्यानां निर्देशानां पाणिनीयाऽनुशासनीयसमन्वयस्य तावदयं प्रकारो भवति—

(अ) यदा कश्चिद् निर्देशः साक्षादिवाऽष्टाध्यायी-गणोणादि-फिट्सूत्र-वार्तिकेष्टि-सव्याप्तिकस्य सतः पाणिनीयाऽनुशासनस्य विषयो भवति, तदाऽसावनुशासनविशेषो नियमेन सूच्यते, तय. पृ. १^{a} ।

(आ) यदा कस्यचिद् निर्देशीयस्य दुरूहस्य शब्दस्वरूपैकदेशस्य विषये पाणिनीयमनुशासनं न भवति, तदा तदनुसारं तस्योपपादनार्थं तदीयस्य विधानकस्य परिष्कारविशेषनिर्भर उपयोगोऽस्मदीयस्य प्रयत्नविशेषस्य विषयो भवति, तय, पृपृ. ६^{a}, ४१^{i}, ४२^{k}, ७६^{l}, ९०^{f}, ९१^{l} ।

(इ) येषां निर्देशानां विषये पाणिनीयाऽनुशासनस्य नितान्तमभावः स्यात्, तानधिकृत्य तत्र तत्र धातवीय-परस्मैपदात्मनेपदविकरणेडागमान्यतमीये वा प्रत्ययीये वाऽनुबन्धीये वा तैङे वा सौपे वा कार्ते वा ताद्धिते वा सामासिके वा सौवरे वा सांहितिके वोच्चारणीये वा पाणिनीये प्रकरणे वार्तिकरीत्योपसंख्यानं (संक्षे. उसं.) क्रियते, तय. पृपृ. ४३^{b}, २२७^{e}, २४१^{k}, ४७२^{d} ।

(ई) यदा कश्चिद् निर्देशो नैरुक्तिक्या तत्तद्वर्णलोपाऽऽगम-विकार-विपर्ययाऽऽदिस्वरूपया प्रक्रिययोपपादितो भवति, तदा पाणिनीयया प्रक्रिययाऽपि तदनुवादः क्रियते, तय. पृपृ. १^{c}, ४७२^{d} ।

(उ) यदा कस्यचिद् निर्देशस्य पाणिनीयेनाऽनुशासनेन विस्पष्टो विरोधो भवति, तदा तद्विषया स्पष्टैव सूचना क्रियते, तय. पृपृ. ११^{i}, ४१^{k}, ९०^{h}, २२३^{h}, ४४९^{a} ।

(ड) पूर्वाऽभ्यर्हितीयं निदर्शनम्

टिप्पणगतेषु तेषु तेषु नानाविषयेषु नानास्वरूपेषु चोहापोहेषु प्रवर्तमानेषु तत्तत्पक्षबलाबलपर्यालोचनसौकर्यार्थं सर्वत्र तु.इतिशिरस्कतया पक्षतः, वैतु. इतिशिरस्कतया विपक्षतश्च पूर्वेषामभ्यर्हितानां मतानि यथावद् निदर्श्यन्ते, तय. पृपृ. १६८^{a}, १६६^{e,g}, १७३^{m}, १७४^{n}, २२६^{b}, ३१६^{g} ।

२. तिङन्त-प्रकरणम्

(क) धातवः

१. सर्वे धातवः प्रातिस्विकतां गतेन √इत्येतेन संकेतेन पुरस्क्रियन्ते, तय. √१अंह्, √२अंह् ।

२. मा गाद् व्यर्थं धातवीयवस्त्वंश-वर्णक्रमो वैयाकुली-ग्रासतामिति सर्वे धातवो निरनुबन्धा एव निर्दिश्यन्ते, तय. √अञ्ज्, √कृ (=यक्र. अञ्जू, डुकृञ्) ।

३. पाणिनीय इदितः सन्तो धातव इह कृतनुमागमत्वेन निर्दिश्यन्ते, तय.√१अंह् <√अहि ।

४. पाणिनीय इदित्तयाऽनिदित्तया चोभयथा निर्दिष्टिं भजमाना धातवः पार्थक्येन संख्यायन्ते । इह तु तदनुविधायि धातवीयं नुंभावाऽभावत्वं युगपदेव निर्दिश्यते, तय. **अभि√दभ्, दम्भ्** ।

५. पाणिनीये केचिद् धातवस्तदादेशा वाऽदन्तत्वेनाऽनुशिष्टा भवन्ति । त इह धात्वन्तरसामान्येन हलन्ततयैव निर्दिश्यन्ते, तय. **√कथ्, √गण्, √धाव्, √यच्छ्** ।

६. सश्रुतयः सन्तो भिन्नार्था धातवः (तु. संज्ञे. **बधा.**) तत्स्पष्टविवेचनाऽपेक्षितस्वशक्तिसमुचितमात्रासद्भावाऽभावविचारतः क्वचिदेव पृथक् संख्यायन्ते, प्रायेण तु तेन तेनाऽभिप्रेतेनाऽर्थेनैव सनाथ्यन्ते, तय. तु. टिटि. **√अँर्, √अर्च् > अर्कु-, √१अश्, √२अश्, √१अस्, √२अस्**; वैतु. **√सन्** *सरणे (पृ. ५२८^{j}) ।

७. उपसृष्टा धातवो धात्वन्तरसाकद्यमारोप्यमाणा यथास्ववर्णमात्रं स्वातन्त्र्येण निर्दिश्यन्ते, तय. **अति√पद्, अनु√पद्, अभि√पद्** । एवं स्थितेऽपि कस्को धातुः केन केनोपसर्गेणोपसृज्यत इत्यस्य समुदितपरिचयार्थमनुपसृष्टधातुनिर्देशाऽन्ते यथाश्रुति तदीया उपसर्गा अपि कोष्ठेऽन्तर्बध्यन्ते, तय. **√अज्**···[अनु°,···] । अनयैव किल द्वैधप्रक्रिययोपसृष्टमात्रतया वर्तमानानां धातूनामपि यथातद्वर्णमात्रं परामृश्यत्वेन निर्देशः संभवति, तय. **√अङ्ख्** । ये चाऽप्यन्ये विशेषा इह वैशेष्येणाऽवधेयास्त इमे सूच्यन्ते—

(क) यत्रोपसर्गधात्वंशयोः संधिर्न भवति, तत्र तन्मध्यगो धातवीयः संकेत एव तद्व्यवच्छेदायाऽलम्, तय. **अति√पत्** ।

(ख) यत्रोपसर्गधात्वंशयोः संधिर्भवति, तत्र सांहितिकाद् वर्णादनन्तरं बध्यमाने वर्तुलकोष्ठेऽन्तर्मध्यगेन सता धातवीयेन संकेतेन व्यवच्छिद्यमानौ विसंहितौ वर्णौ निर्दिश्येते, तय. **अवा**(व√२अ)**स्**, **अवे**(व√इ), **अभ्य**(भि√अ)**ञ्ज्** ।

(ग) यत्र धातुरनेकधोपसृष्टो भवत्युपसर्गीयः संधिश्च न भवति, तत्र सकृद्वा भूयो वा यथापेक्षं मध्यगेन विच्छेदकाऽऽख्येन संकेतेनोपसर्गीयो व्यवच्छेदः प्रयोज्यते, तय. **अति-प्र√कित्, अनु-प्र√युज्, अनु-सं-प्र√या** ।

(घ) यत्र धातुरनेकधोपसृष्टो भवत्युपसर्गीयः संधिश्च भवति, तत्र सांहितिकाद् वर्णादनन्तरं बध्यमाने वर्तुलकोष्ठे विसंहितयोर्वर्णयोर्मध्ये विच्छेदकाऽऽख्यः संकेतो ध्रियते, तय. **अत्यु**(ति-उ)**द्√ग्रह्**, **अन्वा**(नु-आ)**√भू**, **अनु-पर्या** (रि-आ)**√वृत्** ।

(ङ) यत्र धातुरनेकधोपसृष्टो भवत्युपसर्गीयश्चोपसर्गधातवीयश्च संधी भवतः, तत्र प्रथमं संहितस्वरूपो निर्देशो भवति, तदन्ते च वर्तुलकोष्ठे यथापेक्षमुक्तपूर्वयोः संकेतयोरुपयोगेन समुचितोऽन्योन्यं व्यवच्छेदः प्रदर्शितो भवति, तय. **अभ्युदे**(अभि-उद्-आ√इ) ।

(च) यत्राऽनेकधोपसृष्टिर्भवति, तत्रोपसर्गक्रमनिर्देशस्याऽर्थक्रमनित्यस्य सतः क्वचिच् श्रुतिक्रमेण विसंवादोऽपि प्रतीयेत, तय. **उपा**(प-आ)**√गम् > आ···उपगन्तन** ।

८. यत्र किंचिद् अनैपातिकं क्रियाविशेषणं (=सुबन्तविशेषात्मकं) गतीयते, तत्र तद्युक्तो धातुरप्युपसृष्टधातुनिर्विशेषतया निर्दिश्यते, तय. **अन्तर्-आ√धा, अन्तरि** (र्√इ), **अस्तमि** (म्√इ), **अरण्येऽनु√वच्**[1] ।

९. नामधातवो यथास्वनामिकप्रकृतिमनु यथावर्णमात्रं निर्दिश्यन्ते । तद्विषय एते विशेषाः सूचनीया भवन्ति—

---

[1] तु.पृ. ४०१^{f} यदनु कृद्वृत्त्यापादनप्रयोजनकोऽयं निर्देशो भवति ।

(क) येऽदन्तप्रकृतिकाः सन्तः क्विपि निष्पन्ना भवन्ति, ते स्वराङ्कनं विनैव निर्दिश्यन्ते, तय. √अव् > अोम- > √*ओम् ।

(ख) ये णिचि निष्पन्ना भवन्ति, ते चौरादिक-हेतुमदन्यतर-णिजन्तधात्वन्तरवत् स्वराङ्कनमभजमाना: सन्त इकारान्ततया निर्दिश्यन्ते, तय. अुन्त- > √*अन्ति, २अन्धु- > √*१अन्धि ।

(ग) उक्तपूर्वद्वैविध्यविभिन्ननिष्पत्तीनि नामधात्वन्तराणि प्रायेण पाणिनीयप्रक्रिययाऽनभिमततत्क्लेशनाऽतिरेकव्यतिरेकतो[1]ऽनुवादयितुमशक्यानीति कृत्वाऽङ्गरूपता[2]मापाद्य सस्वराणि निर्दिश्यन्ते, तय. अंुहस्- > √अंहोयु, अुघ- > √अघायु, अुन्न- > √अुन्निय ।

१० पाणिनीये येषां धातूनामन्योऽन्यमादेशादेशिभावो विधीयते, तदीय इहत्ये निर्देश एते विशेषा भवन्ति—

(क) यदैवंविधयोः कयोश्चिद् धात्वोरापातिक्या[3] भाषाशास्त्रीयया दृष्ट्या पार्थक्यमेव प्रतीयते, तदा तयोरसंबद्धधात्वन्तरद्वयसामान्येन पृथङ् निर्देशो भवति, तय. √१अस्, √भू च, √दा, √यच्छ् च, √ब्रू, √आह् च, √सृ, √धाव् च, √दृश्, √पश् च, √इ, √गा च ।

(ख) यदैवंविधयोः कयोश्चिद् धात्वोरापातिक्याऽपि भाषाशास्त्रीयया दृष्ट्या साजात्यसंनिकर्षः प्रतीयते, तदा तयोर्मध्ये यस्य भूयसी रूपसंपत्तिः स्यात्तदनुगततया चाऽवान्तरपार्थक्येन चाऽल्पीयोरूपसंपत्तेर्धातोर्निर्देशो भवति। एवं स्थितेऽपि परामर्शसौकर्यौपयिकतया तस्य यथातद्वर्णमात्रं पृथगपि धातुमात्रीयो निर्देशो भवति, तय. √इच्छ् > √इष्, √ऋच्छ् > √ऋ, √गच्छ् > √गम्, √यच्छ > √यम् ।

११. यदा कस्यचिद् धातोस्तदीयाया रूपसंपत्तेरादिवर्णतो बहुविधत्वाद् विशदवैयुत्पत्तिकप्रतीत्यर्थं तदानुगुण्येनाऽऽदिवर्णभेदतो बहुधा निर्देशः कृतो भवति, तदा प्रतिनिर्देशविशेषं निर्देशान्तरीयः परामर्शो वर्तुलकोष्ठेऽन्तर्बध्यते, तय. √अर्च् (= √ऋच्), √अर्ह् (= √*ऋंह्) ।

१२. नवोपकल्पिता धातवः प्रायेणा[4]ऽधितारकिता भवन्ति । अथ यैरपेक्षाविशेषैस्तदीयोपकल्पना प्रयोजिता भवति, त इमे स्मर्यन्ते—

(क) यदा तन्मूलानि कृत्तिङ्रूपाण्युपलभ्यन्ते, तय. अंुहस्- > √*अंहोयु, अंहुरु- > √*अंहूरि, √*अघ्, √*अङ्कूयु, √*अप्, √*ऋंह् ।

(ख) यदा तदीयेन यथावर्णमात्रेण व्यवस्थापनेन परामर्शे सौकर्यविशेषः संजायते, तय. √*अर्, √*अर्ध्, √*अर्ष् ।

(ग) यदा तद्द्वारा विशेषतो मौलिकीमार्य्यभाषामपेक्ष्य योग-संपत्तिर्भवति, तय. √*ऋ (पृ. ३९७^{p}), √*अस्कृ (पृ. ४०४^{f}), √*मृ (पृ. ४०८^{g}), √*धृ, √*क्षृ (पृ. ४९९^{c}) ।

---

[1] अनभिमतस्तस्याः (= पाणिनीयायाः प्रक्रियायाः) क्लेशनाऽतिरेकस्तद्व्यतिरेकतस्तामलितरामिवाऽक्लेशयित्वेत्यर्थः ।

[2] तिङि परतः सति नामधातवीयं यदङ्गं तद्रूपतामिति भावः ।

[3] मौस्थि. अपेक्षया तत्संबन्धसंभवविच्छेदो मा भूदित्यर्थमेतद् विशेषणं दीयते ।

[4] क्वचिदनवधानात् तारकेयं नापि प्रत्ता भवतीत्येतत्सूचकमिदं विशेषणं द्रष्टव्यम् ।

१३. पाणिनीये विकरणभेदेन पृथक् संख्यायमाना धातव उपरिवक्ष्यमाणेन प्रकारेण तदीयेषु रूपेषु गणभेदतः पार्थक्येन संघटितेषु सत्स्वहैकत्रैव निर्दिश्यन्ते, तय. **√इ, √कृ** ।

(ख) तैङान्यङ्गानि

१. तिङि परतोऽङ्गीभविष्यति धातौ लक्ष्यमाणमवान्तरप्रत्यय-तत्प्रकारकोपजनाऽन्यतरप्रयोजितं द्विर्वचनं वाऽन्यत् किंचित् कार्यं वाऽवान्तराऽङ्गस्य प्रयोजकमिव सत् तेन साकं निर्दिश्यते, तय. **अति√ष्ठा(<स्था)>तिष्ठ (=°ष्ठ्), अभि√हन्>जिघांस(=°स्), अभि-सं√पद्>पादि** ।

२. यदैवमभिनिर्वर्तुकान्यवान्तराङ्गाणि भूयांसीव भवन्ति, तदा तेषां यथास्वं रूपखण्डानामादौ निर्देशो भवति, तय. **अति√तॄ>अति√तर्, अति√ततॄ, अति√तुर्, अति√तारि** ।

(ग) तैङानि रूपाणि

१. यथाश्रुतसंगृहीतानां सतां तैङानां रूपाणां मध्ये प्रथमं सार्वधातुकलकारीयाणि शुद्धवृत्तीयानि[1] रूपाणि लड्-लेड्-लोड्-लङ्-विधिलिङानुपूर्व्या निर्दिश्यन्ते, तय. **अनु√ब्रू, √१अस्** ।

२. यदैतानि रूपाणि गणतो भिद्यन्ते, तदा तानि प्रतिगणभेदं खण्डपार्थक्येन निर्दिश्यन्ते, तय. **अति√तॄ, अनु√भृ** ।

३. तत्पश्चादवशिष्टलकारीयाणि शुद्धवृत्तीयानि रूपाणि लिड्-लृडाशीर्लिङ्-लुङ्-लृङामनुक्रमेण निर्दिश्यन्ते, तय. **अनु√वृत्, अनु√ष्ठा (<√स्था), √१अस्, √२अस्** ।

४. आर्धधातुकायमानस्य लेटो रूपाणि सार्वधातुकलेड्रूपेभ्योऽवच्छिद्य लुङ्रूपैः साऽङ्गानि सन्ति तैः सहैव निर्दिश्यन्ते, तय. **अति√तॄ>?अतितरः, अ॒ति···तारिषत्** ।

५. अनयैव दिशा लोड्रूपाणि विधिलिङ्रूपाणि चाङ्गभेदवन्ति सन्त्यन्तरतमलकारान्तरीयरूपाण्यनु विविच्य विविच्य निर्दिश्यन्ते, तय. **अप√भू> अ॒प····भवतु, अ॒पभूतु, अ॒पि····भूतु, अ॒पि···जगम्युः** ।

६. वेदे लुङ्दुर्भिक्षमिव भवति । तृच एवौत्तरकालिकी तदर्थताऽऽविरभूदित्यभिसंधायोपलभ्यमानैव सत्येकैतदीया श्रुतिः कृत्तयैव निरदेशि, तु. **अन्वा√गम्> अन्वा-गन्तृ॒-** ।

७. उभयपदीयानां रूपाणां मध्य आत्मनेपदीयानां पूर्वभावः परस्मैपदीयानां चोत्तरभावो भवति, तय. **अभि√मृश्, अभि√रक्ष्** ।

८. रूपाणां पुरुषतः प्रथममध्यमोत्तमक्रमेण वचनतश्चैकद्विबहुक्रमेण व्यवस्थापनं भवति, तय. **अभि√रक्ष्, √१,२अस्** ।

९. सस्वर-निःस्वररूपाणां मध्ये सस्वराणां पूर्वभावो निःस्वराणां चोत्तरभावो भवति, तय. **√अव्> अ॒वति, अवति, √१अस्>अ॒स्ति, अस्ति** ।

१०. शुद्धवृत्तीयानि रूपाण्यनु तद्वदेव व्यवस्थापितानि सन्ति प्राक्रियिकाणि **यग्-णिच्-सन्-यङन्त**जातीयानि रूपाणि निर्दिश्यन्ते, तय. **√अञ्ज्, अति√तॄ, √अद्, अनु√शक्** ।

११. यत्र तत्रोपलभ्यमानस् तिङ्रूपान्तीयः सांहितिको दीर्घभावः साकं निर्दिश्यते (तु. भू. ४,१,च,२), तय. **अप√हन्>अ॒प...हत्॒>ता॒, अपि√भू>अ॒पिभुम्॒>मा, √अव्> अ॒व>वा** ।

---

[1] **णिजाद्यभिव्यञ्जितहेतुत्वाद्यर्थविशेषानुपहितं सदप्राक्रियिकं यद् वृत्तं भवति तदेवेह शुद्धमिति विशिष्योच्यते ।**

१२. तिङ्-रूपाणि परिसमाप्य तेन तेन प्रकृतेन धातुना योगमाप्नुवानानामुपसर्गाणां संग्रहो वर्गकोष्ठेऽन्तर्बध्यते, तय. √अद्…[अपि°, आ°, वि°]।

१३. विलक्षणानि रूपाणि यथास्ववर्णमात्रमप्यनुक्रम्यन्ते च ततो यथास्वधातु प्रतिपरामर्श्यन्ते च, तय. अप्सन्त < √*अप्, अ॒श्नन् < √२अश् ।

१४. अथोपसृष्टधातवीयरूपनिर्देशीयाः केचिद् विशेषा उल्लिख्येरन्—

(क) व्यवहिताऽव्यवहितोभयथाप्रयुक्तानामुपसर्गाणां विषये प्रतिस्थलं वाक्यान्वयीयायाः सौवर्याश् छान्दस्याः सांहितिक्याश् च स्थित्या भूयोभूय आलोच्यत्वाद् नितान्तं दुष्करोऽपि सन्नेष निर्णयो दुर्वारो भवति यथोपसर्गत्वेन निर्दिश्यमानं पदं वस्तुतोऽतिक्रियाविशेषणभावं सदेव संसिद्धोपसर्गभावं भवतीति (तु. भू. ४, १, ञ, ५, अ उउ) ।

(ख) अव्यवहितोपसृष्टानां धातूनां रूपाणि यथाश्रुतमेव निर्दिश्यन्ते, तय. **अति√कृ > अतिक॒रोति।**

(ग) व्यवहितोपसृष्टानां धातूनां रूपाणि तु कतिभिश्चिद् माध्यमिकैर्बिन्दुभिः सह निर्दिश्यन्ते, तय. **अति√तॄ>अ॒ति…तरामसि ।**

(घ) यदोपसर्गमात्रस्य पुनःश्रुतेः श्रावितचरस्य तिङ्-रूपस्याऽध्याहारः साऽवसरो भवति, तदोपसर्गे भूयः पृथग् निर्दिष्टे सत्यऽध्याहर्त्तव्यं तिङ्-रूपं विभिन्नं मुद्रितं सद् वर्तुलकोष्ठेऽन्तर्बध्यते, तय. **अप√नुद् >अ॒प**[३](नुदस्व)[१] ।

(ङ) प्रतीकगताश्चोपसर्गमात्रश्रुतयस्तत्तन्मूलत आहारितैस्तद्युक्तपूर्वैस्तिङ्-रूपैर्विमुद्रितैश्च कोष्ठबद्धैश्च सद्भिः सनाथीकृत्य निर्दिश्यन्ते, तय. **अभी** (भि√ई)>**अभि॒** (ईमहे)।

(च) यदोपसर्गमात्रश्रुतिः कल्पयितव्याऽऽक्षेप्ययोग्यतिङ्-रूपा भवति, तदा तदव्यवधानेन दक्षिणतो विच्छेदिकासनाथितं सद् धातवीयसंकेतमात्रं प्रदाय तदीये टिप्पणे तिङंशो निर्दिश्यते, तय. **अति√-**। परं प्रायेण यदा साक्षाद् निर्दिष्टस्यैव सतः कस्यचिद् धातोः किंचिद् रूपमुक्तपूर्वविधया प्राकरणिकीं योग्यतामपेक्ष्याऽध्याहार्य्यं स्यात्, तदा तद् रूपमपि कोष्ठेऽन्तर्बद्धं सत् तद्धातुरूपान्तरसंपत्त्या सह निर्दिष्टमेव भवति, तय. **अप√गम् > अ॒प** (गमयन्तु)।

(छ) रूपनिर्देशाऽवसर उपसर्गगतो वोपसर्ग-धातुगतो वा संधिः कोष्ठकान्तर्बध्यमानयथास्वविच्छिन्नरूपः सन् यथाश्रुतं निर्दिश्यते, तय. **अभ्यु** (भि-उ)पा(प-आ) **व√हृ > अभ्युपावहरामि ।**

३. सुबन्त-प्रकरणम्

(क) वैशेषिकाः संकेताः

१. सर्वेषां सुबर्हाणां प्रातिपदिकानामन्ते तत्प्रातिस्विकसंकेततया दीयमानो विच्छेदकसंकेतस्तेषामन्यतो धातुभ्योऽन्यतश्चाऽव्ययेभ्यः पृथक्करणः सन् प्रयोगे तदीयस्य सुप्प्रत्यययोगस्याऽवश्यंभावित्वं सूचयेत्, तय. **अं॒श-, अंशु॒-, अग्नि॒-, अग्ना॒यी-, आग्नेय॒-, अग्नि॑दग्ध॒- ।**

२. यदा किञ्चिन्न सुबर्हतयाऽप्रसिद्धचरं प्रातिपदिकं तथात्वेन निर्दिश्यते, तदा तदन्त्यो विच्छेदकस्तारकया सनाथ्यते, तय. **अन्त॒र्*- २अव॒स्*-** ।

---

[१] अत्र मूर्धन्या संख्याऽऽवृत्तित्रिकं सूचयति ।

३. अलुक्-समासीयं पूर्वपदं पृथगवान्तरप्रातिपदिकीकृत्य स्वरेण च विच्छेदकेन च विना निर्दिश्यते, तय. **अग्र- > अग्रे** ।

४. व्यवहितपदश्रुति सामासिकं प्रातिपदिकं ϕ इत्येतेन संकेतेन पुरस्क्रियते (तु. भू. ४, २, ग, १४, ग), तय. **ϕअति-रोहत्-, ϕअप-घ्नत्-, ϕअप-दुहत्-** ।

(ख) कृद्-व्यवस्थापनम्

१. धातोश्च तज्जस्य कृत्-प्रातिपदिकस्य च मध्ये सति तद्भावे तद्धातवीयतिङ्-रूपाणि विहाय नान्यत् किमपि व्यवधायकं भवति, तय. **अंहोयु-, अङ्कूयत्-, अभि-श्वसत्-, अपि-हीन-** ।

२. मुख्यधात्वनुगताऽवान्तरीकृतधातुजं प्रातिपदिकं मुख्याऽवान्तरोभयप्रकारकधातवीयरूपसर्वस्वं परिसमाप्य तदुपरि निर्दिश्यते, तय. **अनु√ गम्>गच्छ्>अनु-गच्छन्ती-, अति√तॄ>अति√तर्>अति-तर-** ।

३. बहुत्वे सति धातुविशेषजानि कृत्-प्रातिपदिकानि यथास्ववर्णमात्रं निर्दिश्यन्ते, तय. **√अव् > अव्-, अव, ऊति-, ऊम-** ।

४. गणभावेन निर्दिष्टानां सतां प्रातिपदिकानामवान्तरीकृताः प्रभेदा मुख्यैः प्रभेदैः साकं वा यथास्ववर्णमात्रं च यथाप्रातिस्विकरूपखण्डशीर्षण्यतया च वा निर्दिश्यन्ते[1], तय. **अदस्- > अदस्-, असौ-, असु-**···; **अस्मद्- > अस्म-, अस्मद्-, अहम्, आव**····; **अहन्- > २अह-, अहन्-, अहर्-, अहस्-** ।

५. यथावर्णमात्रमनुक्रमस्य कृन्मात्रसामान्यात् सुबर्हाणां प्रातिपदिकानां सतां कृतां पार्श्वत एवाऽसुबर्हाणामव्ययानां सतां कृतामपि निर्देशो भवति, तय. **अनु-दृश्य, अभि-दुह्य, अभि-द्रुह्य** ।

(ग) तद्धित-व्यवस्थापनम्

१. ताद्धितानि प्रातिपदिकानि यथास्वं नामिकप्रकृतीनामुपरिष्टादव्यवधानेन यथावर्णमात्रं निर्दिश्यन्ते, तय. **अग्नि-> अग्नि-मत्-, आग्नेय-; २अ-दिति- > अदिति-त्व-, आदितेय-, आदित्य-** ।

२. येषां तद्धितानां स्वनामिकप्रकृतिभिराद्यक्षरसामान्यं भवति, ते तत्पूर्वपदैः समासैः सस्थितयः सन्तस् तदीयस्तम्भाऽपेक्षयैकया मात्रया व्यवहिते स्तम्भान्तरे निर्दिश्यन्ते, तय. **२अग्नीषोम-> अग्नीषोमीय-; अग्र-> १अग्रिय-, २अग्रिय-, अग्र्य-** ।

३. येषां तद्धितानां स्वकृत्प्रकृतिभिराद्यक्षरेण वैषम्यं भवति, ते तत्प्रकृतिकेभ्यः समासेभ्यः प्रागेव तदीयस्तम्भाऽपेक्षया मात्राद्वयेन व्यवहिते स्तम्भान्तरे निर्दिश्यन्ते, तय. **अतिथि- > आतिथ्य-** ।

४. यदा तु विषमाऽऽद्यक्षरस्याऽपि सतस्तद्धितस्य नामिकी प्रकृतिः सामासिकीं पूर्वपदतां नोपेयात्, तदा तन्निर्देश एकया मात्रया व्यवहिते स्तम्भ एव क्रियेत, तय. **अग्रॆयण- > आग्रयण-** ।

५. ताद्धितानां तद्धितानां विषयेऽयं सामान्यो नियमो भवति, यथा यस्य या प्रकृतिस्तस्य तदपेक्षयैकया मात्रया व्यवहिते स्तम्भे निर्देशः स्यादिति, तय. **२अ-दिति- > आदित्य- > आदित्य-वत्-** ।

(घ) समास-व्यवस्थापनम्

१. माध्यमिकविच्छेदकान्तरसमन्वितानि सन्ति सामासिकानि प्रातिपदिकान्यन्तमात्रविच्छेदकितसुबर्हप्रातिपदिकान्तरमात्रात् सुवेचानि स्युः, तय. **अघ-रुद्-, अघ-शंस-, अघ-हार-** ।

---

[1] उपरितनात् खण्डात् प्रभृति णत्व-तदभावाभ्यां च षत्व-तदभावाभ्यां च लक्षितानि प्रातिपदिकान्यप्यनयैव दिशा मुख्याऽवान्तरीकृत्य निर्देक्ष्यन्ते, तय. **धनुर्, ष्, स्,ः-, पूषण् ,न्-** (वैतु. इह **अर्यमन्-**)।

२. समासेऽसमस्तप्रातिपदिकान्तरेण समस्य समासान्तराऽवयवतामुपेयुषि माध्यमिकविच्छेदकस्तदीय-पूर्वोत्तरान्यतरपदताया अनुरोधात् तदन्त्यो वा तदाद्यो वा यथायोगं संजायते, तय. **अघशंस-हु॒न्-**, ***अ॒धि-कृष्णाजिन-**।

३. समासद्वयेन समासान्तरे जन्यमाने तत्समासान्तरमात्राऽपेक्षया मध्ये विच्छेदको दीयते, तय. **अघशंस-दुःशंस॒-**, **अजात-पुत्रपक्षा-** ।

४. स्वपूर्वपदीयेष्वाद्यक्षरेण वैषम्यभाक्षु तद्धितेषु यथायथं निर्दिष्टेषु सत्सु समासा यथावर्णमात्रं निर्दिश्यन्ते, तय. **अ॒तिथि-** > **अतिथि-ग्व॒-**, **अ॒तिथि-पति-** ।

५. प्राथमिकः समासः स्वपूर्वपदापेक्षयैकया मात्रया व्यवहिते स्तम्भे निर्दिश्यते, तय. **१अ॒सुर-**> **असुर-क्ष॒यण-**।

६. समासजः समासः स्वसमस्तपूर्वपदापेक्षयैकया मात्रया व्यवहिते स्तम्भे निर्दिश्यते, तय. **अग्निष्टोम॒-प्रायण-** ।

७. यदा समस्यमानयोः पूर्वोत्तरपदयोरन्त्याऽऽद्यवर्णयोस्तयोरन्यतरस्मिन् वा सांहितिको विकारो भवति, तदाऽसौ तन्मध्यप्रवेशिते वर्तुलकोष्ठे यथायथं निर्दिश्यते, तय. **अग्न्यु**(ग्नि-उ)**पस्था॒न-**, **अ॒क्षितो**(त-ऊ)**ति-**, **अन्तः**(<र्-) **कोश॒-**, **अती॒**(ति-इ)**त्वरी-**, **अनु-ष**(<स)**त्य॒-** ।

८. यदा पूर्वपदाऽन्त्यो दीर्घः स्वरः पौर्वकालिकह्रस्वमूलो भवति (तु. भू. ४, १, च, २ उउ.), तदाऽसौ ह्रस्वो यथापरिचितपरिभाषं सुगमय्य निर्दिश्यते[1], तय. **अ**(क्ष>)**क्षा-न॒ड्-**, **अ**(जि>) **जी॒-गर्त-**, **अ**(ति>)**ती-काश॒-**, **अ**(नु >) **नू-वृ॒त्-** ।

(ङ) स्त्रीलिङ्गक-व्यवस्थापनम्

१. पाणिनीयायां प्रक्रियायां स्त्रीलिङ्गकमात्रतया सिषाधयिष्यमाणानि सन्ति दीर्घान्तानि प्रातिपदिकानि तथैव निर्दिश्यन्ते, तय. **अर्ह॒णा-** ।

२. यानि प्रातिपदिकानि पाणिनीये संभवल्लिङ्गान्तरतया शिष्यमाणानि सन्त्यप्युपलब्धस्त्रीलिङ्गकमात्र-श्रुतीनि भवन्ति, तानि वर्तुलकोष्ठित-कोणपुङ्खान्यतरसरूपसंकेतसहकृताऽस्त्रीपरकपूर्वरूपोपकल्पनानि कृत्वा निर्दिश्यन्ते, तय. **अ॒नपरोधु** (क >) **का-**, **अश्यु॒मा**(न >) **ना-**, **अति-चु॒र**(त् >)**न्ती-**, **अश्व-पर**(शु>)**शू*-**।

३. स्वराऽभेदेन लिङ्गपर्यायतोऽकाराऽऽकारान्यतराऽन्ततयोपलब्धश्रुतीनि प्रातिपदिकानि प्राग्विराम-विविक्तोभयप्रकारसाधारणाऽन्त्यविच्छेदकतया समुह्य निर्दिश्यन्ते, तय. **अघ॒,घा॒-**, **१अज॒,जा॒-**, **अज्ञान॒,ना॒-** ।

४. इवर्णोवर्णान्यतराऽन्तानि प्रातिपदिकान्यपि नान्तरीयोक्तपूर्वयाऽवर्णान्तपरया दिशैव निर्दिश्यन्ते, तय. **अ॒राति, ती*-**, **अभि-दिप्सु॒,प्सू॒-**, **अवस्यु॒,स्यू॒-** ।

५. उक्तपूर्वव्यतिरिक्तानि सर्वाण्यपराणि स्त्रीलिङ्गकानि प्रातिपदिकानि यथास्वाऽनुगताऽस्त्रीपरकपूर्वरूपीय-स्तम्भापेक्षयैकया मात्रया व्यवहिते स्तम्भान्तरे तत्तद्रूपसुवारसंभेदनिवृत्त्यर्थं पृथग् निर्दिश्यन्ते। एतानि तावत् प्रविभज्य किंचित् सूच्येरन्—

(अ) यान्याकारान्तानि सन्त्यर्थतश्च योगतश्च विशिष्टानि स्युः, तय. **अघा॒-**, **अषाढा॒-**।

---

[1] मूआ. परिभाषया त्वेतद् दीर्घत्वं यथायोगम् **अर्**, **इर्**, **उर्** इत्येतदन्यतममूलकं भवति (तु. भू. ४, १, ञ, ५, अ उउ.)।

(आ) यानि दीर्घेकारान्तानि सन्त्यकार-हलन्यतरान्ताऽस्त्रीपरकपूर्वरूपाणि स्युः, तय. **अ-देव- > अ-देवी-, अ-सत्- > अ-सती-, अर्किन्- > अर्किणी-** ।

(इ) यानि दीर्घेकारान्तानि सन्ति भिन्नस्वर-ह्रस्वेकारान्त-मौलिकपूर्वरूपाणि स्युः, तय. **अक्षि- > अक्षी-, अङ्गुलि- > अङ्गुली-, अर्षणि- > अर्षणी-** ।

(ई) यानि दीर्घेकारान्तान्यभिन्नस्वर-ह्रस्वेकारान्त-मौलिकपूर्वरूपाणि सन्त्यन्यथा कथञ्चित् सुवेचानि स्युः, तय. **अरुणि- > १अरुणी-** ।

(उ) यानि दीर्घेकारान्तानि सन्त्यृकारान्ताऽस्त्रीपरकपूर्वरूपाणि स्युः, तय. **अवितृ- > अवित्री-, अनु-ष्ठातृ- > अनुष्ठात्री-** ।

(च) कालिकलकारार्थक-सुबर्हकृद्-निर्देशिका

क्त-क्वसु-कानच्-शतृ-शानच्-स्यतृ-स्यमानाऽन्यतमाऽन्ताः सुबर्हाः कृतः सांप्रतिकेषु कोषेष्वाख्यातिकप्रकरणे लकाररूपाऽनुपदं निर्दिश्यमानाः सन्त इह तावत् सुबर्हकृदन्तरसामान्येन यथावर्णमात्रं निर्दिश्यन्ते, तय. **अप √रुध् > अप-रुद्ध-, अप-रुध्यमान-** ।

(छ) क्रियाविशेषणंभावुक-सुबर्हप्रातिपदिक-निर्देशिका

येषां सुबर्हाणां रूपविशेषाः क्रियाविशेषणंभावुका भवन्ति, तेषां सुबर्हान्तरनिर्विशेषं निर्देशो भवति, प्रस्तुतवैशिष्ट्यं च तदीयं यथावट् टिप्पण्यते, तय. **अ-विद्वेष- > -षम्, अनु-काम- > -मम्** ।

(ज) अयौगिक-सुबर्हप्रातिपदिक-निर्देशिका

यानि निमित्तान्यादाय कानिचित् सुबर्हाणि प्रातिपदिकानि कृद्बाह्यीकृत्य स्वतन्त्रशब्दतया यथावर्णमात्रं निर्दिश्यन्ते, तानीमानि सूच्येरन् –

१. यदा कृज्जातीयस्य सुबर्हस्य प्रातिपदिकस्य व्युत्पत्तिरज्ञाता वा दुरूहा वा संदिग्धा वा मूलाऽऽर्यभाषीया सत्यप्रसिद्धा वा स्यात्, तय. **अनस्-, २अन्य-** ।

२. यदा कृत्तद्धितसमासाऽन्यतमजातीयं सुबर्हं प्रातिपदिकं वर्णविकारतो यौगिकव्यवस्थितिकतया दुरीक्षमिव संजायेत, तदेवंविधे स्वतन्त्रनिर्देशे क्रियमाणे सति समुचिता प्रतिपरामर्शिकाऽपि क्रियते, तय. **ऊति-, ऊम-, १अत्र-, २अत्र-, सुत्-, आग्नेय-, आतिथ्य-, अग्ना-विष्णु-** ।

३. यदा समासत्वेनोपकल्प्यमाने सुबर्हे प्रातिपदिकेऽवयवतः संशयो भवति, तय. **अनीक-, अभीक-, अनर्विश्-** ।

४. अथ गणतो निर्देशभाजां सुबर्हाणां प्रातिपदिकानां येऽवान्तराः प्रभेदा भवन्ति, ते प्रत्येकं प्रतिपरामर्शिकया सनाथ्यैवं स्वतन्त्रतयाऽपि निर्दिश्यन्ते, तय. **अमी-, अमु-, २अह-, अहर्-, अहस्-** ।

५. पूर्वपदतया समासान्तरमननुप्रविष्टः सन् नञ्-समासश्च प्रथमस्तम्भीयतया स्वतन्त्रं निर्दिश्यते, तय. **अ-पति-, अ-पतिघ्नी-, अ-जात-** (वैतु. **अजात-शत्रु-**) ।

(झ) विसंख्यात-सुबर्हप्रातिपदिक-निर्देशिका

१. स्वर-भेदेन श्रूयमाणानि सवर्णानि सुबर्हाणि प्रातिपदिकानि विसंख्याय निर्दिश्यन्ते, तय. **१अ-मेनि-, २अ-मेनि-, १अपस्-, २अपस्-, २अरु-णी-, ३अरु-णी-** ।

२. अथ स्वरभेदव्यतिरिक्तकारणान्तरप्रयोजिताऽर्थभेदप्रदर्शनौपयिकतयाऽपि सुबर्हप्रातिपदिक-विसंख्यानमाद्रियते, तय. **१अ॒प्-**, **२अ॒प्-**; **१अ॒-दिति-**, **२अ॒-दिति-**; **१अरति॒-**, **२अरति॒-**; **१अरत्नि॒-**, **२अरत्नि॒-**; **१अ॒सुर-**, **४अ॒-सुर-** ।

३. सवर्णाऽव्ययतः पृथक्करणाऽर्थमनपेक्षितमपि सत् क्वचिदेतद् विसंख्यानमाद्रियते, तय. **१अ॒ङ्गिरस्वत्-**, **१अ॒नु-** ।

(ञ) सौपरूप-निर्देशिका

१. सुब्योगे प्रातिपदिकस्याऽन्त्यमेकाज्मात्रं तत्पूर्ववर्तिनः प्रातिपदिकावशेषस्य संग्राहकेण सता विच्छेदकेन पुरस्कृतं सन्निर्दिश्यते, तय. **अ॒ंश- > -शः, -शम्, -शस्य** ।

२. एकाज्मात्रकाणां प्रातिपदिकानां सुब्योगीये निर्देशे तावद् विच्छेदकेन संग्राह्यस्य पूर्ववर्तिनः प्रातिपदिकांऽशस्यैवाऽभावात् तत्प्रयोजनाभावात् तत्प्रयोगाभावो भवति, तय. **स॒त्- > सत्, सन्तः, सन्तौ** ।

३. प्रातिपदिकाऽपेक्षया स्वरतो विशेषे प्रदर्शयितव्ये सत्येव सुब्योगीये निर्देशे स्वराङ्कनमाद्रियते, तय. **स॒त्- > सत॒ः, सता॒म्, सद्भ्य॒ः** ।

४. सौपानि रूपाणि संघटितपरामर्शिकासौकर्याऽनुरोधेन यथावर्णमात्रं न तु यथाव्यक्ति वा यथाविभक्ति वा निर्दिश्यन्ते, तय. **अंशु॒- > -शवः, -शवे, -शुः; अ॒ग्र,ग्रा- > -ग्रम् , -ग्रा, -ग्राः, -ग्रान्** ।

५. [1]गाणप्रातिपदिकाऽवान्तरप्रातिपदिकीयानि सौपानि रूपाणि यथोक्तपूर्वसामान्यव्यवस्थं पार्थक्येन निर्दिश्यन्ते, तय. **अदु॒स्- > अमी॒- > -मी, -मीभ्यः, -मीषाम्** ।

६. साऽऽम्रेडितानि सुब्-रूपाणि माध्यमिकविच्छेदकवन्ति सन्ति यथोक्तपूर्वसामान्यव्यवस्थं पार्थक्येन निर्दिश्यन्ते, तय. **अंशु॒- > -शुः-शुः, अ॒ंहस्- > -हसः-हसः, अग्नि॒- > -ग्निम्-ग्निम्** ।

(ट) उत्तरपदत्व-निर्देशिका

एकैककस्य सुब्-रूपीयस्य खण्डस्याऽन्ते वर्गकोष्ठेऽन्तस् तत्तत्प्रकृतप्रातिपदिकोत्तरपदाः समासाः पूर्वपदतो विमुद्रं निर्दिश्यन्ते, तय. अंशु॒- ··· [°शु- अन्°, उप°, तृप्त°] ।

४. अव्यय-प्रकरणम्

१. अव्ययमात्रं वैशेषिकसंकेतविरहितं सद् यथास्ववैशेषिकसंकेताभ्यां धातोश्च सुब्योगीयात् प्रातिपदिकाच्च सुवेचं भवति, तय. **अ॒थ, अ॒नु, √अद् > अत्त्वा॒, अ॒त्तवे; अनु √दिश्>अनु-दि॒श्य, अधरा॒त्** ।

२. व्युत्पत्तेः पारोक्ष्याद्वाऽन्यथा यतः कुतो वाऽकृज्जातीयतया प्रदर्श्यमानानि सन्त्यव्ययानि यथावर्णमात्रं स्वातन्त्र्येण निर्दिश्यन्ते, तय. **अ॒ति, २अ॒थ, २अ॒नु** ।

३. क्त्वान्त-तुमुन्नन्तप्रकारकाणि कृज्जातीयान्यव्ययानि सांप्रतिकेषु कोषेष्वाख्यात-सविषयीक्रियमाणान्यपि सन्तीह सजातैः सुब्योगीयैः कृदन्तरैः सस्तम्भीकृत्य तत्साधारण्येन यथास्ववर्णमात्रं निर्दिश्यन्ते, तय. **√अद् > अ॒त्तवे, अ॒त्तुम्, अत्त्वा॒** ।

४. अनूपचितकार्यानि सन्ति कृज्जातीयान्यव्ययानि यथास्वप्रकृतिभूताऽव्ययान्यनु मात्रयैकया व्यवहिते स्तम्भान्तरे निर्दिश्यन्ते, तय. **√ अद् > अत्त्वा॒ > अत्त्वा॒य** ।

---

[1] गणाभावेन निर्दिष्टे तद्धितो द्रष्टव्यः ।

५. यान्यव्ययानि स्वप्रकृतिभूतेभ्यः सुब्योगीयेभ्यः प्रातिपदिकेभ्यः स्वरूपतो नाऽतिविप्रकृष्टानि स्युः, तानि तदुपरि तदवान्तरप्रातिपदिकतया पृथङ् निर्दिश्यन्ते, तय. **अ॒धर-** > **अधरा॒त्** ।

६. समासाऽवयवतां प्रपन्नानामव्ययानां विषय एते विशेषा अवधेया भवन्ति—

(क) तत्तदव्ययपूर्वपदतया विशिष्टानां धातूनां च प्रातिपदिकानां च तत्तदव्ययाऽनधीनतया यथास्ववर्णमात्रं निर्देशा भवन्ति, तय. **अनु√१पत्**, **अ॒नु-पथ-**, **अभि√रुह्**, **अभि॒-रूप-** ।

(ख) मूलतः समासाऽवयवभूतानि सन्ति प्रतीकगतत्वेन पृथगिव श्रूयमाणान्यव्ययानि यथोक्तपूर्वसामान्यव्यवस्थं वर्तुलकोष्ठेऽन्तः प्रदर्शितैः सद्भिर् मौलिकैरुत्तरपदैः सनाथ्य निर्दिश्यन्ते (तु. भू. ४, २, ग, १४, ङ), तय. **अभी**(भि√ई) > **अभि॒**(ईमहे) ।

(ग) यदा समस्तस्य कृज्जातीयस्याऽव्ययस्योपसर्गांशो मूले व्यवहित इव श्रूयते, तदा तस्य निर्देशः ϕ इत्येतेन संकेतेन पुरस्क्रियते (तु. भू. ४, २, ग १४, ग), तय. **अभि-समे**(म्-आ√इ) > ϕ**अभि-समे॒त्य** ।

(घ) मूलत उत्तरपदविधया समासाऽवयवतां भजदपि सद् निहतंभावुकमव्ययं यथास्ववर्णमात्रं स्वातन्त्र्येण निर्दिश्यते[1], तय. **इव**, **उ**, **च**, **चित्** ।

(ङ) यदा तूक्तपूर्वं निहतंभावुकमव्ययमव्ययान्तरस्याऽन्ते श्रूयते, तदा तद् यथासामान्यव्यवस्थं समासाङ्गभूतमेव निर्दिश्यते, तय. **अ॒थ** > **अ॒थो** ।

(च) एवं सत्यपि यदा तु निहतंभावुकमव्ययमुपसर्गभावुकस्याऽव्ययान्तरस्याऽन्ते श्रूयते, तदा तत् ततो व्यवच्छिद्य पृथगेव निर्दिश्यते येनोपसर्गोपसृष्टसंबन्धोऽव्यवहित इव प्रतीयेत, तय. **अपे**(प√इ) > **अ॒प**(एतु) < **अ॒पो**(एतु), **अप√म्यक्ष्** > **अ॒प···म्यक्ष** < **अ॒पो···म्यक्ष**, **अपे**(प√ई)**ज्** > **अ॒प···अ॒पेजते** < **अपो···अ॒पेजते** ।

७. अव्ययानां विसंख्यानेऽयं वक्ष्यमाणो निमित्तोद्देशोऽवधेयः —

(क) यदा तानि सस्वर-निःस्वरोभयथा श्रूयन्ते, तय. **१क॒म्** , **२कम्**, **१य॒था**, **२यथा** ।

(ख) यदा वैशेषिकसंकेतस्य पर्याप्तौ सत्यामपि सवर्णात् सतः सुब्योगीयात् प्रातिपदिकाद् व्यवच्छेदविशेषोऽभिप्रेतो भवति[2], तय. **२अ॒नु**, **२अभि॒**, **३अ॒व** ।

८. समस्तानामव्ययानां यथासामान्यप्राप्ति द्वेधा निर्देशो भवति । यथास्ववर्णमात्रं च पूर्वपदीयप्रतिपरामर्शिकासहकृतं यथोत्तरपदनिर्देशं च, तय. **सम**(म्√ऋ)**र्धि** > **समर्धयित्वा** इति च **अर्धयित्वा सम्°** इति च ।

५. स्वर-प्रकरणम्

(क) आधारग्रन्थीयं स्वराङ्कनम्

यथोपलम्भमेतद्ग्रन्थप्रकृतविभागीयाऽऽधारग्रन्थानां मध्ये सप्तसु तावत् सामग्र्येण स्वरोऽङ्कितो भवति । त एत ऋग्वेदो माध्यन्दिन-यजुर्वेदः काण्व-यजुर्वेदस्तैत्तिरीय-यजुर्वेदो मैत्रायणीय-यजुर्वेदः कौथुम-सामवेदः शौनकीया-

---

[1] एतान्यव्ययानि सर्वाणि तैत्तिरीये पदपाठे, पदपाठान्तरेषु च इव-व्यतिरिक्तानि, पृथक्-पदतया पठ्यन्ते।

[2] उपरितनखण्डात् प्रभृत्ययं नियमोऽन्यथासिद्धायमानो द्रष्टव्यः (तु. भू. ४, १, ३, भ, ३)

ऽथर्ववेदश्च सन्ति। अपरेषां मध्ये तु खिलसूक्तेष्वंशतः काठक-यजुर्वेदे च क्वचित् क्वचित् स्वराङ्कनमुपलभ्यते। कपिष्ठल-कठ-यजुर्वेदस्य जैमिनीय-सामवेदस्य चाऽद्यावधि निःस्वरमेव संस्करणमभूत्।

(ख) रेखीयो गम्यः प्रकारः

१. ऋग्वेदे तैत्तिरीय-यजुर्वेदे चोदात्तो नाम मुख्यः स्वरः स्वतोऽनङ्कितः सन्नन्यतोऽधोरेखितप्रागनुदात्ततोऽन्यतश्चोर्ध्वदण्डित-स्वरितितोत्तराऽनुदात्ततो विज्ञप्तो भवति, तय. अग्नये। स्वरितोत्तरवर्त्यनुदात्तमात्रमप्याऽधोरेखितोदात्त-स्वरितान्यतरोदयानुदात्तमनङ्कितं भवति, तय. अग्निमीळे पुरोहितम् (ऋ १, १, १) इत्यत्र पु° इत्येतद्वैपरीत्येन °ळे इति। अस्य खलु स्वरितोत्तरस्याऽनङ्कितस्य सतोऽनुदात्तस्योदात्ततयाऽऽभासो मा भूदित्यर्थं स्वरितस्य च तदुपरितनस्योदात्तस्य च मध्ये संकेतविशेषौ स्थाप्येते। तथाहि। यदा स्वरितो ह्रस्वो भवति, तदा १ इति, यदा चाऽसौ दीर्घस्तदा तस्मिन् स्वयमप्यधोरेखिते सति ३ इति, तय. अप्स्व१न्तः (ऋ १, २३, १९), क्वे३दानीम् (ऋ १, ३५, ७)। उदात्त-स्वरितान्यतरोदयोऽनुदात्तोऽधोरेखितो भवतीति सूचितमिवाऽधस्तात्, तय. अग्निम्, कन्या। मन्त्राऽर्धादौ वा वाक्यादौ वा वर्तमानमनुदात्तमात्रमङ्कितं भवति, तय. अनुकामम् (ऋ १, १७, ३)।

२. अयमङ्कनप्रकारः शौनकीयाऽथर्ववेदे माध्यन्दिन-यजुर्वेदे काण्व-यजुर्वेदे यथामूलकोशं कपिष्ठलकठ-यजुर्वेदे चाऽपि लब्धप्रचारोऽभूत्। एवमपि तावद् उदात्ताऽनुदात्तयोर्विषये सामान्ये सत्यपि स्वरितस्य विषये सन्त्येव बाह्वृचतैत्तिरीयेतरग्रन्थीयाः केचिद् विशेषाः, तथाहि—

(अ) शौनकीयेऽथर्ववेदे स्वरितादुपरि ʃ इति संकेतो भवति, तय. वीर्यंʃम्, सर्वा ह्यʃस्मिन् (११, ८, ३२), ज्येष्ठवरोʃऽभवत् (११, ८, १)। उदात्तादुपरितनः स्वरितस्तु बाह्वृचवत् साधारणेनोर्ध्वदण्डेनैव संकेत्यते, तय. तं व्यूर्णुवन्तु सूतवे (१, ११, २)। उदात्ते परतो ह्रस्वात् स्वरितादूर्ध्वदण्डितात् सत उपरि १ इति संकेतो भवति, तय. अप्स्व१न्तः (१, ४, ४)। तस्यैव दीर्घस्य सतस्तु संकेतो बाह्वृचनिर्विशेषो भवति, तय. विकेश्यो३ विघ्नताम् (१, २८, ४)।

(आ) माध्यन्दिन-यजुर्वेदे ⌞ इत्येतेनाधो-दीर्घहस्तकेन स्वरितः साधारण्येन संकेत्यते, तय. द्विवीव (६, ५), वीर्यमसि (१९, ९), आस्येन (२, ११)। उदात्ते परतस्त्वसावधस्त्रिशूलकेन संकेत्यते, तय. वीर्यं मयि (१९, ९), अप्स्वन्तः (९, ६), योऽस्मान् (१, २६)। यदा तावत् स्वरितोदात्तयोर्मध्ये विरामो व्यवधत्ते, तदाऽधोदीर्घहस्तकस्यैवोत्सर्गो भवति, तय. वरूथ्यः। वसुः (३, २५)। यजुरादौ वाऽर्धर्चादौ वा वर्तमानश्चोदात्तादुपरितनभूतश्च स्वरितस्तु साधारणेनोर्ध्वदण्डेनैव संकेत्यते, तय. त्र्यम्बकं यजामहे (३, ६०), अव देवं त्र्यम्बकम् (३, ५८), उर्व्या व्यद्यौत् (१२, १)।

(इ) काण्व-यजुर्वेद उदात्ते परतः स्वरितमात्रमधोरेख्यत इत्येव विशेषः[1], तय. अप्स्वन्तः (१०, २, ३), योऽस्मान् (१, ९, ४). प्रसवेऽश्विनोः (१, ३, ६)।

(ई) कपिष्ठलकठ-यजुर्वेदेऽन्यथा सर्वथा काण्व-यजुर्वेदेन स-प्रक्रिय एव वर्तमान उदात्तोदयोऽधोरेख्यमाणो ह्रस्वस्वरितो दीर्घतामप्यापाद्यत इत्यस्त्येवाऽणीयान् विशेषः, तय. उर्वान्तरिक्षम् (१, २), अप्स्वान्तः (४८, ४)।

---

[1] अस्मदीये मूलकोषे माध्यन्दिनप्रकारीयः संभेदोऽपि लक्ष्यते। एतच्छाखीयत्वेनाऽनुदात्तभूमिस्वरितीयस्याऽधोवर्तुलकस्योपलम्भोऽपि परैः सूचितो भवति (तु. ZDMG ४९, १५१)।

(ग) संख्याङ्कीयः सिद्धः प्रकारः

सामवेदे मूर्धन्यसंख्याऽऽत्मको विभिन्नः किल सिद्धः प्रकारः प्रवर्तते। एतदीया मुख्या विशेषा इमे सन्ति[1]—

१. सामान्येनोदात्तस्वरितानुदात्ता यथाक्रमं मूर्धन्यस्थितिभिः १, २, ३ इत्येताभिः संख्याभिः ससंकेता भवन्ति, तय. अ^{३}ग्नि^{१} वे^{२}ः (१, २१)।

२. परंपरिताऽनेकोदात्तमध्ये प्रथम एव लब्धसंकेतो भवति, तय. आ^{१} तु (१, १६७), सं^{३}पाहि^{१} तद् आ (१, २०७), न^{१} हि (१, २४१)।

३. आवसानिक उदात्तः १ इत्यस्य स्थाने २ इत्यनेन संकेत्यते, तय. व^{३}य^{२}म् (१, १४)।

४. आवसानिकपरंपरिताऽनेकोदात्तमध्ये प्रथम एव नान्तरीयोक्तपूर्वया दिशैव च संकेत्यते, तय. म^{३}हाँ^{२} हि षः (२, ९६), उ^{३}ते^{२} द्याम् (२, १५६), ना^{२}न्यं त्वत् (२, ३३४)।

५. अनुदात्तव्यवहितयोरुदात्तयोर्मध्ये प्रथमः २ इत्यनेन संकेत्यते, तय. अ^{२}ग्न^{३} आ^{१} या^{२}हि (२, १०)।

६. यदा परंपरिताऽनेकोदात्ताऽनुग उदात्तोदयोऽनुदात्तो भवति, तदा परंपरितप्रथम उदात्तः २उ इत्येवं संकेत्यते, परश्च १ इत्येवम्, तय. शं^{२उ}योर^{३}भि^{१} (१, ३३), व^{३}ना^{२उ} त्वं यन्मा^{३}तृ^{१}ः (१, ५३)।

७. परंपरितानेकोदात्ताऽनुगः स्वरितः २ इत्यस्य स्थाने २र इत्येवं संकेत्यते, तय. नि^{१} होता^{२र} (१, १), नि^{१}र्गा अक्र^{२र}न्तत् (१, ५८५)।

८. यदा उदात्तभूमिः स्वरित आवसानिको वाऽनुदात्तोदयो वा भवति, तदाऽसौ २र इत्येवं संकेत्यते, तय. उ^{३क}क्थ्य^{२र}म् (२, १११६), मनु^{३क}ष्ये^{२र}भिः (१, ७९), नी^{२र}व (२, १००६), दे^{३क२}व्ये^{२र}तु (१, ५६)।

९. उदात्तोदय उदात्तभूमिः स्वरितः २ इत्येवं संकेत्यते प्लुतिं चाऽऽपाद्यते, तय. पा^{३}ह्यू^{२}३ते^{२} द्वि^{३}ती^{१}ये^{२}या (१, ३६), अ^{३}भ्या^{२}३दि^{२}शः^{३} सू^{१}रः^{२} (१, १२८)।

१०. उदात्त-स्वरिताऽन्यतरोदयपरंपरिताऽनेकाऽनुदात्तमध्ये चरम एव संकेत्यते, तय. स^{३}मु^{१}द्रम्, इन्द्रा^{३}भ्या^{२}३दि^{२}श^{३}ः (१, १२८)।

११. स्वरितस्याऽनुगतया वर्तमानमनुदात्तमात्रं न संकेत्यते, तय. चि^{३}त्रं^{१} राधो^{२र} अमर्त्य (१, ४०)।

१२. आवसानिकाऽनुदात्तोदयान्यतरस्वरितोदयोऽनुदात्तः ३क इत्येवं संकेत्यते (इह तु. अधस्तनम् ८मीयमुदाहरणम्)।

(घ) प्रथमः प्राक्तनो रेखीयः सिद्धः प्रकारः

अथ यो मुख्यस्योदात्त-स्वरस्य साक्षादिव संकेततः सिद्धंभावुकः प्राक्तनो रेखीयः प्रकारो मैत्रायणीय-यजुर्वेदे, काठक-यजुर्वेदे, पैप्पलादाऽथर्ववेदे चोपलभ्यते, स एवात्र संगृह्यते—

१. मैत्रायणीय-यजुर्वेदे काठक-यजुर्वेदे चोदात्त ऊर्ध्वदण्डयते, तय. अग्निः।

२. उदात्तभूमेः स्वरितस्य कृते चोभयत्राऽधोभुग्नकः ∟ इति सामान्यः संकेतो भवति, तय. दिवीव (मै १, २, १४), व्यसृपः (काठ ७, १२), शुण्ठोऽधि° (मै २, ६, १३), क्व।

---

[1] उदाहरणीयस्थलसंकेताः कौथुमसामवेदीया भवन्ति।

[2] Sch. त्वियमधोरेखा न प्राऽयोजि। अत एवेहाऽप्युदाहरणान्तरेष्वेतदप्रयोगो द्रष्टव्यः।

३. मैत्रायणीय-यजुर्वेदे सन्नतरो[१]ऽधोरेख्यते (तय. **अ॒ग्नि॑-**), काठक-यजुर्वेदे चासावधोदण्डेन संकेत्यते, तय. **अ॒ग्नि॑-** ।

४. उदात्तोदयस्य स्वरितस्य विषयेऽपि चैतयोः शाखयोर्मध्ये भवत्येव कियानपि वि-संवादः । तथाहि । मैत्रायणीयाः ३ इत्यङ्कं ततः पुरस्तात् प्रयुञ्जते, कठाश्च तं स्वरितमेव काण्वसाधारण्येनाऽधोरेखयन्ति[२], तय. **प्र॑सु॒३वे॒-ऽश्वि॑नोः** (मै १, २, १५), वैतु. **प्रसवे॒ऽश्वि॑नोः** (काठ. २, ९) ।

५. स्वरितीयह्रस्व-दीर्घ-भेदप्रयोजितस्तु नेहोभयत्र कोऽप्यवान्तरविशेषो भवति ।

६. मैत्रायणीया अनुदात्तभूमेः स्वरितस्य कृते सामान्येन तिरोरेखां प्रयुञ्जते, तय. **धि॒यः** ।

७. सन्नतरोदयत्वे त्वस्याऽनुदात्तभूमेः स्वरितस्य कृते त ऊर्ध्वत्रिपुण्ड्रकं प्रयुञ्जते[३], तय. **प्र॑थ॒मः॑**, **प्र॑सु॒३वे॒-ऽश्वि॑नोः** (मै १, २, १५) ।

८. कठा अनुदात्तभूमेः स्वरितस्य कृते सामान्येनाऽधोबिन्दुना निर्वाहं पश्यन्ति[४], तय. **धि॒यः** ।

९. पैप्पलादाऽथर्ववेदेऽप्युदात्तीय ऊर्ध्वदण्डः प्रयुज्यते सन्नतरश्च काठक-यजुर्वेदवदधोदण्डेन संकेत्यते च, तय. दा॒ता॑ ।

१०. यत्तत्राऽनुदात्तभूमिः स्वरितोऽधोबिन्दुना सनाथ्यते तदपि काठकेन सामान्यमावहति, तय. **का॑मः॒** ।

११. माध्यन्दिन-यजुर्वेद-सामान्येन च मैत्रायणीय-काठकयजुर्वेद-भेदेन च तत्रोदात्तभूमिः स्वरितः साधारण्येनाऽधोदीर्घहस्तकेन द्योत्यते, तय. **न्य॒क्**, **शर॒व्या॒ या॑** (१४, २, ७), **त॒न्वा॒ शंत॑मया** (१४, २, ८) ।

१२. स्वरितादुपरितनस्योदात्तस्य यथावदूर्ध्वदण्डग्रहात् तस्य स्वरितस्य कृते विशिष्टतरं संकेतान्तरं नाऽपेक्ष्यते ।

१३. स्वरितादुपरितनस्याऽनुदात्तस्य त्वनुदात्तभूमिस्वरितवदुपचार इष्यते यावताऽसावधोबिन्दुना सनाथ्यते, तय. **आ॒स्या॒य** (१६, १०४, ६) ।

(ङ) द्वितीयः प्राक्तनो रेखीयः सिद्धः प्रकारः

काण्व-माध्यदिनीययोः शतपथ-ब्राह्मणयोः केषुचिद् ग्रन्थान्तरेषु (तु. C. काशब्रा. भू. पृ. ९) चाऽपरः खलु रेखीयः सिद्धः प्रकारो लब्धप्रतिष्ठो भवति । इमे तावदेतदीया विशेषा भवन्ति—

१. अत्रोदात्तोऽधोरेख्यते[५] ऽनुदात्तश्चाऽनुदात्तभूमिः स्वरितश्च नाऽङ्क्येते, तय. **अग्नि॒ना** ।

२. उदात्तोदय उदात्तो नाऽङ्क्यते, तय. **केतपूः के॒तम्** (५, १, १, १६)[६] ।

---

[१] सन्नतरो नामोदात्तस्वरितान्यतरोदयोऽनुदात्तः प्रसिद्धो द्रष्टव्यः ।

[२] Sch. त्वस्या अधोरेखायाः स्थान ऊर्ध्वबुध्नितं **काकपदकं** (∧) प्रयुङ्क्ते ।

[३] मैत्रायणीयानां पदपाठ उक्तपूर्वो बाह्वृचः प्रकारो लब्धप्रतिष्ठोऽभूदित्यपरो विशेषोऽप्यत्र वैचित्र्यैक-वृद्धिकरो भवति ।

[४] Sch. अनुदात्तभूमिं स्वरितं नैव संकेतयति । सात. तु मूलोक्तस्थितिद्वयनिर्वाहाय यक्र. अधो-हस्तकं (∟) चाऽधस्त्रिशूलकं (ω) च प्रयुङ्क्ते ।

[५] तु. C. काशब्रा. भू. पृ. ९ यत्र भाषिकस्वरस्य स्वरूपत आलोचनायां प्रवृत्तायां पुरातन उदात्तः कालेनाऽनुदात्ततां गत इत्यभिप्रायः परकीयो वादः प्रत्युक्तो भवति ।

[६] एतत्खण्डोदाहरणीयस्थलसंकेताः माशब्रा. द्र. ।

३. परंपरितानां सतां बहूनामुदात्तानां मध्ये चरम एवाङ्क्यते, तय. **अग्निर्हि वै धूर्॒थ** (१, १, २, ९)।

४. उदात्तभूमि-स्वरितस्य संकेतार्थं तदुदयमक्षरमधोरेख्यते[1], तय. **वी॒र्यम्** ।

५. एवं तावदुदात्तभूमि-स्वरितोदयेऽक्षर उदात्ते सति तदीयाऽधोरेखा तस्य चोपरितनस्य स्वरितस्य च समानं ग्राहिका भवति । एवं च स्थिते तदुदयमुदात्तान्तरं चेद् भवति, तर्हि तन्नाङ्क्यते, तय. **यज्ञो वै॒ स्वः** (१, १, २, २१), **मानुषं ने॒द् व्यृद्धम्** (१, ७, २, ९), वैतु. **इ॒ति॒ सैषा** (१, ४, १, २६) यत्र तिकारोऽनुदात्तः सन्नात्मोदयोदात्तिकारीयाऽधोरेखाया अन्यथासाधने प्रयोजको न भवति ।

६. उदात्त-स्वरिताऽन्यतरोदयस्य स्वरितस्य तूक्तपूर्वः संकेतो न व्याहन्यते, तय. **यज्ञो वै॒ स्वर॒ुहः** (१, १, २, २१), **देवा वै॒ स्वर॒गन्म** (१, ९, ३, १४), **इति॒ सै॒षैतम्** (१, ४, १, २६)।

७. कण्डिका-ब्राह्मणान्यतराऽवसानीय उदात्तः कण्डिका-ब्राह्मणान्यतराऽऽद्य उदात्ते परतस्त्रिभिरधोबिन्दुभिः संकेत्यते[2], तय. **देव᳟त्रा ॥ स॒ः** (५, १, ४, ७ उ)।

८. उदात्तो वाऽनुदात्तो वाप्यावसानिकः सन् स्वरिते परत एवमधोबिन्दुत्रिकेण संकेत्यते, तय. **इ॒᳟ति ॥ तेऽविदुः** (३, ४, ३, ७ उ), **प्रतिप्रस्था᳟ता॒ ॥ सोऽध्व॰** (४, २, १, १३ उ)।

९. यदाऽऽवसानिकस्याऽपि सतोऽक्षरस्य परेणाऽक्षरेण संहिते पाठे सति स्वरितः संभवति, तदा तदुदयस्योपान्त्यस्याऽक्षरस्यैवमधोबिन्दुत्रयेण संकेतो भवति, तय. **ए॒व᳟। एत॒त्** (३, ४, २, १३)।

१०. अङ्कितस्य सत उदात्तस्याऽनुनासिकतां प्राप्तावनुनासिकचिह्नमप्यधोरेख्यते, **शत॒ꣳ॒-शतꣳ ह** (३, ४, ३, १८); वैतु. **यज्ञꣳ स॒मभरन्** (३, १, ४, ४) ।

(च) एतत्कोषीयो रेखीयः सिद्धः प्रकारः

१. एवं तावद् यत्र कुत्रचित् किंचित् सामान्यमपि बिभ्राणेषु प्रायेण त्वन्योन्यं नितरामिव विशिष्यमाणेष्वेव पुरातनेषु बहुषु स्वराङ्कनप्रकारेषु विद्यमानेष्वपि कथमिव सर्वशाखीयसौवरस्थितिर् नाम केनाऽपि शाखासर्वस्वसाधारणतां भजमानेन सता प्रकारविशेषेण युगपदेव हस्तामलकीक्रियेतेत्येवमभिप्राया खलु प्रक्रियमाणस्य सतोऽस्य समस्तवैदिकवाङ्मयस्य प्रातिनिध्यमिव कुर्वाणस्य चैतिहासिकदृष्ट्या तदीयतुलनात्मकाऽध्ययनमधिकृत्यौपयिकतां बिभ्राणस्य च कोषस्य बलवत्यपेक्षाऽभूत् ।

२. अस्याश्चाऽपेक्षायाः पूर्त्यर्थं यः सम्यग् विचारितः सन् पुराणानां प्रकाराणां सारायमाण इव प्रकारविशेषोऽत्र लब्धप्रवेशो भवति, स सर्वेषां प्रेक्षकाणां प्रकाममभिमतः सन् सुकरत्वाच्च सुग्रहत्वाच्चाऽपि सर्वत्र भविष्यति प्रकाशमेष्यत्सु वैदिकग्रन्थीयसंस्करणेषु चरितार्थ्येत ।

३. अस्मिंस्तावत् प्रकारेऽनुदात्तमात्रमनङ्कितं भवति । अनुदात्तो ह्युदात्ताऽभावस्य संज्ञा भवति । अस्य नीचैस्त्वं नामाऽऽपेक्षिको धर्मो भवति । उदात्त एव किल मौलिक आर्यभाषीयः स्वरो भवति । तदपेक्षयाऽनुदात्तो नीचैरुच्चार्यते । यदाऽयमुदात्तोदयो भवति, तदा भूयोऽपि नीचैर्गत इव लक्ष्यमाणः सन् सन्नतर इत्युच्यते । यदा चायमुदात्ताऽनुगो भवति, तदाऽस्मिन् सोपानक्रमिकस्य स्वतः स्वराऽवरोहस्य लक्ष्यमाणत्वादाद्यंशत उदात्तधर्मतायाः समावेश इव भवति, तेन चाऽयं समाहाररूपः सन् स्वरित इत्युच्यते । छायारूपस्त्वयं भवति । न ह्यस्या-

---

[1] web. अत्राऽधोरेखाद्वयं प्रयुक्तं द्र. ।

[2] web. तावदेषा स्थितिर्द्वाभ्यामधोबिन्दुत्रिकाभ्यां संकेत्यते।

ऽनुदात्तभूमेः सतः क्वाऽपि प्रागुदात्तस्वतन्त्रा सती प्रातिस्विकी स्थितिर्भवति । तथा ह्युदात्तान्तरोदयत्वे सत्ययमनुदात्त एव सन् सन्नतरतामुपगतोऽनुदात्त एव पुनर्भवति । एवं तावच् शुद्धो वा सन्नतर-स्वरिताऽन्यतरत्वोपाधिको वाऽनुदात्तः पूर्वोक्तरान्यतरपार्श्ववर्तिनः सन्नतर-च्छायास्वरिताऽन्यतरव्यवहितस्य वा नान्तरीयतया स्थितस्य वोदात्तस्यैव स्थितिलक्षकमात्रतामनुप्राप्तः संस्तदीयाऽङ्कनत एव स्वतःसिद्धविज्ञप्तिकयथायोगविभिन्नोक्तपूर्वावान्तरस्वरूप इति कृत्वैव नैतदीयाऽन्यथासिद्धाङ्कनगौरवमिहाऽऽद्रियते ।

४. यदधस्तादुदात्तो मौलिकस्वर इति कृत्वाऽङ्कनार्हत्वेन प्रत्यपादि, तत्र खलूदात्तभूमेः सतोऽभिनिहित-प्रश्लिष्ट-क्षैप्र-जात्याऽन्यतमत्वेन प्रातिस्विकस्थितिमतो वास्तविकस्य स्वरितस्याप्यङ्कनार्हत्वस्य समावेशोऽभिप्रेतो भवति[1]। एवं तावदुदात्तश्चोदात्तभूमिः स्वरितश्च द्वावेव स्वराविह पार्थक्येनाऽङ्कनमर्हत इति कृत्वा पुरातनानामुक्तपूर्वाणां संकेतानामेव मध्याद् ऋग्वेदे, तैत्तिरीय-यजुर्वेदे, तैत्तिरीय-ब्राह्मणे, तैत्तिरीयाऽऽरण्यके, तैत्तिरीयोपनिषदि, काण्व-यजुर्वेदे, कपिष्ठल-कठ-यजुर्वेदे चैकान्तिकतया, माध्यन्दिन-यजुर्वेदे, शौनकीयाऽथर्ववेदे च यथास्वोक्तपूर्वप्रक्रियं पर्याप्ततया, स्वरितसंकेतत्वेन प्रयुक्तपूर्वत्वादूर्ध्वदण्डः (=अ॑) एव चोदात्तभूमिस्वरितस्य, शातपथप्रसिद्धिरधोरेखा (=अ॒) चोदात्तस्य संकेतौ निर्धारितौ भवतः[2] ।

५. ये चैतद्ग्रन्थीय-स्वराङ्कनीया व्यावहारिका विशेषा भवन्ति, त इमे संगृह्योल्लिख्यन्ते—

(क) अगतिका वा सगतिका वा मूलधातवश्च, क्विब्-णिजन्यतरान्ता नामधातवश्च तदीयविभिन्नस्वराणां सतां रूपाणामसंभिन्नं संकेतनं सुकरं स्यादिति स्वरतो नाङ्क्यन्ते, तय. **√१अक्ष्, √२अक्ष्, अति√मुच्, अख्खली√कृ, √अव् > √ओम्, अ॒न्त- >√अन्ति ।**

(ख) नामधात्वन्तराणि तु स्वरतः संकेत्यन्ते (तु. भू. ४, २, क, ७, अ), तय. अ॒घ->**√अघा॒य्** ।

(ग) तिङन्तानि रूपाणि स्वरतः संकेत्यन्ते, तय. **√१अक्ष् >अक्ष्णुते॒** ।

(घ) संनिहितपदान्तरनिमित्तप्रयोजितनिघातानि तिङ्-रूपाणि स्वरतो न संकेत्यन्ते[3], तय. **√१अक्ष् >अक्ष्णुयात् ।**

(ङ) अनङ्कितस्वर-संस्करणेभ्यो ग्रन्थेभ्यः संगृहीतानि सन्ति तिङ्-रूपाणि तदीयशब्दान्तरसामान्येनाऽनङ्कितान्येव ध्रियन्ते, तय. **√अज् >अजामसि, अजन् ।**

(च) यदाऽङ्किताऽनङ्कित-स्वरेभ्य उभयेभ्यो ग्रन्थेभ्यस्तिङ्-रूपाणि संगृह्यन्ते, तदाऽनङ्कितस्वर-ग्रन्थीयानि तिङ्-रूपाणि यथाऽङ्कितस्वरग्रन्थीयस्वरवच्छ्रुति[4] निर्दिश्यन्ते, तय. अनु **√ध्व(ध्वं)स्>अनुदध्वसे॒** ।

(छ) अङ्कितस्वर-ग्रन्थीयं सुब्योगीयं वाऽव्ययं वा कृन्मात्रं स्वरवद् निर्दिश्यते, तय. **√अत्>अ॒तत्-अ॒तिथि-, √अद्>अ॒त्तवे, अ॒त्तुम् ।**

(ज) अनङ्कितस्वर-ग्रन्थीयः कृद् निःस्वरं निर्दिश्यते, तय. **अग्नि-मेदिन्–, अग्नि-यानी-** ।

---

[1] मूलतो जात्य-क्षैप्रयोरभेदो द्रष्टव्यः (तु. पृपृ. ४२७^j, ५३७^l, ५३८^p) ।

[2] तस्मिंस्तस्मिन् पुराणे वा नूतने वा सौवरे संकेते प्रतिनियतायाः स्वरविशेषसंकेतनविषयीयाः स्वाभाविक्याः शक्तेरभावाद् यथासमयं शक्तिविशेष उपाधीयत एव ।

[3] अस्य ग्रन्थस्य यथाश्रुतानुक्रमणस्वरूपताया एतदीयलक्षणशास्त्रस्वरूपताऽतिरेकित्वादित्यभिप्रायः ।

[4] अपि तानि स्वरतो वस्तुतस्तथा स्युर्न वा स्युरित्यस्य तत्तन्मूलीयवाक्यस्वतन्त्रविचाराधीनत्वादस्मिन् विषयेऽत्रत्यो निर्देशोऽप्रमाणं भवति ।

(झ) अङ्किताऽनङ्कितस्वरेभ्य उभयेभ्यो ग्रन्थेभ्यः संगृह्यमाणः कृद् यथास्वरवद्ग्रन्थीयश्रुति निर्दिश्यते[1], तय. अंशु- ।

(ञ) व्युत्पत्त्यौपयिकतयोपकल्पितानां कृतां स्वरनिर्देश औपकल्पनिको भवति, तय. *अन्तः(<र्)-पर्शु- ।

(ट) यदा व्युत्पादनप्रयोजितः सन् स्वर उपकल्पनाया विषयो भवति, तदा स्वरवदक्षरं स-तारकं निर्दिश्यते, तय. अच्छँरा-, अष्ट्रा-दंष्ट्रँ - ।

(ठ) यदौपकल्पनिकस्य सतः कृतो विषये सौवरी स्थितिर्दुर्विनिगमना भवति, तदाऽसौ निःस्वरं निर्दिश्यते, तय. √अद् > अद्णार->आद्णार- ।

(ड) निघातमात्रवन्ति सर्वनामानि निःस्वरं निर्दिश्यन्ते, तय. अस्मद्-> २*अँ(>न्)-, *ई-, *सी-, एन-, सम-, त्व- ।

(ढ) निहताऽनिहतोभय-प्रयोगवन्ति सर्वनामान्युभयथा पृथग् निर्दिश्यन्ते, तय. इदम्-> ३अ-, ४अ-; अस्मद्-> १मय्-, २मय्- ।

(ण) अलुक्-समासे पूर्वपदायमानानि चाऽत्रान्तरप्रातिपदिकीक्रियमाणानि च सन्ति सुब्-रूपाणि निःस्वरं निर्दिश्यन्ते, तय. अग्र->अग्रे ।

(त) द्वैस्वर्येण श्रूयमाणाः समासास्तथैव निर्दिश्यन्ते, तय. बृहस्पति-, वनस्पति-, अग्नी-वरुण- ।

(थ) यथाप्रातिस्विकप्रातिपदिकस्वरवन्ति सुब्-रूपाणि निःस्वरं निर्दिश्यन्ते, तय. अंहस्->-हसः (=अंहसः) ।

(द) हल्पूर्वोदात्तयण्भाव-प्रयोजितः[2] सुब्-उदात्तो न निर्दिश्यते, तय. ऊति>-त्या(=ऊत्या) ।

(ध) यदा सुपि परत उदात्तयोर् इवर्णोवर्णयोः स्थानेऽन्यतः अय् इति वा इय् इति वाऽन्यतश्च अव् इति वा उव् इति वा भवतः, तदा सुब्-रूपं निःस्वरं निर्दिश्यते, तय. अग्नि->-ग्नयः (=अग्नयः), धी-> धियः (=धियः), अंशु-> -शवः (=अंशवः), अग्रू-> -ग्रुवः (=अग्रुवः) ।

(न) उदात्तयणभाव-प्रयोजितः सुप्-स्वरितो यथावद् निर्दिश्यते, तय. १अरुणी->ण्यः, अश्वतरी->-र्यः ।

(प) यदा प्रातिपदिकनिघात-प्रयोजकः सुप्-स्वरः प्रवर्तते, तदाऽसौ यथावद् निर्दिश्यते, तय. अघायुत्->-यते, १अप्-> अपः, २अप्-> अद्भिः ।

(फ) उदात्तनिवृत्तिप्रयुक्तः सुप्-स्वरो यथावद् निर्दिश्यते[3], तय. असन्->-स्नः, अस्थन्->-स्थ्नः ।

(ब) आद्युदात्त-निघातोभयविधमामन्त्रितं पदं स्वीयसंकेतविशेषभूत-वर्तुलकीयाया अधोरेखाया भावाऽभावाभ्यां यथायोगं विविच्य निर्दिश्यते, तय. १अक्ष->-०क्ष, २अक्ष->-०क्षाः,आदित्य->-०त्य ।

(भ) निःस्वरं निर्दिश्यमानानि प्रातिपदिकान्यनुबध्नन्ति सुब्-रूपाणि कैमुतिकेनैव निःस्वरं निर्दिश्यन्ते, तय. अ-कृतपूर्व- > -र्वम्, अस्मद्- > (*अँद्>* अँ>) न्- >नौ, नः ।

---

[1] अप्यस्वरवद्ग्रन्थीयोऽनेकाच् कृद् वस्तुतो यथानिर्दिष्टस्वरो भिन्नस्वरो वेत्यत्राऽयं निर्देशोऽनैकान्तिको भवति ।

[2] वैतु. पृ. ५८८^{b} (तु. उपरिष्टात् फ च) ।

[3] तु. पृ. ५८८^{b} यदन्वधस्ताद् (द) इत्यत्र प्रत्तमुदाहरणमप्यस्यैव नियमस्य विषयो भवति ।

(म) साम्रेडितानां सुब्-रूपाणां नियताऽऽम्रेडितांशनिघातानां सतां निर्देश उक्तपूर्वसुब्रूपीयनिर्देश-सामान्यमेव बिभर्त्ति, तय. **अंशु->-शुः-शुः** (=**अंशुः-अंशुः**)।

(य) अव्यय-मात्रं यथास्वरश्रुति निर्दिश्यते, तय. **अनु**, **अभि**, **एतवै**।

(र) सस्वरनिःस्वरोभयविधश्रुतिकमव्ययं यथायथं पार्थक्येन निर्दिश्यते, तय. **१कम्**, **२कम्**, **१यथा**, **२यथा**।

(ल) निहतमात्रस्वरूपमव्ययं तथैव निर्दिश्यते, तय. **इव** (तु. भू. ४, ४, च, ४), **उ**, **घ**।

(व) सस्वरनिःस्वरोभयविधश्रुतिकं समासाङ्गंभावुकमव्ययं यथायथं विविच्य निर्दिश्यते, तय. **अति-√पू>अतिपवते, अतिपवते, अप√गु(>गू)ह्>अप-गूळ्ह-, अप-गूहमान-**।

६. स्थल-प्रकरणम्

१. प्रतितिङन्तसुबन्ताऽव्ययनिर्देशाऽनुपदं यथाश्रुति समग्राणि स्थलानि निर्दिश्यन्ते। तत्र तत्तद्-ग्रन्थोद्देशतस्तावदयं निर्देशक्रमो भवति—

(क) **ऋग्वेदे**—१. ऋ., २. खि.।
(ख) **यजुर्वेदे**—१. मा., २. का.,
३. तै., ४. मै.,
५. काठ., ६. क.।
(ग) **सामवेदे**—१. कौ., २. जै.।
(घ) **अथर्ववेदे**—१. शौ., २. पै.।

२. प्रत्युपस्थिते स्थलनिर्देशे प्रथमं तावद् यथाऽपेक्षं ग्रन्थनाम्नः संक्षेपो दीयते। तदनु नान्तरीयतया ग्रन्थीयप्रधानाऽवान्तरविभागप्रदर्शिकाः संख्या दीयन्ते। आसां च मध्ये या प्रथमा भवति सा प्रधानविभागीया भवति, अवान्तरविभागीयास्त्वितरा यास्ततश्चाऽन्योन्यं च प्रार्धविरामेण व्यवच्छिद्यन्ते। संख्यानामन्ते च विरामो दीयते, तय. **अकन्तः** पै १, ४३, २.

३. यदा स्थलविशेषनिर्देशमनु स्थलान्तरीयो निर्देशः क्रियते, तदा ययोः कयोरपि द्वयोः स्थलाङ्कनमात्रयोर्मध्येऽर्धविरामो दीयते, तय. **अंहस्->-हः** ऋ १, ४२, १; २, २३, ४; **अंशु->-शून्** शौ ५, २०, १०; पै….

४. ग्रन्थविशेषीयाऽनेकस्थलानामङ्कन उपस्थिते सति प्रथमायामेव तदीयमात्रायां सर्वास्तत्तद्विभागीयाः संख्या दीयन्ते। उत्तरासु तु तदीयमात्रासु समानाः सतीः प्रधान-मध्यमविभागीयाः संख्या नावर्त्य याश्चरम-विभागीयाः सत्यो विभिन्नाः संख्याः स्युस्ता एव निर्दिश्यन्ते, तय. **अक्ष्णया** तै ५, २, ७, ५^{१}; १०, ४; ५; ३, ५, ३^{२}; < ५, २, ७, ५^{२}; ५, २, १०, ४; ५, २, १०, ५; ५, ३, ५, ३^{२};

५. अनेकेषां परंपरितानां स्थलानां निर्देश उपस्थिते सति प्रथमचरमयोः सतोः स्थलयोरेव निर्देशः क्रियते, तन्मध्ये विच्छेदकश्च दीयते, तय. **अग्नि->-ग्निम्** काठ १६, ८-११; १९, ३^{२}-५^{१}.

६. यदि क्वचिद् मध्यमानां संख्यानामपि विषय उक्तपूर्वप्रकारकं पारंपर्यं निर्देश्यं भवति, तर्हि तासां मध्याद् अप्येवं प्रथमचरमयोः सत्योरेव निर्देशः क्रियते, तन्मध्ये च विच्छेदको दीयते, तय. **अंहस्->-हसः** शौ ४, २३-२९, १-७.

७. यथा रूपविशेषीयाणां स्थलनिर्देशानामन्योऽन्यमर्धविरामेण व्यवच्छेदो भवति, तथैव विभिन्नरूपीयाणां स्थलसंख्याङ्कव्यूहानामन्योऽन्यमर्धविरामेण व्यवच्छेदः क्रियते, चरमरूपीयचरमस्थलीयसंख्याङ्कादूर्ध्वं च विरामो दीयते, तय. **अंशु- > -शवः**····; **-शवे**···; **-शोः**····; **३**, १२, ४.

८. रूपविशेषाणां सस्थलानां सतां प्रथमं परंपरितो निर्देशो भवति, तदनु च तत्साधारणस्थलीयाः संख्या दीयन्ते, तय. **अति**^{४}(चर), (अति) **चर** पै **३**, ३३, ६; **अत्याशित- > -तस्य, -तेन** मै **३**, ६, २.

९. यदा रूपविशेषस्य स्थलविशेषीया विशेषसंख्याकाऽऽवृत्तिः सूचनीया भवति, तदा तदङ्कः स्थलाङ्कशीर्षण्यतया निर्दिश्यते, तय. **अंहूरण- > -णम्** काठ **१०**, ९^{२}; **अग्नि- > -ग्ने** काठ **१८**, ३^{३}; ४^{८}; १६^{१५}.

१०. तत्तद्ग्रन्थीयतयाऽन्योन्यं प्रायेण भूयोविशिष्टानि सन्ति तत्तत्प्रधान-मध्यम-चरमविभागीयानि प्राक्प्रसिद्धानि मण्डलाऽध्यायप्रभृतीनि नामान्युक्तपूर्वप्रकारेणेह संख्याङ्कनमात्रेण निर्वाहसंभवादन्यथासिद्धानीति कृत्वा नोपयुज्यन्ते[१]। अयं तावत्तदीयः स्वरूपतश्च संख्यातश्च परिचयः संग्रहेणोच्यते—

(क) **ऋग्वेदेऽष्टकाऽध्याय-वर्ग-मन्त्रात्मकश्च मण्डलाऽनुवाक-सूक्त-मन्त्रात्मकश्च** चतुष्टयौ सन्तौ द्वौ विभागप्रकारौ भवतः। एतयोर्द्वितीय एव प्रसिद्धतरत्वादिहोपयुज्यते, प्रतिमण्डलं सूक्तानां परंपरितात् संख्यानादनुवाकीयनिर्देशस्याऽन्यथासिद्धत्वात् प्रतिस्थलं संख्यात्रितयस्यैवाङ्कनं च क्रियते।

(ख) **ऋग्वेद-खिलानि** सूक्त-मन्त्र-प्रविभक्ताऽध्यायपञ्चकात्मकानि भवन्ति। एत एव त्रयो विभागाश्चाऽत्र संख्याप्यन्ते। संहिताऽरण्यं च परिशिष्टं चोभे अपि द्विधा प्रविभक्ते सती यथाक्रमं षष्ठ-सप्तमाऽध्यायतयाऽङ्क्येते। द्वितीय-तृतीय-चतुर्थेष्वध्यायेषु सन्ति कतिचित् सूक्तानि यानि पृथङ् मन्त्रप्रविभक्त-खण्डद्वयात्मकानि भवन्ति। तदीयस्थलाङ्कन उपस्थिते सति सूक्ताङ्कीयशीर्षण्यभूतेन **२** इत्यङ्केन द्वितीयखण्डीयताया विवेकेन परामर्शो भवति, तय. **√ १अस् > असि** खि **४**, ७^{२}, १^{२}। एवं पञ्चमाध्यायीयसप्तमसूक्तस्थ-खण्डपञ्चकस्य विविक्तः परामर्शः सूक्त-मन्त्राङ्कमध्यीयतया धृतेन सताऽङ्कविशेषेण क्रियते[२], तय. **अदिति- > -तेः** खि **५**, ७, १, २.

(ग) **माध्यन्दिन-यजुर्वेदो** मन्त्रप्रविभक्तचत्वारिंशदध्यायात्मकः सन् संख्याद्वयेन परामृष्टविभागद्वितयो भवति।

(घ) **काण्व-यजुर्वेदस्य** दशकाऽध्यायाऽनुवाक-मन्त्रात्मकश्चतुर्व्यूढो विभागश्चत्वारिंशतोऽप्यध्यायानां माध्यन्दिन-यजुर्वेदवत् परंपरितसंख्यापनेन त्रिव्यूढः सन् संख्यात्रयेण परामृष्टो भवति[३]।

(ङ) **तैत्तिरीय-यजुर्वेदीयो** विभागः काण्ड-प्रपाठकाऽनुवाक-खण्डात्मकतया चतुर्व्यूढः सन् चतुर्धा संख्याप्याङ्क्यते[४]।

(च) **मैत्रायणीय-यजुर्वेदः** प्रपाठक-खण्ड-प्रविभक्ताऽध्यायचतुष्टयात्मकः सन् संख्यात्रयेण परामृष्टत्रिव्यूढविभागो भवति।

---

[१] तत्तद्ग्रन्थीय-तत्तद्विभागीय-पुष्पिकीयाणां निर्देशानां स्थलाङ्कन उपस्थिते सति यथायोगं केवलाद् ग्रन्थनाम्नो वा विभागविशेष-सहकृतग्रन्थनाम्नो वोपरि **पुष्पि.** इति संक्षेपो दीयते, तय. तु. **इठिमिका-, ओरिमिका-**।

[२] एतद्ग्रन्थीय-प्रकृतखण्डादग्रतस्तावदस्य सूक्तमन्त्राङ्क-मध्यीयाङ्कस्य सूक्ताङ्कीय-शीर्षण्यतयैव स्थितिः संपादयिष्यमाणा द्रष्टव्या।

[३] एतद्ग्रन्थीयसामग्रीसंकलनात् पश्चात् प्रकाशं नीयमाने सात. प्रत्यध्यायं मन्त्राणां परंपरितपाठेनाऽनुवाकीयो विभागोऽप्यन्यथासिद्ध इव क्रियते।

[४] **मैसू.** त्रुटितपाठत्वात् तदीयः खण्डपरंपरितेन त्रिव्यूढोऽपि सन् विभाग इह नाऽनुस्रियते।

(छ) **काठक-चरक-यजुर्वेदः** खण्डप्रविभक्त-स्थानकात्मकतया व्यूढः सन् संख्याद्वयेन परामृष्टो भवति। आश्वमेधिकपरिशिष्टीयास्त्रयोदश प्रधानविभागा अपि स्थानकीकृत्य च चत्वारिंशता स्थानकैः परंपरयित्वा च परामृश्यन्ते। एवं तावत् संकलितानि सन्ति स्थानकानि त्रिपञ्चाशत्संख्याकानि संपद्यन्ते[1]।

(ज) **कपिष्ठल-कठ-यजुर्वेदे**ऽष्टकाऽध्याय-खण्डात्मकतया त्रिव्यूढो विभागोऽध्यायपरंपरितेना[2]ऽन्यथासिद्धीभूताऽष्टकविवेकः सन् संख्याद्वयेनैवेह परामृष्टो भवति[3]। चत्वारिंशोऽध्यायोऽखण्डप्रविभक्तः सन्नेकखण्डात्मकतया सर्वत्र १ इत्येतेन खण्डाङ्केन सहैव निर्दिश्यते।

(झ) **कौथुमसामवेदे** प्रथमं तावद् द्वौ विभागौ भवतः। पूर्वार्चिकं चोत्तरार्चिकं च। आरण्य-काण्डं वाऽऽरण्य-संहिता वेति च महानाम्न्यार्चिकमिति च पूर्वार्चिकाऽनुगता परिशिष्टद्वयी भवति। पूर्वोत्तरार्चिकयोः प्रपाठकाऽर्ध-दशति-मन्त्रात्मकश्चतुर्व्यूढो विभागो भवति। पूर्वार्चिकीया षट्-प्रपाठकी प्रतिप्रपाठकयुगलं काण्डव्यवहारेण त्रिकाण्ड्यपि भवति। प्रपाठकानां परंपरितेनाऽन्यथासिद्धस्त्वयं काण्ड-विभागो भवति। यत्तूत्तरार्चिके दशतेः स्थाने सूक्तं व्यवह्रियते तत्तदवान्तरविभागविशेषीय-संज्ञामात्रीयविशेषत्वान्न विशिष्यते। अस्ति तावदुभयमुख्यविभागसाधारणोऽध्याय-खण्ड-मन्त्रात्मकस्त्रिव्यूढोऽपरोऽपि विभाग-प्रकारः। अस्मिंश्च प्रकार आरण्य-काण्डस्यापि षष्ठाऽध्यायात्मकतया व्यवहारो भवति। अपि चोत्तरार्चिके क्वचित् खण्ड मन्त्रयोर्मध्यगामितया सूक्तविभागोऽप्युपलभ्यते। इह तावदुक्तपूर्वयोः प्रकारयोः कतरेणचनापि विभागे सति परामर्शिका नितान्तं दुष्करा भवतीति कृत्वा च BC. इत्यत आंशिकं संकेतं गृहीत्वा च पूर्वोत्तरार्चिके यथाक्रमम् १ इति २ इति च संख्याप्य परामृश्येते च, तदुभयीया मन्त्राश्च माध्यमिकविभागाऽन्यथासिद्धयर्थं पृथक्-परंपराभ्यां संवल्यन्ते च। अनया दिशोभयार्चिकीयस्थलाङ्कनं द्वाभ्यां द्वाभ्यां संख्याभ्यां साध्यते। एवमारण्य-काण्डम् ३ इत्येवं महानाम्न्यार्चिकं च ४ इत्येवं परामृश्येते। आरण्य-काण्डे दशति-खण्डाऽन्यतरनामको मध्यमो मन्त्रगणात्मको विभागो भवतीति कृत्वा तदीयं स्थलाङ्कनं संख्यात्रिकेण संपाद्यते। मध्यमस्य कस्यचिद् विभागस्याभावाद् महानाम्न्यार्चिकीयं स्थलाङ्कनं तावद् द्वाभ्यां संख्याभ्यामेव क्रियते[4]।

(ञ) **जैमिनीय-सामवेदे** पूर्वार्चिकमिति प्रथमः, आरण्यं च महानाम्न्यश्चेत्युभयात्मको द्वितीयः, ऊहगानमिति तृतीयः, उह्यगानमिति चतुर्थः, इत्येवं चत्वारो मुख्या विभागाः सन्तः प्रत्येकं खण्ड-मन्त्रात्मकतया द्विधा प्रविभक्ता भवन्ति। एतदीयं स्थलाङ्कनं च त्रिभिः संख्याभिरभिनिर्वर्त्यते। पूर्वार्चिकीयः खण्डगणात्मकपर्वरूपोऽवान्तरविभागश्चैवं तद्गतद्वितीयपर्वगतोपपर्वप्रकारकोऽपरोऽवान्तरविभागश्च मुख्यविभागान्तरत्रिकवत् खण्डपरंपरितेनाऽन्यथासिद्धाविव क्रियेते[5]।

---

[1] मुख्यानां चत्वारिंशत्-स्थानकानां मूलत **इठिमिका** (< ***त्रिथिमिका** = ***प्रथमिका**), **मध्यमिका**, **ओरिमिका** (<***अवरिमिका** = ***अवरमिका**), **याज्यानुवाक्याश्चे**त्येवं ग्रन्थचतुष्कतोऽपि विभाग आसीदित्यत्र तत्तद्ग्रन्थसंकेतवत्यः स्थानकीयाः पुष्पिका द्रष्टव्याः।

[2] भावे क्तान्तं पदं द्रष्टव्यम्।

[3] काण्ड-प्रपाठक-खण्डात्मकोऽपि विभागोऽस्यां शाखायां कदाचिदादरं लेभ इत्यत्रैतदीयमूलकोशीयं साक्ष्यं भवति।

[4] इहत्यस्य च मुद्रितसंस्करणमात्रीयस्य च स्थलाङ्कनप्रकारसर्वस्व संवादनार्थं तु. आचि. १.

[5] र. पुरातनविभागीयः प्रकारश्चेहाऽनुस्रियमाणः प्रकारश्चोभावपि प्रदर्शितचरौ भवतः।

(ट) **शौनकीयाऽथर्ववेदे** द्वौ विभागप्रकारौ प्रवर्तेते। काण्ड-सूक्त-मन्त्रात्मकस्त्रिव्यूढश्च प्रकारः काण्ड-प्रपाठकाऽनुवाक-मन्त्रात्मकश्चतुर्व्यूढश्च प्रकारः। एतयोर्मध्ये प्रथम एव तावदिहानुवर्त्यमानः सन् संख्यात्रिकेण द्योत्यते[1]।

(ठ) **पैप्पलादाऽथर्ववेदे** च द्वौ विभागप्रकारौ प्रवर्तेते। काण्ड-सूक्त-मन्त्रात्मकस्त्रिव्यूढश्च काण्डाऽनुवाक-[2]खण्ड-मन्त्रात्मकश्चतुर्व्यूढश्च। एतयोर्मध्ये तावत् प्रथम एवेहानुवर्त्यमानः सन् संख्यात्रयेणाऽङ्क्यते। यत्र क्वचिच्च (तु. ३, ३७) सूक्तानि मन्त्रतोऽविभक्तानि भवन्ति, तत्र तान्येकमन्त्रात्मकानीति कृत्वा १ इत्येतन्मन्त्रस्थानीयाऽङ्कप्रदानेन संख्यात्रयेणैवाऽङ्क्यन्ते। एवमविविक्तमन्त्रविभागस्थलीयाङ्कन उपस्थिते सति विच्छेदकव्यवहितयोः सतोर्द्वयोर्मुद्रितसंस्करणीययोरङ्कयोर्मध्याद् द्वितीयो विच्छेदकदक्षिणपार्श्वीयोऽङ्क एवेह प्रदर्श्यते (तु. ९, १२, ६-७)।

७. संकेत-प्रकरणम्

इह तावद् निर्देशस्य समूढ्यर्थं वैशद्यार्थं वा ये केचन संकेताः प्रायुक्षत, त इमे भवन्ति—

१. √ इति **धातुकः**[3] प्रातिस्विकचिह्नतया धातुमात्रेण पुरस्क्रियते, तय. √१अंह्।

२. √- इति स-विच्छेदको धातुकः प्रकरणत आक्षेप्याऽऽख्यातांशानामुपसर्गाणामुपरिष्टात् प्रयुज्यते, तय. **अति√-**।

३. – इति **विच्छेदकः** प्रातिपदिकमात्रान्ते प्रत्तः संस्तदीयसुब्योगीयतामुपदर्शयति। शब्दमात्रीयाक्षरविशेषस्याऽधस्ताद् दीयमानश्चायं धर्मान्तरमिव बिभ्राणः संस्तत्रोदात्तस्य व्यवस्थितिं सूचयति।

४. - **इत्यर्धविच्छेदकः** प्रातिपदिकादुपरि नान्तरीयतया निर्दिश्यमानात् संक्षिप्तात् सतो रूपविशेषात् पुरस्तात् प्रत्तः संस्तदीयाद्यंशस्य पूरयितव्यतामुपक्षिपति, तय. **अग्नि->-भिः**, वैतु.**–भिम्**। अयं समासेऽवग्रहत्वेनाऽपि प्रयुज्यते, तय. **अग्रे-गु-**।

५. । **इत्यूर्ध्वदण्डो** वर्णमूर्ध्नि दीयमानः सन् शब्दविशेषीयैकस्वरस्य सतः स्वरितस्य व्यवस्थितिं प्रदिशति, तय. **अ-कुध्र्यञ्च्-**।

६. = इति **संतोलः** स्वतः प्राग्वर्तमानस्य सतः स्वत उत्तरवर्त्तिना सता तुल्यत्वं सूचयति, तय. 'तया गत्या' (=तेन प्रकारेण), पृ. ११२^{b}।

७. + इति **योजकः** प्रकृतिप्रत्ययीयं वा समासावयवीयं वा योगं संकेतयति, तय. **√जन्+डः** (पृ. ३२^{o}), **६अ+*श्वथ-** (पृ. ४९९^{m})।

८. → **इत्यभिपुङ्खः** स्वतः प्राग्वर्तिनः सतः स्वोत्तरवर्त्यात्मकतया परिणामं संकेतयति, तय. **अंशो-**(र→)रा-।

९. > **इत्यभिकोणः** = →, तय. २अभि>**भी**।

१०. ← इति **प्रतिपुङ्खः** स्वत उत्तरवर्तिनः सतः स्वप्राग्वर्त्यात्मकतया परिणामं संकेतयति, तय. **६अ←नञ्**।

---

[1] WR. शंपां. इत्येतयोः क्वाचित्कस्थलाङ्कनभेदवतोः सतोः संवादनार्थं तु. आचि. २।

[2] मूलकोषे **खण्ड->*कण्ड->काण्ड** इति काश्मीरवाचनिकप्रवृत्तिसुलभविकारमध्योऽपपाठो द्रष्टव्यः।

[3] धातुं संकेतयतीत्यभिप्रायपरस्तद्धितो भवति। एवमुपर्यपि तत्तत्संकेतसंज्ञात्वेन प्रयुज्यमानाः शब्दविशेषा यथावद् बोद्धव्याः।

११. < इति **प्रतिकोणः** = ←, तय. **अन्तः(<र्)-कोश-**

१२. < > इति **कोणयुगं** स्वतः पूर्वोत्तरवर्तिनोरन्योन्यप्रकृतिविकृत्यन्यतरभावं संकेतयति, तय. **अनुडुह् < >धुँ-** (पृ. १६५^{b}) ।

१३. ऽ इति **वक्रकं** संहिताविषय उत्तरवर्तिनोऽकारस्य पूर्ववर्तिनि सांहितिक आकार एकार ओकारे वाऽन्तर्भावं संकेतयति, तय. वाऽन्यस्य (पृ. १३^{f}); स्वरेऽविशेषः (पृ. ४^{b}); भूरिविमृश्योऽयम् (पृ. १३^{f}) ।

१४. ऽऽ इति **द्विवक्रकमुत्तरवर्तिन** आकारस्य पूर्ववर्तिनि सांहितिक आकारेऽन्तर्भावं संकेतयति, तय. पञ्चम्यर्थस्याऽऽकाङ्क्षितत्वात् (पृ. ५^{f}); °कर्मताऽऽपद्येत (पृ. ७५^{a}) ।

१५. (ऽ) इति कोष्ठितं **वक्रकमुत्तरवर्तिनो**ऽकारस्य पूर्ववर्तिनि पूर्वरूपैकादेशात्मकेऽकारेऽन्तर्भावं संकेतयति, तय. **अग्रँ(ऽ)यण-** ।

१६. , इति **प्रार्ध-विरामो** यत्र तत्र शाब्दिके वा स्थलीये वा निर्देशे यथापेक्षं लघिष्ठव्यवच्छेदकत्वेन प्रयुज्यते, तय. **√१अस्, अस्ति; अँनस्(>ड्, ळ्)√१वह्; अध, अधा; अन्त,न्ता-; अनु,>नू-याज-** ।

१७. ; इत्यर्ध-**विराम** एकैकस्याः स्थलाङ्कनमात्राया व्यवच्छेदकतया प्रयुज्यते, तय. **अंश- > -शः ऋ** २, १, ४; २७, १.

१८. . इति **विराम** एकैकस्य पदसंग्राहकनिर्देशखण्डस्य च समासाभिमुखे संक्षेपान्तरे वा स्थलाङ्के वा परतोऽसत्येकैकस्य संक्षेपस्य चाऽवसाने व्यवच्छेदकतया प्रयुज्यते, तय. **अनु√दिश्,**······१०५., **अंश-**····१७. । **पा.** (वैतु. पाभे.) इति च, **अंश- > -शः ऋ २,** १, ४ (वैतु. ऋ.) इति च ।

१९. ‘ ’ इति शीर्षण्यं **प्रार्धविराम-प्रतियुगं** स्वमध्यगतस्य प्रायेणेतिकारेणाऽनुगतस्य सतः पाठस्य ग्रन्थान्तरीयोद्धारात्मकतां संकेतयति, तय. **‘कृत्योक-’** (पृ. ८^{g}) ।

२०. ० इति **वर्तुलकं** शीर्षण्यतया प्रयोगतः पूर्वोत्तरस्थित्यनुक्रमेणाऽधस्तनीं चोपरितनीं च पूरयितव्यतां संकेतयति, तय., **अंशु- °शु- अन्°** (= **अनंशु-**), **°वामीरनु°** (= **अग्ने वामीरनु संदृशि** पृ. २०१^{c}) । इदमेव च **वर्तुलकं** यदाऽर्धविच्छेदकस्य च संक्षिप्तस्य सतः सुब्रूपस्य च मध्ये दीयते, तदा तस्य रूपस्याऽऽमन्त्रितभावः सूच्यते, तय. **अंशु- > -०शो, अग्नि- > -०ग्ने** ।

२१. * इति **तारका** यस्योपरि धृता भवति, तस्यौपकल्पनिकत्वं संकेतयति । तत्र ये विशेषा भवन्ति, त इमे सन्ति—

(क) वामपार्श्वतः शीर्षण्या सतीयं शब्दविशेषस्य तदर्थविशेषस्य वोक्तपूर्वं स्वरूपमाचष्टे, तय. **√*अप्, √१अस् ***हिंसायाम् ।

(ख) सस्वरस्याऽक्षरविशेषस्योपरि धृता सतीयं तस्य स्वरस्योक्तपूर्वं स्वरूपमाचष्टे, तय. **अप्सर-द्रुँ-, अँ-संयाज्य-** ।

(ग) आवसानिक-**विच्छेदकस्योपरि** धृता सतीयं तत्प्रतियोगिनः सुब्योगीयताया उक्तपूर्वं स्वरूपमाचष्टे, तय. **अन्तर्-*** ।

(घ) अवग्रहस्योपरि धृता सतीयं तस्योक्तपूर्वं स्वरूपमाचष्टे, तय. **अन्तरिँक्ष-** ।

२२. ? इति **प्रश्नकः** शब्द[1]-रूप[2]-ग्रन्थनामसंक्षेपाऽन्यतमीयाद् निर्देशात् पुरस्ताच्च स्थलाङ्कनिर्देशमात्राया उपरिष्टाच्चोपचर्यमाणो यथास्थितस्य तत्तन्निर्देशस्य विषये सामान्यतो वा तत्तद्विशेषतो वा दुरूहता-सांशयिकताऽध्यवसेयकल्पतादिप्रकारकमर्थं संकेतयति । येष्वेतद्विषयभूतेषु तावदस्योपचारो भवति, तानीमानि संगृह्येरन्—

(क) पाठ-स्वरूपे, तय. ?**अ-कल्याणी-**, **अक्षी-** > **- क्ष्यौ** पै ६, ६, १? ।

(ख) वर्ण-स्वरूपे, तय. ?**अंहारि-** ।

(ग) तात्पर्य-स्वरूपे, तय. ?**अकन्त-** ।

(घ) अवग्रह-स्थितौ, तय. ?**अप्-सर्-** ।

(ङ) व्युत्पत्ति-स्वरूपे, तय. ?**३अयं-** ।

(च) उपकल्पना-स्वरूपे; तय. ?√***अराय्** ।

(छ) स्वर-स्वरूपे, तय. **अष्टौ मै ४,** २, १४? ।

एवं टिप्पणेषु चायं व्यु. मूपा. इत्यादितस् तत्तद्विषयीयात् संक्षेपादुपरि ध्रियमाणस्तत्र तत्र निर्णयाभावं सूचयति ।

२३. ϕ इति संकेतः कृतः पुरस्तादुपचर्यमाणस्तस्य व्यवहितोपसृष्टत्वं भवतीति च स्थलाङ्कीयमात्राविशेषादुपरि ध्रियमाणश्च तत्रैव स्थले व्यवहितोपसृष्टत्वं भवतीति च संकेतयति, तय. ϕ **अप-शोशुचत्-**, **अप-घ्नत्-** > **-घ्नन्** ऋ ८, ४३, २६ϕ.

२४. ‡ इति संकेतः शब्द-रूप-ग्रन्थनामसंक्षेपान्यतमीयाद् निर्देशात पुरस्तादुपचर्यमाणस्तदधिकृतायाः पाठस्थितेर् नित्यं टिप्पणितस्थलस्य सतो बाह्वृचादिग्रन्थान्तरीयश्रुतिविशेषस्याऽपेक्षया भिन्नाऽऽत्मकतां संकेतयति, तय. **अ-जर-** > ‡**-रस्य** । स्थलविशेषीयपाठस्थितेरेवंप्रकारतायां सूचयितव्यायां सत्यां तु संकेतोऽयं तत्तत्स्थलाङ्काऽवसानतः क्रियते, तय. **अग्नि-मत्-** >**-मान्** काठ **२३, ११** ‡ ।

२५. † इति संकेतः शब्द-तद्रूपाऽन्यतरीयनिर्देशविशेषात् पुरस्तादुपचर्यमाणस्तद्गतः श्रुतिसामान्यस्य बाह्वृचमूलकतां सूचयति, तय. †**अज्म-**, **अज्मन्-**>†**-ज्म** । यदा तु निर्देशविशेषस्य श्रुतिविशेषीयतयैवैवंप्रकारकता सूचयितव्या भवति, तदा तच्छ्रुतिविशेषीयव्याप्तिमात्रानुपाततोऽयं संकेतः स्थलाङ्कीयमात्राविशेषात् पुरस्ताद्वोपरिष्टाद्वोपचर्यते, तय. **अच्युत-च्युत्-** > **-च्युत् शौ २०,** ३४, ९† । यदा चाऽपि निर्देशविशेषस्य श्रुतिविशेषीयाऽऽवृत्तिबहुत्वविषयत्वे सति क्वाचित्कतयैवैवंप्रकारकता सूचयितव्या भवति, तदा शीर्षण्यावृत्तिसूचकसंख्यावतः स्थलाङ्कविशेषादनन्तरं यावदावृत्त्येवंप्रकारकता सूचयितव्या भवति, तावदावृत्तिसूचकशीर्षण्यसंख्यायुतोऽयं संकेत उपचर्यते, तय. **अस्मद्-** >***न्-** > **-नः** मै **४,** १४, ९$^{१३;३}$ †^{६} ।

२६. ¶ इति संकेतः शब्द-तद्रूपान्यतरीयनिर्देशविशेषात् पुरस्तादुपचर्यमाणस्तस्य कृष्णयजुर्वेदविशेषीयब्राह्मणभागीयतां सूचयति । यदा च निर्देशविशेषस्य श्रुतिविशेषीयतयैवैवंप्रकारकता सूचयितव्या भवति, तदाऽयं संकेतस्तच्छ्रुतिव्याप्तिमात्रानुपाततः पुरस्ताद्वोपरिष्टाद्वा प्रयुज्यते, तय. ¶**अपि√सृज्**, **अव√पद्**> ¶**अवपद्यन्ते**, **२अरण्य-**>**-ण्यम्** मै¶ १, ९, ७···· । यदा तु निर्देशविशेषस्य स्थलविशेषीयाऽऽवृत्तिबहुत्वे

---

[1] धातूनां च व्ययाऽव्ययोभयविधानां प्रातिपदिकानां चैषा सामान्यसंज्ञा द्रष्टव्या ।

[2] तिङन्तं वा सुबन्तं वा तत्तत् पदमिह यथास्वप्रकृतिभूतशब्दापेक्षया तत्तद् रूपमित्युच्यते ।

[3] अन्यथासिद्धोऽयमर्धविराम इति कृत्वा प्रकृतखण्डादूर्ध्वमस्याऽप्रयोगो भवति ।

सति क्वाचित्कतयैवैवंप्रकारकता सूचयितव्या भवति, तदाऽऽवृत्तिसंख्याशिरस्कात् सतः स्थलविशेषीयादङ्कादनन्तरमेवंप्रकारकतापर्यायसंख्याशिरस्कतयाऽयं संकेतो ध्रियते, तय. **अधि मै ४, ४, ५**^{२} ;[1] ¶^{१} ।

२७. \$ इति संकेतः † इत्यस्य च ¶ इत्यस्य चोक्तपूर्वप्रकारेण प्रवर्तमाने विषयोत्सर्गे रूपस्थलविशेषाऽन्यतराऽपेक्षयाऽपवादभावं सूचयति, तय. **अ-तन्द्र- > -\$**^{२}**न्द्रम्**. ¶**अनायतन- > -नः \$शौ···**, **अपराह्ण- > -¶ह्णे···पै १०, ६, ७\$.**

२८. पृथक्कारेण वैशद्यमुद्दिश्येह प्रयुज्यमानानां त्रयाणां **कोष्ठकानां** तावदयं विषयविभागो भवति—

[c]) षतस. सामान्यः समास-स्वरः (पा **६**, १, २२३) । '**राजदन्तादिषु**' (पा **२**, २, ३१) इति जिह्वायाः परप्रयोगो ह्रस्वश्च (पा **१**, २, ४७) ।

[d]) बस. पूपप्रस्व. (पा **६**,२,१) । उप. √नी+स्त्रियां **क्तिन्** (पा **३**, ३, ९४) णत्वं च ।

[e]) **आद्यादेराकृतिगणत्वात् तसिः** प्रत्ययस्तत्स्वरश्च (पावा **५**, ४, ४४; पा **३**, १, ३) ।

[f]) शोधोन्मुखस्य w. एवाऽयं पा. द्र. । '**ग्रसते**' इति सा. प्र३(?) पठति तथा च व्याचष्टे । तथा-पाठी पाण्डु. तु ग्र॒सत्->ग्र॒सते इतीव पिपाठयिषति । साधीयांश्चाऽयमूहः प्रतीयते । w. शोधस्याऽप्रामाणिकत्वाच्च '**पुरा॒**' इत्यस्य श्रवणादनन्तरं तत्पर्यायभूतस्यास्य पुनरुक्तमात्रत्वापादनाच्चोपेक्ष्यत्वं भवति । यदपि सा. १रूपे ३रूपम् इति बभ्राम तेन तद्वचसोऽप्यप्रामाण्यमापतति ।

[g]) उस. । उप. (<√इ+कर्मणि ल्युट्) लित्-स्वरः **प्रकृत्या** (पा **६**,१,१९३;२,१३९) । **शकन्ध्वादेर्** आकृतिगणत्वात् पररूपत्वं (पावा **६**, १, ९४) णत्वं च (पा ८,४,३) । अथवा कस. । उप. भावे प्र.द्र. । अस्मिन् पक्षे °ण॒- इत्येवं प्राति. अन्तोदात्तं द्र. (पा **६**,१,२२३) । असंज्ञाविषयत्वाद् णत्वं चापीह उसं. । कल्पद्वये समानमपि सत् पररूपत्वं शाखाविशेषनिघ्नं द्र. । तथाहि यावदुपलब्धि मा. का. तै. च तद् भवति मै. काठ. क. च न भवति (तु. **आग्रयण॒- आग्रायण॒-** इति च) ।

[h]) नापूटिदि. प्रथमे कल्पे स्वार्थिकः **अण्** प्र. उसं. (तु भा. तै **१**, ४, १०, १) । द्वितीये च कल्पे '**ज्योत्स्नादिभ्यः**' (पावा **५**, २, १०३) इति **मत्वर्थे अण्** द्र. (तु. वाच.) । उभयथापि प्रत्ययस्वरत्वेनाऽन्तोदात्तत्वं समानमिति दिक् ।

[i]) भावे **त्वः** प्रत्ययः (पा **५**, १, ११६) तत्स्वरश्च ।

[j]) बस. पूपप्रस्व. (पा **६**, २, १) । उप. यद्र. ।

[k]) कारकोपपदे √या+**वनिप्** प्रत्ययः । पित्त्वान्निघाते कृत्-स्वरः प्रकृत्या भवति (यक्र. पा **३**, २, ७४; १, ४; **६**, १, १६२; २, १३६) ।

[l]) **मतुप्** प्रत्ययः । पित्त्वान्निघाते स्वरेऽभेदः । स्त्रियां **ङीप्** (पा **५**, २, ९४; **३**, १, ४; **४**, १, ६) ।

[m]) **शस्** प्रत्ययस् तत्-स्वरश्च (पा **५**,४,४२;**३**,१,३) ।

[n]) '**अग्रत॒ः**' इति बाह्वृचः (**१०**, ९०, ७) पाभे. द्र. ।

?अग्राग्नि[a]- -ग्निः पै १५, १२, ६.

अग्राँ*(ग्र-अ्र)द्वन्[b]- -०द्वाना ऋ ६, ६९, ६.

अग्राँ*य(न→)ण[c]-

¶आग्रायण[d]- -णः मै १, ३, १३; २, ७, १९; ११, ५; ४, ३, $२^{२}$; ५, ९; ६, १; $४^{६}$; ७, १; ४; ८, ७\$; $८^{२}$; $९^{२}$; काठ ४, ५; १६, १९\$; १८, ११; २७, $९^{९}$; १०; २८, १; ७; ९; १०; ३०, $२^{४}$; ३; क २५, ९\$; ४४, ७; ९; ४५, १; ४६, $५^{४}$; ६; -णम् मै ४, ३, $२^{२}$; ६, $४^{५}$; ९; काठ १२, $७^{२}$; २७, $९^{७}$; १०; -णस्य काठ १२, ७; २७, ९; -णात् मै २, ७, १९\$; ४, ६, ४; ७, १; ८, ९; काठ १६, १९\$; २७, ९; २८, $७^{२}$; ९; क २५, ९\$; ४४, $७^{२}$; ९; -णेन काठ ८, १; १२, $७^{३}$; क ६, ६.

¶आग्रायण-त्व[e]- -त्वम् काठ १२, ७; २७, ९.

¶आग्रायण-पात्र[f]- -त्रम् काठ २८, $१०^{२}$; क ४५, $१^{२}$.

¶आग्रायणा(ण-अ)ग्र[g]- -ग्राः काठ ३०, $२^{२}$; क ४६, $५^{२}$; -ग्रान् मै ४, ६, ४; ८, ९; काठ ३०, ३; क ४६, ६.

अग्रे[h]

†अग्रे-गु[i]- -गः ऋ ९, ८६, ४५; कौ २, ९६६; जै ४, २०, ९.

अग्रे-गा[j]- -गाः खि ५, ६, १; मा २७, ३१; का २९, ३, ३; तै १, ३, ६, १; ३, १, १०, २; मै १, २, १४; काठ ३, ३; १०, १२; २१, १४; २६, ५; क २, १०; ४१, ३; -गाम् खि ५, ७, ४, ५.

अग्रे-(गु→)गू[k]- -०गुवः मा १, १२; का १, ४, २; तै १, १,

---

[a]) संदिग्धस्थलीयः पाठो भवति।

[b]) कारकोपपदे √अद्+वनिप्। प्रत्ययस्य पित्त्वान्निघाते कृद्-उपप्रस्व. (यक्र. पा ३, २, ७५; १, ४; ६, २, १३९)। इह पदे पादादाव् आमन्त्रित-स्वरः षाँष्ठिकः द्र. (पा ६, १, १९८)। तु. 'सम्-अद्वन्-' तत्रत्यं टि. च।

[c]) इह चैतदीये नाउ. तद्धिते च सरूपप्रायाभ्यां 'अग्रँ-यण-, आग्रयण-' इत्येताभ्यां पररूपत्वाभावमात्रे विशेषः। सोऽपि शाखाविशेषनिघ्नत्वेन भवतीति तत्रैव टि. द्र.।

[d]) आग्रयण- इत्यत्र टि. गद्र.।

[e]) भावे त्वः प्रत्ययः (पा ५, १, ११६)।

[f]) षतस.। उप. यद्र.।

[g]) बस. पूर्वपदप्रकृतिस्वरः (पा ६, २, १)। उप. गद्र.।

[h]) 'अग्रे' इत्येतस्मिन्नुपपदभूते सप्तम्या अलुग् एदन्तत्वं वा निपातनाद् द्र.।

[i]) उप. √गम्+डः (पावा ३, २, ४८) इति प्रायोवादो भवति। वस्तुतस्तु 'सुपि स्थः' (पा ३, २, ४) इत्यत्र 'सुपि' इति योगविभागादाकारान्तधातुमात्रादनुपसृष्टात् सुपि के सुसाधे √गा+कः प्र. इति सुलभ ऋजीयान् पन्थाः। थाथादि-स्वरः (पा ६, २, १४४)।

[j]) सोपपदाद् √गा+विच् प्र. (पा ३, २, ७४)। यद्वा √गम्+विट् प्र. अनुनासिकस्याऽऽत्त्वम् (पा ३, २, ६७; ६, ४, ४१) इत्येवं सम्प्रदाये लब्धप्रतिष्ठं भवतीति विविञ्चन्तु विमृशः। कृद्-उपप्रस्व. चोभयत्र समानः द्र. (पा ६, १, १६२; २, १३९)।

[k]) अत्र दीर्घान्तं प्राति. इति सम्प्रदायो भवति। तथाहि। 'गमः क्वौ' (पा ६, ४, ४०) इति √गमेः क्विप्य् अनुनासिकलोप ऊङ्-आदेशः (पावा ६, ४, ४०)। यद्वा, औणादिकप्रकरणे 'भ्रमेश्च डूः' (२, ६८) इत्यनेन चकाराद् √गमेर् अपि डूः प्रत्यय इष्यते। 'अग्रे गच्छति' इति कृत्वा सेवकपरं व्याख्यानं चास्याभियुक्ता वदन्ति। तद् एवमुभयथा दीर्घान्तं प्राति. भवतीत्यविशेषः। अत्र विमर्शविशेषापेक्षैव भवति। सहोदाहृताद् 'भ्रू-' शब्दादस्य विषयविवेकात्। तथाहि। भ्रू-शब्दो नेत्रयोरुपरि विराजमानायां वालरेखायां चरितार्थो भवति नित्यस्त्रीलिङ्गश्च। 'अग्रे-गू-' शब्दस्तु यावदुपलभ्यं स्त्रियां सन्नपि विशेषणतया प्रयुक्तो भवति पदार्थविशेषवाचकश्च न भवति। तत् स्त्रीत्वमप्यस्य विशेष्यभूताऽब्-अधीनं न तु प्रातिस्विकमिति तद्विषयोऽपि भूयान् विशेषो भवति। एवंभूते यद्यपि नाद्य यावल्लिङ्गान्तरीया एतद्विशेष्यभूताः शब्दा उपलब्धास्तथापि तथाविधाः शब्दा वैदिके प्रयोगे भवेयुरित्यत्रैतच्छब्दस्वारूप्यं न कथमपि विघातकतामुपेयात्। एवं च सम्भाव्यमाने तादृशि प्रयोगे मूलतः अग्रे-गु- इति √गम् इत्यतो वा √गा इत्यतो वा डु-प्रत्ययान्तं (तु. पाउ १, ३३) निष्पन्नं प्राति. अभूत् तस्य च स्त्रियां पा ४, १, ६६ इति प्रकरण उपसंख्यानाद् ऊङ् प्रत्ययः स्यादित्यत्र विप्रतिपत्तिविशेषो नोदियादिति दिक्। अपि चात्र विषये उत्तरपदभूत '-गु-' इत्यन्ताः 'अध्रि-गु-, वनर्-गु-'-प्रभृतयः पूर्वोक्तस्यैव प्रामाण्यवैशिष्ट्यमिवादधानाः द्र.। 'अध्रि-गु-' इति पुंसीन्द्रविशेषणतया प्रायेण श्रूयते (तु. ऋ. १, ६१, १; ६, ४५, २०; ८, ७०, १) एवं तु. ऋ. ८, ६३, ११ यत्र 'जन-' इत्यनेन समानाधिकरणः श्रूयते। एवं 'वनर्-गु-' इति बाह्वृचे 'मृग-' इत्यस्य सामाना-

५, १; मै १,१,४; ४,१,४; काठ १, ११; ३१, १०; –०ग्वः क १, ११; ४७, १०.

अग्रे-णी[a]– -णीः मा ६,२;का ६,१,२; –०णीयः[b] मै १,१,४.

¶**अग्रे-दधुस्**[c]– -धुः, –धुषि मै ४,१, ९.

¶**अग्रे-दिधिषु**[d]– -षुः, –षौ काठ ३१,७; क ४७, ७.

अग्रे-पा[e]– -पाः ऋ ४,३४, १०; –पाभिः ऋ ४, ३४, ७.

अग्रे-पू[f]– -०पुवः मा १,१२; का १, ४, २; तै १, १, ५, १.

अग्रे-यावन्[g]– -वा मै ४, १४,९; –वानम् खि ५,७,४,५.

अग्रे-वध[h]– -धाय मा १६, ४०;का१७,६,४; तै ४,५,८,१; मै२,९,७;काठ१७,१५;क२७,५

अग्रेत्व(ग्र-इत्वन्→)**री**[i]– -री शौ १२,१,५७;–र्याः मै ४,२,१०¶.

अग्रि(म→)मा[j]– -मा ऋ ५,४४,९.

१अग्रिय,या[k]– -†यः ऋ १,१६,७; ८, २६, २५; ९, ७, २;३; ६२, २५; २६; ८३, ३; ८६, १२; १०, १२०, ८; कौ २, १२५; १२६; २२७; ३८३; ४७९; ४८०; ३, २, २; जै २, ५, १०; ३, १३, १; २; २०, ११; ३१, ३; ३६, ४; ५; शौ ५, २, ८; २०, १०७, ११; –यम् ऋ १,

---

धिकरणं भजते (तु. ऋ १,१४५,५)। अनेनापि ह्रस्वान्तं 'गु-' इत्यन्तं प्राति. अभ्युपेयतामेवोपेयात्। एवं स्थिते सम्प्रदायस्यैतद्विषयकं प्रामाण्यं चिन्त्यम्। पाणिनीयां प्रक्रियामनुसृत्य क्विप्य् अनुनासिकलोपे, ऊङ्-आदेशं वदन् म., औणादिकीं प्रक्रियां चानुसृत्य डु-प्रत्ययवादी उ. च नितरामप्रमाणं स्यातामिति कैमुतिकमिव भवति।

a) कारकोपपदे √नी+क्विब् णत्वं कृद्-उपप्रस्व. च (पा ३, २, ६१; ६, १, १६२; २, १३९; ८,४,३)।

b) '–०णियः' इत्यस्य स्थाने प्रयुक्तेऽस्मिन् शब्दरूपे छान्दस ईयङ्ङ्-आदेशः द्र.। एवमेव चैतन् मूलकोशैः पदपाठेन च प्रमापितं भवतीति साधुतास्य मा शङ्कि।

c) तु. **अग्रे-दधिषु-** (वैप२), **अग्रे-दिधिषु-**(नाउ.) च। तस. कृद्-उत्तरपदप्रकृतिस्वरः (पा ६, २, १३९) उप.√धा+उसिः (पाउ २,११५) कित्त्वं लिड्वच्च उसं.।तेनाऽऽतो लोपो द्वित्वं च द्र.(पा६,१,८;४,६४)।

d) विशिष्टादपि सन्नन्ताद् उः (पा ३, २,१६८)।

e) सोपपदात् √१पा+विच् प्रत्ययः। कृद्-उपप्रस्व. च (पा ३, २, ७४; ६, १, १६२; २, १३९)।

f) उप. उ.√१पा+डुः प्रत्यय इत्याह। म.च√१पा+क्विप् प्रत्यय ऊङादेशश्च√१पू+क्विब् वा,इति धातुविकल्पेन पाप्र.अन्वाचचक्षे। पूर्वपक्षपातिन इवार्वाञ्चो भवन्ति (तु.PW. MW. प्रभृ.)। न त्विह √१पा इत्यस्य कोप्यवकाशः सम्भावनायोपलभ्यते। तथाहि। अपां ह्येतद् विशेषणं भवति। 'अग्रे प्रामुख्येण पुनन्ति' इति सुवचं च तद्व्याख्यानं भवति। अप्-कर्तृकस्य पानस्याप्रसिद्धेस्तत्कर्मके च पाने तत्प्राधान्यविघातात् तत्कर्तृकयज्ञाग्रनयनाशंसनस्य सुतरामपार्थत्वात् प्रकरणासंगतिप्रसङ्गात् सुत्यज इव √१पा इत्यस्य विकल्पो भवति। अन्यच्च ऋ १०,१७,१० इत्यत्राप्यपामेव विशेषणं श्रूयते 'घृतप्र्वः' इति। 'पुनन्तु' इत्याशंसनमप्यनुपदमेव तत्र श्रूयते। यथा तत्र 'घृतेन पावयित्र्य आपः' इत्येव प्राकरणिकं व्याख्यानं न तु 'घृतं पिबन्ति' इति वा 'घृतं पाययन्ति' इति वा। एवमिहापि√पू इत्येव लब्धावकाशः स्यान्नैव धात्वन्तरं किंचित्। अथापि'केत-पू-' इति प्राति. 'अन्न-पू-' इति प्राति. चेममेवाभिसन्धिं द्रढयितुं प्रभवतः। स्वरस्तु नापू. द्र.।

g) कारकोपपदे √या+वनिप्। पित्त्वात् प्रत्ययनिघाते कृद्-उत्तरपद-धातुस्वरः प्रकृत्या (पा ३, २,७४; ६, १, १६२;२,१३९)।

h) कारकोपपदे√वध्+अच्। थाथादि-स्वरः (पा ३, १,१३४; ६, २, १४४)।

i) कारकोपपदे √इ+क्वनिप् प्रत्ययः। कृद्-उत्तरपदप्रकृतिस्वरः (पा ३, २, ७५; ६, १, १६२; २, १३९)। स्त्रियां ङीपि रेफान्तादेशः (पा ४, १, ७)।

j) 'अग्रादि-'(पावा ४, ३, २३) इति तात्रभविकेऽर्थे डिमच् प्रत्ययश् चित्स्वरश्च (पा ६, १, १६३)।

k) तात्रभविकेऽर्थे प्रकृते घ→इयश् च छ→ईयश् च प्रत्ययौ विधीयेते (पा ४, ४, ११७)। किमनुबन्धोऽसौ घ इत्यत्र विमर्शो भवति। कथमिति। उच्यते। आद्युदात्तत्वेनान्तोदात्तत्वेन चोभयथा श्रूयमाणत्वादस्य शब्दस्य तन्निमित्तभूतयोः क्रमेण ञिन्निदन्यतरत्व-चित्त्वयोः प्रत्ययस्यावश्यंभावित्वात्। तत्रापि प्रायोभावित्वादन्तोदात्तश्रुतेस्तद्वतः शब्दस्वरूपस्य प्राधान्यं वाच्यम्। एवमल्पीयस्तया श्रूयमाणत्वादाद्युदात्तस्य शब्दस्वरूपान्तरस्य गुणभावो वक्तव्यो भवति। अथानयोः शब्दस्वरूपयोरुपलब्धिविभागोऽनुसंधेयः। स च यथा। प्रथममन्तोदात्तं प्राति. ऋ. तै. मै. कौ. शौ. जै. आमनन्ति। तासु शाखासु घच्-प्रत्ययान्तः शब्द इत्यर्थः। द्वितीयमाद्युदात्तं प्राति. तै.-मात्रगोचरं भवति। तत्रैवैष शब्दस्तावद्

१३,१०;४,३७,४; ६,१६,४८; ७, ९२, २; ९, ७१, ४; तै ३, १, ११, १†; मै ४, १३, १०†; शौ ११, ८, ३; पै १६, ५९,४; –या ऋ ४,३४,३; १०,९५,२.

२अग्रिय[a]– -याय तै ४, ५, ५,२.

अग्रीय[b]– -यम् मै २, ७, १३; –याय मै २, ९, ५.

अग्र्य[c]– -ग्र्यः पै ६,१,८‡[d];–ग्र्यम् खि १, ३, ७; –ग्र्याय मा १६, ३०; का १७, ४, ४; काठ १७, १४; क २७, ४.

अ-ग्रभण[e]– -णे ऋ १, ११६, ५.

अग्र*यण-, अग्रा*यण- अग्र- द्र.

¶अ-ग्रह*[e]– -हः काठ ३०, ७.

¶अ-ग्रहण[f]– -णौ मै १, ४, ७; ५, १४; ८, ४.

?अग्राग्नि-, अग्राद्वन्- अग्र- द्र.

¶अ-ग्राहयित्वा[f] मै ४, १, ९.

अग्रिमा-, १अग्रिय-, २अग्रिय-, अग्रीय- अग्र- द्र.

अग्रु[g]– -ग्रवः ऋ ७, ९६, ४; कौ २, ८१०†; शौ १४, २,७२†; १८, २, ४७; –ग्रुः ऋ ५, ४४, ७.

अग्रू[h]– -†ग्रुवः ऋ १,१४०,८; १९१, १४; ३, २९, १३; ४, १९, ७; ९; ३०, १६; ७, २, ५; ९, १, ८; ६६, ९; काठ ३८, १३; जै ४,४,८; पै १,५९,५²§; ४,१७,६;–ग्रुवै शौ ६,६०,१;३.

अग्रे प्रभृ.; अग्र्य- अग्र- द्र.

√अघ्[i]

अघ,घा[j]– -घः ऋ १,४२,२;–घम्

घन्-प्रत्ययान्तो भवतीत्यर्थः (तु. श्रोत्रिय- पा ५, २, ८४)। एवमपि कथं तै. उभयथा श्रुतिर्भवतीत्यपरो विमर्शो भवति। अत्रोच्यते। आद्युदात्तैव तच्छाखीया प्रातिस्विकी श्रुतिः। यत्र तु शाखान्तरीयायाः श्रुतेः संनिवेशो भवति यथा (तै. ३, १, ११, १ इत्यत्र ऋ. १, १३, १० इत्यस्य), तत्र मूलशाखास्वर एवाद्रियत इति सुकरो विवेको वाच्यः। एवं स्थिते यत् स्वीयपाणिनीयाष्टकसंस्करणेऽवरत उपलभ्यमानस्य घन्-प्रत्ययान्तस्य शब्दस्वरूपस्य संकेतमकरोत् BW. (तु. २भागे पृ. ४५५) सर्वथाप्युपेक्षितवांश्च मुख्यशब्दस्वरूपं चित्-प्रत्ययान्तं तन्मन्दमिव भवति। अतस्तद्वचसः संगतिश्चोक्तशाखाविशेषमात्रनिघ्ना न सार्वत्रिकीत्यपि पूर्वोक्तानुसन्धानादतिरोहितमिव भवति। एवं च स्वयं क्षेत्रिय-शब्दं चित्-तया पठताऽऽचार्येण तत्राऽन्तोदात्तत्वस्य संकेतितत्वात् (तु.पा५,२,९२)। इन्द्रिय-शब्दस्य चापि तदानुपदिकत्वान्निपातनबलाच्चान्तोदात्तत्वस्य सुबोधत्वाद् मुख्यम् अग्रिय-शब्दमनुरुध्याचार्यस्य 'घच्छौ'(पा ४,४,११७) इत्येवंप्रकारकश् चकारानुबन्धनः पाठोऽभिसम्मत इत्यपि सम्भाव्येत। अग्रिमसूत्रे निरनुबन्धस्यैव च प्रत्ययस्य संगतत्वादवश्यं तद्विवेकार्थमिह सानुबन्धः प्रत्ययः पठितव्यो भवेत्। नन्वेवमप्यन्तोदात्तस्यैव शब्दस्वरूपस्यानुशासनतः सुसाधतायां सत्यामप्याद्युदात्तस्य शब्दस्वरूपस्य विषये साक्षादनुशिष्ट्यभावादवतिष्ठेतैव खल्वाचार्यदर्शनेऽव्याप्तिदोष इति चेत्। न। सुवारत्वादाऽऽशङ्कितस्य दोषस्य। तद् यथा। 'अग्राद् यत्' (पा ४,४,११६) इत्यत्र 'च' इत्यधिकं पठ्येत। तथा सति पूर्वसूत्राद् घनोऽनुवृत्तिः सुवचा भवेत्। ततश्चाद्युदात्तमपि शब्दस्वरूपमाचार्यानुशासनेऽन्तःपतितं भवेदित्यभिसन्धिः। अथवा, 'अग्रिय-'इत्य् अन्तोदात्तैव श्रुतिरेकरूपा द्वैविध्यासहेति वक्तव्यम्। तत् कथमाद्युदात्तविधोपलब्धिरिति चेत्। उच्यते। यथा यणमध्ये 'य्' इत्यस्य स्थाने 'इय्' इति, 'व्' इत्यस्य स्थाने च 'उव्' इति तै. आम्नानसम्प्रदायो भवति। तथेह अग्र्य- इत्यस्य यत्-प्रत्ययान्तस्य यतोऽनावीयाद्युदात्तभाजः शब्दस्वरूपस्य स्थाने, अग्रिय- इत्याद्युदात्ता प्रातिभासिकी श्रुतिर्भवति न घन्-प्रत्ययान्तस्य शब्दान्तरस्य कल्पनासाकाङ्क्षत्वमिव भवतीति स्यात्। यथा अघ्न्य- प्राति. तै. अघ्निय- इत्यामनन्ति (यस्था. ऋ १, ३७, ५ प्रभृति। एवं तैब्रा २, ६, ६,२)। एवं तावदिह बहुरिव विमर्शोऽपेक्षितः द्र.। भूयानपि तद्विस्तरो वैश. अनुसंधेयः।

[a] नापूटि. द्र.।

[b] अत्र निच्-छ→ईयः प्र. द्र.। नित्-स्वरः (तु. पा ४, ४, ११७; पा ६, १, १९७)। शेषं नापूटि. द्र.।

[c] तत्रभवेऽर्थे यत् प्रत्यय आद्युदात्तत्वं च (पा ४, ४, ११६; ६, १, २१३)।

[d] '१अग्रियः' इति ऋ (१०, १२०, ८) पाभे.।

[e] बस. नञ्-स्वरः (पा ६,२,१७२)। उप. यद्र.।

[f] तस. नञ्-स्वरः (पा ६, २, २)। उप. यद्र.।

[g] √अञ्ज्+क्रुन् प्रत्ययो नित्स्वरश्च (तु. पाउ ४, १०३; पा ६, १, १९७)।

[h] स्त्रियाम् ऊङ्। प्रत्ययस्वरः (पा ४,१,६६)।

[i] √२अंह् √२अह् इत्येताभ्यां समूल इत्यर्वाचीनोऽभिसन्धिर् द्र. (तु. GW. अघ- इति)।

[j] अर्वाञ्च एतच्छन्दमात्रनिष्पत्त्यर्थं कल्पितम्. √अघ् इति धातुम् √२अंह् इत्यस्यैव रूपान्तरमाहुः। √अङ्ख् इत्यस्य तु भौवादिकस्य गत्याक्षेपे पठितत्वादपार्थ इवायमायासः संभाव्येत। आक्षेपस्य निन्दायां वैयाकरणैर्व्याख्यातचरत्वान् निन्दितकर्मात्मकशब्दार्थसांगत्यस्य √अङ्ख् इत्यनेन सहजप्राप्तत्वादिति भावः। भूयानत्र विकल्पविस्तरस्तु

ऋ [१, ९७, १^{२}; २–८]; २, ४१, ११; ५, ३, ७; ६, ६२, ८; ७, १०४, २; ८, १८, १४; ४७, १; १०, ३५, ३; खि २, ११, १, ४; मा ३५, ६†; ११; २१†; का ३५, ४, १०; २०†; २१†; मै १, ५, १२¶; काठ २३, ११†; शौ १, २८, ३; ४, १७, ३; †३३, १^{२}; २–८; ८, ४, २†; ६, २६; १०, १, ५; १२, ३, १४; ८, ५; १४, २, ५९–६२; †२०, २०, ६; ५७, ९; पै ४, ८, १–१३; †२९, १^{२}; २–८; ५, २३, ३; ७, १, ५; १४, ३, ६; १६, ९, २†; ८१, ७; १४४, ७; **–घस्य** ऋ १, १२३, ५; ८, ७९, ४; ८३, ५; १०, ८९, १४; पै १५, १६, ४–९; १७, १–३; **–घा** ऋ ८, ४७, ५; १०, १०२, १०; खि ५, ७, ३, ४; मा २८, १५; का ३०, २, ४; मै ४, १३, ८; काठ १९, १३; **–घाः** ऋ [६, ४८, १६; ५९, ८]; शौ २०, १२९, १६; **–घात्** ऋ १, १२८, ५; १६६, ८; शौ १२, १०, १३; पै १६, १४६, ८; **–घानाम्** ऋ ८, ४७, २; **–†घानि** ऋ २, २९, ५; ७, ८३, ५; मै ४, १२, ६; **–घाम्** पै १, ८६, ६; **–†घाय** ऋ १, १८९, ५; ७, १९, ७; तै १, ६, १२, ६; मै ४, १२, ३; शौ २०, ३७, ७. [°घ- आरे°, केवल°, तार्ष्ट°, पुलु°]

अघा॒[a]– -घासु ऋ १०, ८५, १३.

अघ-कृ॒त्[b]– -कृते शौ १०, १, ५; पै ७, १, ५; **–कृद्भिः** शौ १४, २, ६२.

अघ॒-द्वि(ष्ट→)ष्टा[c]– -ष्टा शौ २, ७, १.

अघ-मा॒र[d]– -रः शौ ६, ९३, १; पै ३, १०, २.

अघ-मेनि[e]– -निः पै १०, १२, ८.

अघ-रु॒द्[b]– -रुदः शौ ८, १, १९; ११, २, ११; पै १६, २, ८; १०५, १.

अघ-लु॒[f]– -लाः शौ ८, ८, १०; पै १६, २९, १०.

अघ॒-वि(ष→)षा[g]– -षा शौ ५, १८, ३; १२, ७, १; १५; १०, १३; पै ५, २२, १–९; ९, १७, १०; १५, १६, ४–९; १७, १–३; १६, १४२, १; १४३, ६; १४६, ८; **–षाः** शौ ६, ९३, २; **–षाभ्यः** शौ ६, ९३, ३.

अघ॒-शंस[h]– -सः ऋ १, १२९, ६; [२, ४२, ३; ६, २८, ७]; ४, ४, ३; ६, [७१, ३; ७५, १०]; १०, १८५, २; †मा १, १$; ३, ३२; १३, ११; २९, ४७; ३३, ६९; ८४; †का १, १, २$; ३, ३, २४; १४, १, ११; ३२, ५, १५; ६, १५; †तै १, १, १, १$; २, १४, १; ४, २४, १; ४, ६, ६, ४; †मै १, १, १$; ३, २७; ५, ४; २, ७, १५; ३, १६, ३; ४, १, १$; काठ १, १; ५; ४, १०; ७, २; १६, १५; ३०, १०; ३१, ४^{२}; ३५, ५; ४६, १; क १, १; ५; ३, ८†; ५, २†; २५, ६†; ४६, ८; ४७, ४^{२}; ¶; ४८, ६; शौ ४, २१, ७; ७, ७९, १; १९, ४७, ६; पै ३, १०, २; ६, २०, ६; १५, १०, १०†; **–सम्** ऋ ६, ८, ५; ७, १०४, २; १०, ८७, २०; खि ५, ५, ४; ७, ४, १४; मै १, ५, १; काठ २३, ११†; शौ ८, ३, १९†; ४, २; पै ४, ८, १–१३; †१६, ७, ९; ९, २; **–सस्य** ऋ १, ४२, ४; **–सात्** तै १, ६, ३, १; **–†साय** ऋ ७, १०४, ४; ८, ६०, ८; १०, १८२, १; शौ ८, ४, ४; पै १६, ९, ५; **–से** ऋ ५, ३, ७. [°स- हत°].

अघशंस-दुःशं॒स[i]– -साभ्याम् शौ १२, २, २.

†अघशंस-हु॒न्[b]– -हा ऋ [९, २४, ७; २८, ६; ६१, १९]; कौ १, ४७०; २, १६५; ३१७; ६४१; जै १, ४९, ४; ३, १६, १; २६, ३; ५१, ६.

वैश. द्र. । पचादित्वाद् अच् । चित्स्वरः (पा ३, १, १३४; ६, १, १६३) ।

[a] नक्षत्रविशेषात्मकतया सर्वथा पूर्वार्थभिन्नार्थरूढत्वात् पृथङ् निर्देशः द्र. । तदर्थविमर्शस्तु प्रकरणसाहचर्यादिभ्यो वैश. एव द्र. ।

[b] कारकोत्तर-क्विबन्त-कृत्स्वरः प्रकृत्या (पा ६, १, १६२; २, १३९) ।

[c] तस. 'तृतीया' (पा ६, २, ४८) इति पूपप्रस्व. । उप. यद्र. ।

[d] कर्मण्युपपदे √मृ>मारि+अण् प्रत्ययः । कृद्-उपप्रस्व. (यक. पा ३, २, १; १, ३; ६, २, १३९) ।

[e] कस. । उप. यद्र. ।

[f] कर्मण्युपपदे √ला+कः (पा ३, २, ३) । अथवा, 'सिध्मादिभ्यश्च' (पा ५, २, ९७) इत्यत्र अघ॒- इत्यस्योपसंख्याने परविषयत्वेन मत्वर्थीयो लच् प्रत्ययः स्यात् । प्रथमे कल्पे 'थाथ-' (पा ६, २, १४४) इत्यनेन, द्वितीये च चित्स्वरेणान्तोदात्तः द्र. (पा ६, १, १६३) ।

[g] बस. पूर्वपदप्रकृतिस्वरः (पा ६, २, १) उप. यद्र. ।

[h] कर्मण्युपपदे √शंस्+णः प्रत्यय उसं. पूपप्रस्व. च (पावा ३, २, १) । यद्वा नापूदि. समासस्वरौ द्र. ।

[i] द्वस. सामान्यः सामासिकः स्वरः (पा ६, १, २२३) ।

अघ-हार[a]- -रः कौ २, १२१४; शौ ६, ६६, १.

√अघाय[b], अघायति ऋ १, १३१,७.

अघायत्[c]- -॑यतः ऋ १, ९१,८; ४,२,६; ५,२४,३; [६, १६, ३०; ७, १५, १५]; १०, ६३,१२; मा ३,२६; २५,४८$; का ३, ३, १८; तै २, ३, १४, १; मै १, ५, ३; ४, १०,१; काठ २, १४; ७, १; क ५, १; जै ४, ६,१०; –यताम् शौ १०, ९, १; पै १६, १३६, १; –यते ऋ ६, ५१, ६; ८, ७१, ७; पै ४, ८, १–१३; –यन्तम् शौ १०, ४, १०; पै १६, १५, १०.

अघायु[d]- -यवः मा ४, ३४; ११,७९; का ४, १०,५; १२,७, १४; तै १, २, ९, १; ४, १,१०, ३; मै १, २, ६; २, ७, ७; ३, ७, ८; काठ २, ७; १६, ७; क २, १; शौ १, २७, २; ३; १९, १८, १–१०; पै १, ४२, ३; २, ३१, २; ५; ७, ३, २; ५; १७, १–१०; –युः ऋ १, १४७, ४; खि ४, ५, १८; तै ५, ७, ३, १; शौ ४, ३, २; ५, ६, १०; १०, १–७; १९, ४७, ७; ४९, ९; पै ६, ११, १२; १२, ९–११; १३, १–३; २०, ७; ८, ६, ९; १४, ४, ९; –युना पै ७, ८,७; –यूनाम् शौ १, २०, २; –यूनि खि ४, ५, ३; –योः ऋ १, २७, ३; १२०, ७; ४, २, ९; [(१, ३६, १५) ७, १, १३]; [१०, ४२, ११; ४३, ११; ४४, ११]; मा १६, ५०‡[e]; तै ३, ३, ११, १; ४, ५, १०, ४‡[e]; मै २, ९, ९[e]‡; काठ१०, १३†; १७,१६‡[e]; क २७, ६‡[e]; कौ २,९८६†; जै ४, २४, ७†; शौ १, २७,१; ७, ५३,१†; †२०, १७,११; ८९, ११; ९४,११; †पै १५, ११,१; १६, ८, ११.

अघा(र→)रा[f]- -रा पै १,८६,६.

अघा(घ-आ)रि(न्→)णी[g]- -णीः शौ ११, ११, १४.

१अघा(घ-अ)श्व[h]- -श्वाय ऋ १, ११६, ६.

२अघा(घ-अ)श्व[i]- -श्वस्य शौ १०,४, १०; पै १६, १५,१०.

?अघासार[j]- -रम् पै १, ५८,२.

¶अ-घात[k]- -ताय काठ २९, १; क ४५, २.

¶अ-घातक[k]- -कः काठ ८, ६.

¶अ-घातुक[l]- -कः मै १, ४, ७^{२}; ६, ४; ८, ५^{२}; ३, १, ३; काठ २७, ६^{२}; ३०, १०; ३२, ५; क ७, २; ४२, ६^{२}; ४६, ८.

¶अ-घात्य[k]- -त्येन काठ २६, १०; क ४१, ८.

√अघाय, अघारा-, अघारिणी-, १अघाश्व-, २अघाश्व- ?अघासार- √अघ् द्र.

अ-घो(र→)रा[m]- -रा मा १६,२; का १७, १, २; तै ४, ४, १२, ५; ५, १, १; मै २, ९, २; ३, १६, ४; काठ १७, ११; २२, १४; क २७,१; पै १४,२,८; १५,२,४; १६,७३,२; –रेण काठ ३८,१३; शौ ७, ६२, १; १४, २, १२; पै ३,२६,१; –रेभ्यः मै २, ९,१०.

---

[a]) कर्मण्युपपदे √हृ+अण् प्रत्ययः। कृद्-उपप्रस्व. (यक्र. पा ३, २, १; १, ३; ६, २, १३९)।

[b]) √अघ-य इति पपा.। परेच्छायां क्यचि पूप. आऽऽकारान्तादेशः (पावा ३, १, ८; पा ७, ४, ३७)। पराधिकरणकाघस्येच्छायां धात्वर्थपर्यवसानं द्र.। धातु-स्वरेणान्तोदात्तः (पा ६, १, १६२)।

[c]) शतुर् अदुपदेशान्निघाते शपः पित्त्वान्निघाते च शिष्टो धातु-स्वरः (पा ३, २, १२४; ६, १, १८६; ३, १, ४; ६, १, १६२)। 'शतुरनुमः' (पा ६, १, १७३) इति विभक्तेरुदात्तत्वम्।

[d]) उः प्रत्ययस् तत्-स्वरश्च (पा ३,२,१७०;१,३)।

[e]) विशिष्ट इह बाह्वृचः (२,३३,१४) पाभे. द्र.।

[f]) कर्मण्युपपदे √ऋ+अच् प्रत्ययः। (तु. पा ३, १, १३४)।

[g]) पपा. अनवगृहीतः। सोपपदाद् आ√ऋ इत्यतो वा, अनुपसृष्टाद् √ऋ इत्यतो वा ताच्छीलिको णिनिः (तु. सा. आर्त- इत्येवं व्याचक्षाणः)। कृद्-उपप्रस्व. (पा ३, २, ७८; १,३; ६,२,१३९)। नञ् पूप. √घृ इत्यतो घारिन्- इति उप. चेति PW. प्रमृ.। चिन्त्यं त्वेतत्। नञ्-स्वरानुपलम्भादिति दिक्। स्त्रियां ङीप् (पा ४, १, ५)।

[h]) बस. पूर्वपदप्रकृतिस्वरः (पा ६,२,१)। उप. यद्र.।

[i]) सर्पजातिविशेषात्मकार्थविशेषपरत्वात् पृथङ् निर्देशः द्र.। अत्र BW. अघपूर्वात् √श्वसेर् व्युत्पत्तिमाह। सा तु विमर्शविशेषापेक्षिण्यनुसंधेया।

[j]) सन्दिग्धस्थलीयः पाठोऽत्र भवति।

[k]) तस.। उप.<√हन् यद्र.।

[l]) तस. नञ्-स्वरः (पा ६, २, २)। एतत्प्रकारकेष्व् अ-क्षोधुकादिष्व् अनेकेषु शब्देषु 'कृत्योक-' (पा ६, २, १६०) इत्यन्तोदात्तानुशिष्टेरपवादः उसं. द्र.।

[m]) तस. अव्ययपूपप्रस्व. (पा ६,२,२)। उप.<√घुर् यद्र.।

अघोर-घोरतर[a]– -रेभ्यः मै २,९,१०.

अ-घोरचक्षस्[b]– -क्षसः पै ७,८,६.

†**अ-घोरचक्षुस्**[c]– -क्षुः ऋ १०, ८५, ४४; शौ १४, २,१७.

अ-घ्नत्[d]– -घ्नतः ऋ ७,२०,८; –घ्नता ऋ ५,५१,१५; –घ्नते ऋ ८,२५, १२.

१अ-घ्न्य,घ्न्या[e]– -घ्न्यः शौ ९, ४, १७; –घ्न्यस्य ऋ १, ३०, १९; –घ्न्या ऋ १,१६४,२७; ७,६८, ९; १०, ६०, ११; शौ ३, ३०, १; ६, ९१, २†; ७, ७७, ८†; ९, १५, ५; १९, १६, २; २७, १५; –घ्न्याः ऋ ९, ८०, २; मा ६, २२; २०, १८; का ६, ५, ३; २२, १, ४; शौ ७, ८८, २; ८, ७,२५; १९,४४,९; –घ्न्यानाम् मै २,५,१०; ४,२,१०; शौ ९, ४,२;४;१९; –घ्न्याभ्यः ऋ ५, ८३,८; –घ्न्याम् ऋ ७,६८,८; –†घ्न्यायाः ऋ १०, ८७, १६; शौ ८,३,१५; –घ्न्यासु मै १,२, ६‡[f]; –घ्न्यौ ऋ ३, ३३,१३; शौ १४, २, १६†; १८, ४, ४९.

अ-घ्नि(य→)या[g]– -यानाम् तै ३,३, ९,२; –‡[f]यासु तै १, २, ८, १; ६, १, ११, ३[२].

†**२अ-घ्न्य,घ्न्या**[h]– -घ्न्यम् ऋ १,३७, ५; –घ्न्या ऋ ७, ८७, ४; ८, १०२, १९; –घ्न्याः ऋ ८, ७५, ८; ९, १, ९; मै ४, ११, ६; काठ ७, १७; जै ४, ४, ९; –घ्न्यानाम् ऋ ८, ६९,२; १०, १०२, ७; कौ २, ८६२; जै ४, २५, २; –घ्न्यायाः ऋ ४, १,६; ९, ९३, ३; १०, ४६, ३; कौ २, ७७०.

अ-घ्नि(य→)या[g]– -याः तै २, ६, ११, २.

३अ-घ्न्य,घ्न्या[i]– -घ्न्यः पै १६, २५, ७; –घ्न्या क ४६, ८; पै १, १११, १†; ५, १९, १; १०, ८, ५; १३, ३, १६; १६, ६८, ५†; –घ्न्याः खि २, ८, ३; पै २, २०, २; ३३, ५; ४, २२,७; ७, १३,११; १५,१९,१०; १६,१४, ४; –घ्न्यानाम् काठ १३, ९; पै १६, २४, २; ५; २५, ९; –घ्न्यायाः पै १६,७,६; -‡[f]घ्न्यासु काठ २, ६; ४, ९; क १,१९.

४अ-घ्न्य,घ्न्या[j]– -०घ्न्याः मै १, २, १८; काठ ३,८; ३८,५; -०घ्न्याः मा १, १; १२, ७३; का १, १, २; १३, ५, १२; मै १, १, १; २, ७, १२; ४, १, १; काठ १, १; १६,१२; ३०,१०; क १,१; २,१५; २५, ३; पै १५, ३, ९; –०घ्न्ये शौ १२, १०,१२; १४; -०घ्न्ये ऋ १,१६४,४०; मा ८,४३; का ९, ६,२; शौ ६, ७०,१–३; ७,७७,११†; ९,१५,२०; १०, ९, ३; ११; २४; १०, १; १२, ११, २; ४; १८, ३, ४; पै १६, ६९, १०; १०७, १; १३६, ३; १३७, १; १३८, ४; १४६,१२.

अ-घ्निय,या[g]– -०याः तै १, ३, ११,१; –०याः तै १, १, १,१; –०ये तै ७, १, ६,८.

¶**अघ्न्या-त्व**[k]– -त्वम् मै ४, २,१२.

अघ्न्या*(घ्न्य-आस्य→)स्या[l]– -०स्ये खि ४, ५, २६; –०स्ये[m] खि ४,५,३२.

---

[a] द्वस. । सामान्यः समासस्वरः (पा ६, १, २२३) । **अ-घोरघोरतर-** इत्येवमभिप्रायो विभागः पपा. अपि द्र. । तथात्वे तस.नञ्-स्वरः (पा६,२,२) इति विवेकः सूहः।

[b] तस. । उप. सोपपदे **√चक्ष्+असुन्** प्रत्ययः (पाउ ४, २३३) । '**घोर-**' इति क्रिवि. द्र. ।

[c] तस. नञ्-स्वरः (पा ६, २, २) । उप. बस. ।

[d] समासस्वरौ नापू. द्र. । उप.<**√हन्** यद्र. ।

[e] **√हन्** इत्यतो भावे घञर्थे कः (पावा ३, ३, ५८) ततस् तदर्हतीत्यर्थे **यत्**-प्रत्यये **घ्न्य-** इति । तस. नञ्-स्वरं बाधित्वाऽन्तोदात्तः (पा ५,१,६७; ६,२,१५६) । अथवा, कृत्यप्रत्ययस्यैवार्थतो मुख्यत्वात् कर्मणि **क्यप्** । ततो नञ्-स्वरमपोह्यान्तोदात्तत्वम् (पा ३, ३,११३; ६,२, १६०) यत्तु सा. अहननम् अघ्नः । ततोऽर्हार्थे यः प्रत्ययस् तत्स्वरेणान्तोदात्त इति । तन्न । प्रत्यय-स्वरस्य नञ्-स्वरेण बाधे प्राप्ते नञो गुणप्रतिषेधीयत्वात् तत्स्वरबाधकान्तोदात्तत्वस्यैव सुवचतरत्वात् ।

[f] '**उस्रियासु**' इति बाह्वृचः (५, ८५, २) पाभे. ।

[g] '१अ-घ्न्य-, २अ-घ्न्य-' इत्येतयोरेव शाखान्तरीय उच्चारणभेदोऽत्र निदानम् ।

[h] उप. '**अघ्न्यादयश्च**' (पाउ ४, ११२) इति **यक्**-प्रत्ययान्तेऽव्ययपूपप्रस्व. (पा ६,२,२) । यद्वा '**कृत्योक-**' (पा ६,२,१६०)इत्यस्याऽत्राऽपवादः **उसं**.द्र. । अर्थविशेषद्योतकोऽयं भेद इति ।

[i] स्वराङ्कानुपलम्भात् तदाश्रयप्रथमद्वितीयान्यतरविवेको दुःशक इति कृत्वा पृथङ् निर्देशः द्र. ।

[j] आमन्त्रितत्व-वशात् सौवरो विवेको दुःशक इति कृत्वा पृथङ् निर्देशः द्र. ।

[k] भावे त्वः । प्रत्ययस्वरः (पा ५,१,११९;३,१,३)।

[l] बस. पूर्वपदप्रकृतिस्वरः (पा ६, २, १) । पादादावामन्त्रिताद्युदात्तः । '०घ्न्यास्ये' इति मुपा.स्वरो मुद्रणप्रमादजः स्यात् ।

[m] '०अज्ञाते' इति शौ (१०, १, २०) पाभे. यद्र. ।

√अङ्क्

अङ्क[a]– -ङ्कः पै २,७९,४; –†ङ्काः ऋ १, १६२, १३; मा २५, ३६; का २७, १३, ५; तै ४, ६, ९, १; मै ३, १६, १; काठ ४६, ४; –ङ्कान् शौ १,१२,२; पै १, १७, २; –ङ्के पै ५,९,६; –ङ्केन शौ ७, १२०, १; पै २, ७९, ५; –ङ्कौ तै १,७, ७, २. [°ङ्क-, उद्°, परि°, वाहु°, सम्°]

अङ्का(ङ्क-अ)ङ्क[b]– -ङ्कम् मा १५,५; का १६, १, ८; तै ४, ३, १२, ३; काठ १७, ६; क २६, ५.

?अङ्कावङ्क[c]– -ङ्कम् मै २,८,७.

अङ्किन्[d]– -ङ्किनः शौ १९,६६, १; पै १६, १५०, ५; –ङ्किनम् पै ७,१२,९; –ङ्की ऋ ३,४५,४.

अङ्क(ति→)ती[e]– -तीषु पै ८, १२, ६.

†अङ्कस्[f]– -ङ्कांसि ऋ ४, ४०, ४; मा ९,१४; का १०, ३,७; तै १, ७, ८, ३; मै १, ११, २; काठ १३, १४.

†अङ्कस[g]– -सम् ऋ ४,४०,३; मा ९,१५; का १०,३,८; तै १, ७, ८, ३; मै १, ११, २; काठ १३, १४.

अङ्कु*[h]– -ङ्कुम् काठ ४०, ११.

अङ्कु-प[i]– -पम् मा १५, ४; का १६, १, ५; तै ४, ३, १२, २; मै २, ८, ७; काठ १७, ६; क २६, ५.

†अङ्कुश[j]– -शः ऋ ८, १७,१०; मै ४, १२, ३; काठ ६, १०; शौ ६, ८२, ३$; २०, ५,४; –शम् ऋ १०,४४,९; १३४, ६; कौ २, ४४१; जै ३, ३३, १६; शौ २०, ९४, ९; पै ७, १२, ९$. [°श- अयस्तर°]

अङ्कुशिन्[d]– -शिनः ऋ १०, ३४, ७.

---

a) लक्षणार्थाद् भौवादिकाद् √अङ्क् इत्यतो वा गतियाचनान्यतरार्थाद् √अन्च् इत्यस्माद् वा करणाधिकरणयोर् घः प्रत्ययः द्र. । प्रत्ययश्चासौ **'पुंसि संज्ञायाम्'** (पा ३, ३, ११८) इत्युक्तो वा स्यादग्रिमे सूत्रेऽनुक्तसमुच्चयार्थीयचकारप्रयोजितो वा स्यात् । √अन्च्+घ इति कल्पे कुत्वं द्र. (पा ७, ३, ५२)। कौटिल्यार्थेन √अक् इत्यनेनापि नुमागमनिपातनतो यथाकथमपि सम्बन्धः साध्यतामर्थानुसन्धानतः । यत्तु **अच्**-प्रत्ययान्तता क्वचित् प्रत्यपादि 'तु. शब्द.' तन्न । कर्त्रर्थासम्बन्धात्। यदपि **'उदङ्क-'** इत्यस्य **घञ्**-प्रत्ययेन निष्पत्तिरुपदिष्टा भवति (तु. पा ३, ३, १२३) तदप्यचिन्त्यं नैव भवति । तद्विस्तरस्तु वैश. द्र. ।

b) कर्मण्युपपदे √अङ्क्+अण् । कृद्-उपप्रस्व. (पा ३, २, १; १, ३; ६, २, १३९) ।

c) '-ङ्कौ-ङ्क-' इति पपा. । मा. प्रभृ. तु **'अङ्काङ्क-'** इत्येवामनन्ति तद् नापू. गद्र. ।

d) मत्वर्थीय **इनिः** प्रत्ययस् तत्स्वरश्च (पा ५, २, ११५; ३, १, ३) ।

e) मुपा. तु ह्रस्वान्तो भवति । तथात्वेऽसौ चिन्त्यो भवेत् । कोशसाद्यस्य दीर्घान्तत्वप्रमापकत्वात् । दीर्घान्तं चेह साधु द्र. । **'बह्वादिभ्यश्च'** (पा ४, १, ४५) इत्यत्र गणे **'अङ्कति-'** शब्दस्य साक्षात्पठितत्वोपलब्धेर् **ङीष-**न्तस्य तस्य न्याय्यत्वादिति दिक् ।

f) **असुन्** प्रत्ययः (पाउ ४,२१६)। नित्स्वरः (पा६,१, १९७)। यद्वा √अन्च् + **असुन्** (पाउ ४,१८९) कुत्वे च। अथवा, कुटिलगतिवाचकाद् √अक् इत्यस्मात् तस्मिन्नेव प्रत्यये नुमागमो निपात्यताम् ।

g) **अर्श आदे**राकृतिगणत्वान्मत्वर्थे **अच्** प्रत्ययश्चित्स्वरश्च (पा ५, २, १२७; ६, १, १६३) ।

h) **अङ्कवन्निष्पत्तिर्** द्र. । अत्रौणादिक **उः** प्रत्यय इत्येव विशेषः । यत्तु **'नावञ्चेः'** (पाउ १, १७) इत्यत्र नि-पूर्वत्वमुपदिष्टं तदनैकान्तिकं वाच्यम् । निपूर्वाद् अतत्पूर्वाच्च √अन्च् इत्यस्माद् उ-प्रत्ययोपलम्भात् । अत्र कुत्वं चाऽऽकृतिगणत्ववचनेन प्रसाध्यम् (पा ७, ३, ५३)। अथवा **'न्यङ्कु-'** इत्यत्र **'अङ्कु-'** इत्यस्य तदुत्तरपदत्वेनान्तर्भावः द्र. । अत्र **'भङ्कु-'** इत्यपि मूलकोशप्रमाणितं प्राति. द्र.। वाह्वृचे **'वङ्कु-'** इति श्रूयते (तु. ऋ. १, ११४, ४) ।

i) पपा. पूर्वोत्तरपदविभागादर्शनाद् मुपा. तदनुसारी द्र. । सोपपदात् √२पा इत्यतो वा √१पा इत्यतो वा **के थाथादि**-स्वरे च (पा ३, २, ३; ६, २, १४४) निष्पत्तौ सुलभायामप्यर्थानुसन्धानतो भूयान् विमर्शविस्तरः वैश. अन्वेष्यो भवति ।

j) **लोमादे**राकृतिगणत्ववचनात् ताद्धितेन **श**-प्रत्ययेन निष्पत्तिः द्र. (तु. पा ५, २, १००) यत्र पपा. तथाविधः प्रकृति-प्रत्ययविभागो न प्रदर्शितस्तत्र तादृशी प्रक्रियैव द्र. । **रोमश**-प्रभृतिष्वपि तत्रोक्तो विभागो नोपलभ्यते । अथवा कृदेव स्यान्न ताद्धितः प्रत्ययः । तु. उणा. ४, १०७ यत्र √अङ्क्+उशच् नामकरण उपदिष्टो भवति । प्रथमे कल्पे प्रत्ययस्वरेण द्वितीये च चित्स्वरेणान्तोदात्तत्वमुभयत्र समानम् (पा ३, १, ३; ६, १, १६३) ।

√अङ्कूय[a]

अङ्कूयत्[b]- -यन्तम् ऋ ६, १५, १७.

√अङ्ख् परि°

√अङ्ग्

१अङ्ग[c]- -ङ्गम् ऋ १०, ८५, ३०; १०९, ५; शौ ५, १७, ५†; ६, ७२, १; १०, ७, २; ९; २५; २६; १४, १, २७†; १८, २, २६; ४, ६४; †पै ९, १५, ५; -†ङ्गम्-ङ्गम् ऋ १०, ९७, १२; मा १२, ८६; का १३, ६, १२; शौ ४, ९, ४; ९, ३, १०$; पै ८, ३, ११; ९, ९, २$; १३, १३, ६; $१६, ३९, १०; ८८, ५; -ङ्गा शौ ६, ६६, ३; ११, १०, १२; १२, ९, ४; ११, १०; पै २, ३९, २; ६; ३, ३७, १; १६, ८६, १; १४५, ४; -ङ्गात् शौ १०, ७, २^{३}; पै १, ५९, १; -ङ्गात्-ङ्गात् ऋ १०, १६३, ६; खि ५, ७, २, ६; मा २१, ४३-४५; का २३, ५, ३^{३}; मै १, ११, ६¶; ४, १३, ७; काठ १४, ६¶; १८, २१; शौ ५, २५, १; ८, ७, ३; १०, ४, २५; १४, २, ६९; पै ४, ७, ७†; ११, १, १४; १६, १२, ३; १७, ३; -ङ्गानाम् ¶मै ३, १०, ३; ४; ¶काठ १३, १०; ३४, ९; शौ १८, २, २४; पै ९, ७, ४; -ङ्गानि ऋ १०, १०३, १२; मा ६, १०; ८, २९; १२, ४; १७, ४४†; १८, ३; १९, ९३; २०, ६; ८; का ६, २, ५; ९, ५, २; १३, १, ५; १८, ४, १२†; १९, २, ३; २१, ६, १४; ७, ५; ७; तै १, ३, ८, १; ३, १, ८, १; ३, १०, १; ४, १, १०, ५; ७, १, २; ¶५, २, ७, ५; १०, ५; ३, ५, ३; ४, ५, १; ५, ६, २; ९, २$; ६, ९, २; ७, २५, १$; ¶६, २, ८, ३; ३, ७, ४$; १०, ६; ¶७, ४, ११, ३; ५, ८, २; ५; २५, १; मै १, २, १५; ११, ६¶; २, ७, ८; ११, २; ¶३, २, ८^{२}; ५, १; ८, ९; ९, ६$; १०, १; ३^{२}; ११, ८^{२}$; ¶४, ३, ८^{२}; ५, ५; ९$; ६, ५; ८, ७$; काठ ३, ५; ६, ७; १३, ९; १०; १४, ६; १६, ८; १८, ७; २०, ९; २१, ३; २६, ८^{२}; २७, १०^{५}; २८, १^{२}; ३८, ३; ४^{२}; ४०, ६; ४५, ५; क २, १२, ४, ६¶; २८, ७; ३१, १८¶; ४१, ६^{२};¶; ४४, १^{२}¶; †कौ २, १२११; शौ ३, २, ५†; ११, ६; ४, ५, ४; १२, ७; ६, ९०, २; ९, ४, ११; १३, १९; १०, ५, ५०; ७, १८; ११, ९, ६; २०, १३६, ८; पै १, ६१, ३; ३, ५, ५†; ४, ६, ४; १३, १४, ८; १२; १६, २५, १; ७५, ९; १२; ८२, ६; -ङ्गे शौ १०, ७, १^{३}; ३^{४}; १३; २७; -ङ्गे-ङ्गे मा ६, २०^{२}; का ६, ४, ४^{२}; तै १, ३, १, १^{२}; ६, ३, ११, २; मै १, २, १७^{३}; ११, ६¶; काठ ३, ७^{३}; १४, ६¶; क २, १४^{३}; शौ १, १२, २; २, ३३, ७‡[d]; ६, ११२, ३; २०, ९६, २३‡[d]; पै १, १७, २; ७०, ४; -ङ्गेन मा २३, ५०; का २५, ९, ६; शौ ६, ७२, १; -ङ्गेभिः ऋ १, १४१, ८; ३, ७, ४; -ङ्गेभ्यः तै ३, १, ४, १¶; २, ३, २; ४¶; ७, ३, १६, २; काठ ३०, ८; ४३, ६; शौ १, १२, ४; २, ३४, ५; ३, ७, ३; ५, ३०, ८; ६, ९०, १; ९, १३, ७-९; ११, २, ६; १९, ४४, २; पै ३, २, ३; ३२, ७; ९, १३, ८; १५, ३, २; १६, ७४, ७-९; १०४, ६; -ङ्गेषु मा २०, १०; का २१, ७, १०; काठ ३८, ४; पै १, १०९, ४; २, ७९, २; १५, २०, १०; १६, ८८, ४; -ङ्गेषु-ङ्गेषु पै १६, १४९, १; -ङ्गैः ऋ १, ८९, ८; २, ३३, ९; ३, १, ५; १०, ४, ६; मा १९, ९३; २५, ६; २१†; का २१, ६, १४; २७, ९, १; ११, ८†; मै १, ४, ७^{३}¶; ३, २, १¶; ¶९, ५; ६; ११, ९^{२}; १५, ८; ४, १४, २†; काठ ३५, १†; ३८, ३; †कौ २, १२२४; शौ ४, १४, ९; ६, १२०, ३; ७, ५, ५; ८, २, ३; पै ८, ८, ४; १६, ३, ३; ५१, १; ९९, ३. [°ङ्ग- अन्°, चतुर्°, त्रिंशत्°, त्रि°, बीडु°, यथा°, रथ°, वि°, विश्व°, स°, सम्°, सम्भृत°, सर्व°; सहस्र°, सु°, स्थिर°]

अङ्ग-ज्वर[e]- -रः शौ ५, ३०, ९,

---

[a]) कण्ड्वादेराकृतिगणत्वाद् यक् प्रत्ययो दीर्घत्वं च (पा ३, १, २७; ७, ४, २५)।

[b]) अदुपदेशाल् लसार्वधातुकस्य शतुर् निघाते शपश्च पित्त्वान्निघाते धातुस्वरस्तदवस्थः (पा ६, १, १८६; ६, १, १६२)।

[c]) घञ्-प्रत्ययः (पा ३, ३, १६)। अथवोणादिषु √अञ्ज् इत्यस्माद् व्युत्पाद्यमानम् 'अङ्गस्-' इतीहापि ज्ञापकं स्यात् (तु. पाउ ४,२१६)। तथा च सति √अञ्ज् इत्यस्मादेव घञि प्रत्यये निष्पत्तिर् द्र.। घित्-प्रयोजितं कुत्वं ञित्स्वरश्च (पा ६,१,१९७)। यत्तु MW. √अम् इत्यस्मादाह तदप्रामाणिकमिवाऽऽभाति।

[d]) 'अङ्गात्-अङ्गाद्' इति ऋ (१०, १६३, ६) पाभे.।

[e]) कर्मण्युपपदे √ज्वर्>ज्वरि+अण् प्रत्ययः। कृद्-उपप्रस्व. (पा ३, २, १; ६, २, १३९)।

–रम् शौ ५, ३०, ८; ९, १३, ५; पै ९, १३, ८.

अङ्ग-भेद[a]– -दः शौ ५, ३०, ९; १९, ४४, २; पै १५, ३, २; –दम् शौ ९, १३, ५; पै ३, १७, ५.

अङ्ग-रोग[b]– -गम् पै १, ९०, ४; ९, १३, ९; १६, ७४, ५.

?आङ्गरोग[c]– -गात् पै ७, १५, ७.

अङ्ग-वत्[d]– -वते काठ ४५, ३.

¶अङ्गा-परुस्[e]– -रूंषि तै २, ५, ६, १^{२}.

अङ्गिन्[f]– -ङ्गिने तै ७, ५, १२, २.

अङ्गीन- यावत्°, विश्व°

अङ्गे-ष्ठा[g]– -ष्ठाः शौ ६, १४, १.

अङ्ग्य[h]– -ङ्ग्यः शौ ६, १२७, ३; –ङ्ग्याः ऋ १, १९१, ७. [°ङ्ग्य- विश्व°]

२अङ्ग[i]– -ङ्गेभ्यः शौ ५, २२, १४.

¶अङ्गार[j]– -रः खि ३, १५, २०$; काठ ३५, १८; क ४८, १६; –रम् तै ६, ३, ९, ५^{२}; मै ४, १, ८; काठ ३१, ६; क ४७, ६; –राः ऋ १०, ३४, ९$; तै ३, ४, ८, ४; मै १, ८, ६; काठ ६, ७; २१, १०; क ४, ६; –रान् काठ २६, १; क ४०, ४; –रेण मै ४, १, ९; काठ ३१, ७; क ४७, ७; –रेषु तै ५, १, ९, २^{२}; मै १, ४, १२; ८, ६; २, ५, ५; काठ ६, ७; १९, १०^{२}; क ४, ६; ३०, ८^{२}; –रैः तै ६, ३, १, २. [°र- अन्°]

*अङ्गारि[k]– -०रे मै ३, ७, ७.

अङ्गिर[l]– -रस्य पै ५, ३०, ९; –†राः ऋ १, ८३, ४; शौ २०, २५, ४; –रे ऋ ४, ५१, ४; –रेभ्यः शौ १९, ३९, ५; पै ७, १०, ५.

अङ्गिरस्[m]– -०रः ऋ १, १, ६; ३१, १७; ७४, ५; ११२, १८; २, २३, १८; ४, ३, १५; ९, ७; ५, ८, ४; १०, ७; ११, ६; २१, १; ६, २, १०; १६, ११; ८, ६०, २; ७४, ११; ७५, ५; ८४, ४; १०२, १७; खि २, १३, ४; ५; ५, २०, ४; मा ३, ३; ५, ९^{३}; ११, ४५; १२, ८; १५, २८†; का ३, १, ३; ५, ३, २^{३}; १२, ४, ८; १३, १, ९; १६, ५, ९†; तै १, २, १२, १^{२}; †२, ५, ८, १; ४; ६, ११, २; ४, १, ४, ३; २, १, ३; ४, ४, ३†; ५, १, ५, ६; ६, २, ७, ३; मै १, २, ८^{३}; ७, १; २, ७, ४; ८; १३, ७†; ३, ८, ५; ४, ११, ६†; काठ २, ९^{३}; ७, १३; १७; १६, ४; ८; १९, ५; ११; २२, १२; २५, ६; ३९, १३; १४; ४०, ११; क २, ३^{२}; ३०, ३; ३१, १; ३९, ३; †कौ १, २९; २, ११; २५८; ८९९; ९०३; †जै १, ३, ९; ३, २, २; २२, ५; ४, १४, ३; २५, ५; शौ २०, १०३, ३†; १३५, ९; –रसः ऋ १, ६२, २; ७१, २; [३, ५३, ७; (७, १०३, १०); १०, ६७, २]; ४, २, १५; ३, ११; ५, ११, ६; ४५, ८; ६, ६५, ५;

---

[a]) कर्मण्युपपदे √भिद्+अण्। कृद्-उपप्रस्व. (पा ३, २, १; ६, २, १३९)।

[b]) व्यु.नापूदि.द्र.। °ज्वर्- इति शौ.-शाखीयः पाभे.।

[c]) 'जत्रव्याद् अङ्गरोगाद्' इत्येवं मूलतः सतः पा. स्थाने 'अत्रव्या आङ्गरोगाद्' इत्याकारकः प्रामादिकः मुपा. द्र.।

[d]) मतुपो मस्य वः (पा ५, २, ९४; ८, २, ९)।

[e]) द्वस. 'न दधिपयआदीनि' (पा २, ४, १४) इत्युक्तगणस्य तदाकृतिव्यापकत्वे 'इध्मा-बर्हिषी' इतिवत् पूर्वपददीर्घ उभयपदप्रकृतिस्वरश्च (पा ६, २, १४०)। यत्तु भा. 'परादिस्' (पा ६, २, १९९) इति शिष्टिमनुस्मरन्निवोत्तरपदाद्युदात्तत्वमात्रमाह तच्चित्रमिव भवति। पाठान्तरवद्-ग्रन्थानुरोधेन वा दृष्टिदोषेण वा तस्य तथा मतं स्यादिति भूयोविमृश्यं सम्पद्यते विविचाम्।

[f]) मत्वर्थीय इनिः (पा ५, २, ११५)। प्रत्ययस्वरः।

[g]) कारकोपपदे √स्था+विच्। कृद्-उपप्रस्व. (पा ३, २, ७४; ६, २, १३९)। पूप. स. अलुक्।

[h]) तात्रभविके यति द्व्यच्कत्वादाद्युदात्तत्वम् (पा ४, ४, ११०; ६, १, २१३)।

[i]) जनपदवाचित्वाच् शब्दस्य पृथङ् निर्देशः।

[j]) आरन् प्रत्ययः (पाउ ३, १३४)। नित्स्वरः (पा ६, १, १९७)। अथवा 'अग्नि-गार-' इत्येवं मूलतः सतः प्राति. अपभ्रंशः। तत्र च उप. <√गर् (ल्) द्र.।

[k]) एवं किल मुपा. भवति। तस्य च चिन्त्यत्वार्थम् 'अङ्घारि-' इति अद्र.। एवं तु. मै १, २, ५; १२; ३, ८, १० यत्र तादृक्प्रकारक एव मुपा. भवति।

[l]) किरन् प्रत्ययो नित्-स्वरश्च (तु. पाउ १, ५२; पा ६, १, १९७)। यद्वेह च नाउ. च एपूदि. प्राकृतिकत्वं द्र.।

[m]) असुन् प्रत्यय इड्-रुटावागमौ च। यत्तु (पाउ ४, २३६) इत्यत्र 'असिः' प्रत्यय उपादेशि तच् चिन्त्यमिव भवति। प्रत्ययस्वरेणान्तोदात्तत्वापत्तेः। अतः पूर्वतः प्रवर्त्तितः (तु. पाउ ४, १८९) असुन् प्रत्यय एवोक्तावागमौ च द्र.। नित्स्वरः (पा ६, १, १९७)।

[७, ४२, १; ५२, ३]; १०,१४, ६; ६२, ५; ७८, ५; १०८, ८; १०; १६९, २; खि ४, ८, १; †मा १५, २८; १९, ५०; ३४, १७; †का १६, ५, ९; ३३, १, ११; ¶तै २,६,३, २; १२, ६†; ३, १, ९, ४; ५, १, २; ४, ४, ४, २†; ५, १, २, ४; २, ८,४; ४, २,३; ३,२; ७, २, २$; ६, १, १, २; ३, ३; २, ६, २^{२}; ७, १, ४, १; ४, १७, १†; मै १,४, १; २, ७, १२; १३, ७†; ¶३, १,३; ३,४; ६, ७;८, ४^{२}; ¶४, ८, ३; ५; काठ ४, १४; ५, ४; ८,४; ९, १६^{३}; १९, २; २१, ६; २२, १०;१३; २३, ४;२८, ३; ३१, १५; ३२,४; ३८,१३; ३९,१४; ४०,५; ४४, ६; ¶क ६, ९; २९, ८; ३१, २१; ३५, ४$; ३६, १; ४४, ३^{२}; कौ १, ९२; २, २५८†; जै १, १०, २; ३,२२,५†; शौ २, १२, ५; ३, २१, ८; ८, ८, १३; ९, ५, १६; १०, ६, २०; ७, १८;३४; ११, ८, १३; १२,३, ४३;४५; १८, १, ५८; ६१; ३, २०; ४, ३; २०, ९१,२†; पै ३, १२,८; ३८, ९; ५, ११, ४; १४, ८; ११, २, ६; १५, १४, ६; १६, ३०, ३;४४,३;९८,७;१४०,४; –०रसः ऋ १०, ६२, [१–४]; पै २, ५, ५; –रसम् शौ ४,२९, ३; पै ४, ३८, ३; –रसाम् ऋ १, ६२, ३; १०७, २; १२१,१; ३; १२७, २; २, २०, ५; ६, ११, ३; १०, ७०, ९; खि ३, १५, ३०; ३२; ५, १,३; मा १, १८; का १, ६, ४; तै १, १, ७, २; ३, ५,१,२¶; ५, ६,१६,१; ७, १७, १; मै १, १,८; ६, १; २; ५; ४, १,८; काठ १, ७; ७, १३^{३}; ८, ४; ३१, ६; ३९,१५; ४९, ६; ५३, ७; क १, ७; ६, ९; कौ २, ११६४†; शौ ६,३५, ३; १६, ८, १४; १८,४, ८; –रसौ मै ३, ४, २¶; –राः ऋ १, ३१, १; १३९, ९; ३, ३१,७; ५, ४५, ७; १०, ९२, १५; मा ३४,१२†; का ३३,१, ६†; शौ १९, ३४, ६; ५४,५; पै ११, ३, ६; १२, २, १५; –†रोभिः ऋ १, ६२, ५; १००, ४; २, १५, ८; ४, १६, ८; ६, १८, ५; ७, ४४, ४; १०, १४, ३–५; १११, ४; तै २, ३, १४, ५; ६, १२, ५; ६^{२}; ७, १, १८, २$; मै ४, १४, ५; १६^{३}; काठ ४१, ९; शौ २, १२, ४$; १८, १, ४७; ५९; ६०; २०, ७७, ८; पै २,५,४$; –रोभ्यः ऋ १, [५१, ३; ९, ८६, २३]; १३२, ४; १३९, ७; ८, १४, ८; ६३, ३; ९, ६२, ९; खि ५, २०, १; तै ७, ५, ११, २; काठ ४५. २; †कौ २,३३१;९९१; जै ३,२७, ७†; शौ १२,३,४४; १९, २२, १८; २०, २८, २†; ३९, ३†; १३५, ६; पै १६, ९४,५. [°स्- आदित्य°, रुद्र°]

आङ्गिरस॒[a]– -सः ऋ ६,७३, १; १०, ४७,६; ६८,२; १४९, ५; १६४, ४; मा १९, ७३; का २१, ५, २; मै १, ६, ५¶; ३, ११, ६; काठ ३८, १; शौ ६, ४५, ३†; ८, १३,१५; १०, १, ६; ११, १२, १०; १२; १३; १९, ४,४; †२०, १६, २; ९०, १; पै ७, १९, १; १६, ३५, ६; ९६,८; १३५,५; –सम् खि १, २, ९; २, ४, २; शौ ५, १९,२; पै ९,१८, ८; –सस्य ऋ ४, ४०,१; काठ ९,१२¶; –सान् ऋ ६, ३५,५; –सानाम् शौ १६, ८, १५; १९, २२, १; –साय मै १, ९, ४¶; काठ ९, ९; ११¶.

आङ्गिरसी॒[b]– -०सि शौ १२, १०, ६; पै १६,१४६,२; –सी मा ४,१०; का ४,४,२; तै १,२, २, २; मै १, २, २; काठ २, ३; क १, १५; पै ३, २२, १; –सीः शौ ८, ५, ९; ७, १७; २४; ११, ६, १६; पै १६, १३, ९; १४, ३; २२, ६; २७,९.

†अ॒ङ्गिरस्-तम,मा[c]– -०म ऋ १,७५,२; ८,४३,१८;२७;४४, ८; मा १२, ११६; का १३, ७, १५; तै १, ३,१४,३; काठ ३५, १७; क ४८, १५; जै १, ५३, ९; –मः ऋ १, ३१, २; १००, ४; १३०, ३; ९, १०७,६; १०, ६२, ६; कौ १, ५१९; –मम् ऋ ८, २३, १०; –मा ऋ ७, ७५, १; ७९, ३.

१अ॒ङ्गिरस्-वत्[d]– -स्वतः मै ४, ९,९; –स्वते मा ३८,९; का ३८, २, ३; मै ४, ९, ८; –स्वन्तौ ऋ ८, ३५, १४; –स्वान् ऋ २, ११, २०; ६, १७, ६.

---

[a]) अपत्य-दृष्ट-कृताऽन्यतमेऽर्थे अण् प्रत्ययस्तत्स्वरश्च (यक्र. पा ४, १, ११४; २, ७; ३, ११६) ।

[b]) स्त्रियां ङीप उदात्तनिवृत्तिस्वरेणोदात्तत्वम् (पा ४, १, १५; ६, १, १६१) ।

[c]) आतिशायनिकस् तमप् प्रत्ययः । तस्य पित्त्वान्निघाते स्वरः पूर्वावस्थः (पा ५, ३, ५५; ३, १, ४) ।

[d]) मतुपो मस्य वत्वे भत्वम् (पा १,४, १९)। स्वरः नापूदि. द्र. ।

२अङ्गिरस्-वत्[a] ऋ **१**, ३१, १७; ४५, ३; ६२, १; ७८, ३; **२**, १७, १; **३**, ३१, १९; **६**, ४९, ११; **८**, ४०, १२; ४३, १३; खि **४**, ९, ३; मा **११**, ९^{३}; १०; ११; १६^{३}; २८^{२}; ४७; ५८^{४}; ६०^{४}; ६१^{५}; ६५^{४}; **१२**, ५३^{२}; **१३**, १९; २४; २५; **१४**, ६; १२; १४–१६; २७; **१५**, ५७; ५८; ६४; **२७**, ४५; **३४**, १६†; का **१२**, १, ९^{२}; १०; ११; २, ५^{३}; ३, १^{२}; ४, १०; ५, ९^{४}; ११^{४}; ६, १; २^{५}; ५^{४}; **१३**, ४, ९^{२}; **१४**, २, ४; १०; ११; **१५**, १, ५; ४, २; ३^{३}; ८, ५; **१६**, ७, १^{२}; ६; **२९**, ६, १; **३३**, १, १०†; तै **४**, १, १, ३; ४^{४}; २, २^{४}; ३, १^{२}; ५, २; ३^{२}; ४^{३}; ६, १^{८}; २^{४}; ३^{४}; २, ४, ४^{२}; ७, ४; ९, २; ३, ६, २; ४, ३, ३; ६, २; **५**, १, २, ४^{२}; ५^{२}; ५, २, ४^{२}¶; ५, ४¶; ६, ३; मै **२**, ७, १; २^{५}; ४; ६^{२१}; ११^{२}; १५^{२}; १६^{८}; ८, ७; १४^{३}; १३, १४^{२}; २०^{२}; **३**, १, ३^{३}; ७¶; ८^{६}; **४**, ९, १^{२}; १५; १६; काठ **१**, ९^{३}; **१६**, १^{५}; ३^{२}; ५^{८}; ६^{१०}; ११^{२}; १६; **१९**, २^{२}; **३८** १३; **३९**, १; ३^{३}; ४^{४}; ७; १३; **४०**, ३^{३}; ५^{४}; क **२५**, २^{२}; **२९**, ८^{२}; **३०**, ४^{२}; ५.

¶**अङ्गिरोधा(रस्-धा)मन्**[b]– **–मानः** मै **३**, २, ९; काठ **२०**, ११^{३}; क **३१**, १३^{३}.

अङ्गु*[c]-

अङ्गु-ष्ठ[d]– **-¶ष्ठम्** तै **६**, १, ९, ५; मै **४**, ५, ८; **–ष्ठाभ्याम्** मै **४**, ६, ३; **–ष्ठेन** मै **४**, ५, ८; काठ **१३**, ७; **२४**, ५; क **३७**, ६.

अङ्गुरि[e]– **-रिम्** शौ **४**, १८, ६; **५**, ३१, ११; **२०**, १३६, १३. [°रि- अन्°, पञ्च°, सु°]

अङ्गुल[f]- दश°, द्वि°

अङ्गुलि[g]– **-लयः** मा **१८**, २२; का **१९**, ७, ४; तै **४**, ७, ९, १; ¶**६**, १, १, ८; ९, ५^{२}; **७**, ३, ९, २¶; ¶मै **१**, १०, १३; **२**, ११, ६$; **३**, ६, ३; काठ **१८**, ११; **२३**, १; **३३**, ३; ८; **३६**, ७; **३८**, ४; क **२८**, ११; **३५**, ७; **–लिभिः** तै **६**, १, ९, ५¶; शौ **४**, १४, ७; **–लिभ्यः** शौ **२**, ३३, ६; **२०**, ९६, २२; पै **४**, ७, ४; **–लिम्** मै **४**, ५, ८¶; पै **५**, २४, ५; **–लीः** मा **२०**, ६; का **२१**, ७, ५; मै **३**, ११, ८; काठ **३८**, ४[h]; शौ **१०**, २, १; पै **१६**, ५९, १[h]; १४७, ८[h]; १४९, १[h]; **–ल्या** ¶मै **१**, ८, ५; **४**, ५, ८. [°लि- अन्°, पञ्च°, मृदु°]

अङ्गुली*[i]– **-लीभिः** पै **१६**, ९८, १०.

अङ्गुलि-काण्ड[j]– **-ण्डम्** काठ **२६**, ४; क **४१**, २.

अङ्गुलि-मात्र[k]– **-त्रम्** मै **३**, ९, ४^{२}.

१अङ्ग- २अङ्ग- √अङ्ग् द्र.

३अङ्ग[l] ऋ **१**, १, ६; ८४, ७–९; १९; [११८, ३; **३**, ५८, ३]; १६४, ७; **२**, ४१, १०; **३**, ३३, ११; ५, ३, ११; [**६**, ४४, १०; ८, ८०, ३]; ५०, १०; ५२, ३^{३}; ७२, ५; **७**, २०, ९; ५६, २; ९१, १; ८, [६, २६; ७, २]; २४, १२; १५; ९६, १०–१२; **९**, १०८, ३; **१०**, ४, ४; ४२, ३; ५४, ४; ६४, १३; ७९, ४; ८६, ७; १२९, ७; १३१, २; १४६, ४^{२}; १४९, ३; खि **४**, ७^{२}, १०; मा **६**, ३७; **१०**, ३२; **१९**, ६; **२३**, ३८$; का **६**, ८, ८; **११**, १०, २; **२१**, १, ५; **२५**, ७, ६$; तै **१**, ८, २१, १; **३**, १, ३, २; **५**, २, ११, २; मै **१**, ४, १२¶; ११, ४; **२**, ३, ८;

---

[a]) क्रियातुल्यत्वे गम्ये, इवार्थे वा **वतिः** । भत्वम् । प्रत्ययस्वरः (पा **५**, १, ११५; ११६ पावा **१**, ४, १८)।

[b]) बस. पूर्वपदप्रकृतिस्वरः (पा **६**, २, १)। उप. यद्र. ।

[c]) तु. **अङ्कु***- इति । तद्वदौणादिकेन **उ**-प्रत्ययेन निष्पाद्यताम् ।

[d]) सोपपदात् **√स्था**+**कः** (पा **३**, २,४) । थाथादि-स्वरः षत्वं च (पा **६**,२,१४४; ८, ३, ९७)।

[e]) **अङ्गुलि-** इत्यत्र टि. द्र. ।

[f]) औणादिक **उर(→ल)च्** प्र. (तु. पाउ **१**, ३८)।

[g]) **उलिः** प्रत्ययः (पाउ **४**, २) । प्रत्ययस्वरेण मध्योदात्तत्वम् । यत्तु शक. प्रत्ययं चितमनुमेने तत् संस्कारच्युतमिव स्याद् अन्तस्वरापत्तेः । रलयोरभेदे **अङ्गुरि-** इति गद्र. । एवं ङीषन्तम् **'अङ्गुली-'** इति अद्र. ।

[h]) स्वराङ्कणाभावादिदं विवेक्तुं दुःशकं यथैतद् रूपं ह्रस्वान्तस्य प्राति. भवत्युताहो दीर्घान्तस्येति ।

[i]) **'कृदिकाराद्'** (पाग **४**,१,४५) इति **ङीष्**-विकल्पः । तेन चान्तोदात्तत्वमपि द्र. ।

[j]) षतस. । उप. यद्र. ।

[k]) प्रमाणे **मात्रच्** (पा ५, २, ३७) । तत्प्रयोजित-मन्तोदात्तत्वं च (पा **६**,१,१६३) ।

[l]) **अम्** इति क्षिप्रनाम **स्वरादिषु** पठितम् । तत्पूर्वकाद् **√गम्** इत्यतो **डे** प्रत्यये निष्पन्नस्य शब्दरूपस्याव्यय-त्वेनोपचारः द्र. । गस. उपप्रस्व. (पा **६**, २, १३९)।

३, ११, ७; १२, २; ४, ८, ९; १२, १; १४, २; काठ १२, ९; १४, ३; ३७, १८; ५०, ५; कौ १, २००; २४७; ३८९; ५८३; २, २८८; ६९१-६९३; ८६१; १०७३; जै १, २१, ७; २६, ५; ४३, ९; ५९, ६; ३, २४, ४; ५६, १८-२०; शौ $१,१६,२;$२,३,२[२];$५,११, ५; ७; ९, १४, ५; $११, ६, २१; $१३, ३, २१; २०, २०, ५; ५७, ८; ६३, ४-६; ८९, ३; १२५, २; १२६, ७; पै १, ८, २; ६, ४, १०; ८, १, ४; ५; ७; १६, ६६, ७†; अङ्गो[a] शौ ६, ६०, २; पै ४, २०, ७[२b].

अङ्गार-, अँङ्गारि-, अङ्गिन्-, अङ्गिर-, अङ्गिरस्-, अङ्गीन-, अङ्गुँ-, अङ्गुरि-, अङ्गुल-, अङ्गुलि- √अङ्ग् द्र.

?अङ्गूषँ[c]-

अङ्गे-ष्ठा-, अङ्ग्य- √अङ्ग् द्र.

अङ्गोष[d]-

अङ्गोषिन्[e]– -‡[f]षिणम् कौ १, ५२८; २, ४६७; ७५८; जै १, ५४, १०; ३, ३५, २.

अङ्गोषि*(य>)या[g]– -याः पै ६, ३, ११.

√अङ्घ्[h]

अङ्घ्रि[i]– -ङ्घ्रिणा मा २, ८; का २, २, २; काठ १, १२; ३१, ११; क १, १२; ४७, ११[j].

अङ्घारि[k]– -रिः मा ५, ३२; का ५, ८, २; तै १, ३,३,१; मै १,२,१२; काठ २, १३; –० रे मा ४, २७; का ४, ९, ४; तै १, २, ७, १; मै १, २, ५; ३, ८, १०; काठ २, ६; क १, १९.

?अङ्नार-

?आङ्नार[l]– -रः काठ २२, ३.

√अच्[m], अप°, आ°, उद्°, वि°

अचत्[n]– -चतः मै २, ७, १‡°.

अ-चक्र,क्रा[p]– -क्रम् ऋ १०,१३५,३; –क्रया ऋ ४, २६, ४; १०, २७, १९; –क्रे ऋ १, १२१, ११; –क्रेभिः ऋ ५, ४२, १०.

¶अ-चक्रवृत्त,त्ता[q]– -त्तम्[२], –त्ताम् काठ ६, ३; क ४, २.

अ-चक्रिवस्[r]– -चक्रुषे शौ ५,१४,९; पै २, ७१, १.

अ-चरत्[r]– -रन् ऋ ३, ५६, २.

अ-चरन्ती– -न्ती ऋ १,१८५, २; मै ४, १४, ७†.

अ-चरम[r]– -माः ऋ ५, ५८, ५; मै ४, १४, १८†.

अ-चराच(र→)रा[r]– -रा काठ १२,२.

अ-चर्मक[s]– -काय तै ७,५,१२,२; काठ ४५, ३.

---

[a] 'अङ्ग'इत्यस्योत्तरेण'उ'इति निपातेन निहतेनैकीभाव इवात्राऽऽपन्नः। अथवा 'अङ्ग' इत्यस्य 'अर्यमन्' इत्यनेन, उञ्श्च तदुत्तरेण नु-निपातेनाऽऽर्थः सम्बन्धः द्र.। अत्र यत् सा. उञ उत्तरम् अनुं पपाठ तदसत्। 'नु' इत्यत्रत्यं टि. अद्र.।

[b] एतद्वन्मन्त्रार्धोऽविस्पष्टार्थपदो भवति। तु. दिविश्वस्- दिवि-स्तन्- इत्यत्रत्ये टि.।

[c] आङ्गूष- इत्येतद्व्युत्पत्तावौपयिकी कल्पनेयं तत्रैव विस्तरेण द्र.।

[d] आङ्गूष- इत्यनेन समानन्यायत्वात् तदीयनिगमानां च भूरिसंख्याकत्वादस्य वैयुत्पत्तिकः संकेतोऽपि तत एव सुग्रहः द्र.।

[e] मत्वर्थीय इनिः (पा ५,२,११५)। प्रत्ययस्वरः।

[f] 'आङ्गूषाणाम्' इति ऋ (९,९०,२) पाभे.।

[g] इदमाद्यर्थेषु घ→इयः प्र. द्र. (तु. पा ४,४,११७) तु. त. स्तोत्रिय- इति। रू. अप्रसिद्धेरेव अङ्गुष्ठ->?अँङ्गोष्ठ- इत्यस्मादिव प्राति. भ्रान्त्युत्पादितात् प्र.मूको. भवतीति द्र.। अङ्गोष- अङ्गोषिन्- आङ्गूष- आङ्गूष्य- अङ्गोषिँय- इत्यादिषु प्रत्ययकृतभेदे सुभेदेऽपि मूलत एक एव धातुरभिक्लृप्त इति सम्भाव्यत इत्यपि द्र.।

[h] यतुटि. √१अंह्, √अघ्, √२अह्।

[i] क्रिन् प्र. नित्स्वरश्च (पाउ ४,६६; पा ६,१,१९७)।

[j] 'अङ्घ्रिण विष्णू' इति मुपा.। तु. मा २, ८। एवं 'विष्णु->-०ष्णो' इत्यत्र टि. च।

[k] पपा. अनवगृहीतः। 'अंहसः अरिः' इत्येवं व्याचक्षाणौ उ. च म. च पूर्वपदप्रकृतिस्वरमधिकृत्य चोद्यौ भवेताम्। तन्मताभ्युपगमस्तु दासीभारादित्वाच् शक्योऽभिसंधातुम्। वस्तुतस्तु संशीतिबहुलत्वान्नेदमित्थमिति वक्तुं पार्येत। भूयान् व्युत्पत्तिविस्तरः वैश. द्र.। अपपाठान्तरयोः कृते ?अंहारि- इति अङ्गारि- इति च गद्र.।

[l] सस्थ. 'अट्णार-' इत्यत्र वैयुत्पत्तिकं टि. अद्र.।

[m] √अञ्च् इत्यनेन समानार्थकः यद्र.।

[n] शतुः शपश्च निघाते धातुस्वरः (पा ६,१,१८६; १,१६२)।

[o] विशिष्ट इह बाह्वृचः (५, ८१, ३) पाभे.।

[p] बस. अन्तोदात्तः (पा ६,२,१७२)। उप. यद्र.।

[q] तस.। उप. तृतस. द्र.।

[r] तस. अव्यय-पूपप्रस्व. (पा ६,२,२)। उप. यद्र.।

[s] बस. समासान्तः कप् प्र. उसं. (पाग ५,४,१५१)।

?अ-चारुका(क-आस्य>)सन्[a]– -कास्ना शौ २०, ३४, १२.

†अ-चिकित्वस्[b]– -त्वान् ऋ १, १६४, ६; शौ ९, १४, ७; पै १६, ६६, ६.

†अ-चित्[c]– -चितः ऋ ७, ८६, ७; १०४, १; ९, ९७, ५४; काठ २३, ११; कौ २, ४५६; जै ३, ३४, १४; शौ ८, ४, १; पै १६, ९, १; –चितम् ऋ १०, ८७, १२; काठ ४०, ५§; शौ ८, ३, २१; पै १६, ८, १; –चिते ऋ ७, ६१, ५.

†१अ-चित्त[d]– -त्तम् ऋ १, १५२, ५; ६, ४६, १२; –त्तात् ऋ ४, ३, १; तै १, ३, १४, १; मै ४, ११, ४; काठ ७, १६; कौ १, ६९; जै १, ७, ७; –त्तान् ऋ ३, १८, २; काठ ३५, १४; क ४८, १३.

२अ-चित्त[e]– -त्तम् खि १, ९, ४.

¶अ-चित्तपाजस्[f]– -जाः मै १, ९, १§; ५; काठ ९, ९§; १२; क ८, १२.

¶अ-चित्तमनस्[f]– -नाः मै १, ९, १§; ५; काठ ९, ९§; १२; क ८, १२.

अ-चित्ति[g]– -त्तिः ऋ ७, ८६, ६; –†त्तिभिः ऋ ४, १२, ४; मै ३, १६, ५; काठ २, १५; –त्तिम् ऋ ४, २, ११; मा २७, ६; का २९, १, ६; तै. ४, १, ७, ३; ५, ५, ४, ४†; मै २, १२, ५; काठ १८, १६; ४०, ५; क. २९, ४; –†त्ती ऋ ४, ५४, ३; ७, ८९, ५; तै ३, ४, ११, ६; ४, १, ११, १; मै ४, १०, ३; १२, ६; काठ २३, १२; –त्तीः शौ २, ६, ५; –त्या शौ ५, १७, १२–१७; ३०, ३; ३१, १०; ६, ५१, ३; १२, ४, ५१; ५२; पै ९, १३, ३; १५, ८; १६, ३७, ७.

अ-चित्र[e]– -त्रम् ऋ ६, ४९, ११; त्रे– ऋ ४, ५१, ३.

अ-चिष्टु[h]– -ष्टुः मा २०, ४४; का २२, ४, ९; मै ३, ११, १; काठ ३८, ६; –ष्टुम् खि ५, ७, १, १०[i]; मै ४, १३, २; काठ १५, १३.

अ-चेतस्[e]– -तसः ऋ ७, १८, ८; –तसम् ऋ ७, ६०, ६; ७; –ताः ऋ १, १२०, २.

अ-चेतान[g]– -नस्य ऋ ७, ४, ७.

अ-चोदत्[j]– -दते ऋ ५, ४४, २; खि ४, ९, ५.

†अ-चोदस्[e]– -दसः ऋ ९, ७९, १; कौ १, ५५५; जै १, ५७, २.

√*अच्छ्, ?अच्छे[k] पै १, ११२, २; अश्(?च्)छतु, पै १६, १५२, ३[l].

यद्वा वैकल्पिकश्चरितार्थयितव्यः (पा ५, ४, १५४)। कब्-अभावनिगमाश्च मृग्याः। कप्य् उपान्त्यस्वरे प्राप्ते (पा ६, २, १७४) **'कपि पूर्वम्'** (पा ६, २, १७३) इत्युक्तः स्वरः पूर्वविप्रतिषेधेन लब्धावसरः द्र.।

[a]) सा. आधारीकृत्य कल्पितः पाठः द्र.। अतः सर्वथा स्वरूपतश्च स्वरतश्च विमर्शविशेषोऽपेक्षितो भवति। तु. पाण्डु. पाभे.। तस. नञ्-स्वरः (पा ६, २, २)। उप. बस. द्र.।

[b]) तस. नञ्-स्वरः। उप. **√कित्+क्वसुः** प्रत्ययः। **√चित्** **√कित्** इत्येतयोरैक्यमिवातिष्ठमानाः पाश्चात्याश् **√चित्** इत्यस्मादेव मौलिकत्वेन प्रतिपन्नादत्र चान्यत्र चैवंजातीयेषु प्राति. निष्पत्तिमाहुः।

[c]) बस. अन्तोदात्तः (पा ६, २, १७२)। उप. **√चित्+भावे क्विप्**। यत्तु कैश्चित् √१,२चि इत्यतोऽपि निष्पत्तिरुक्ता भवति तद्विस्तरः साक्षेपः वैश. द्र.। एवं तु. **'चित्-'** इत्यत्रत्यं टि. अपि।

[d]) तत्पुरुषबहुव्रीहिसमासाभ्याम् औभयविध्येन विग्रहे सम्भवति क्रमशस् तस. **'परादिश्छन्दसि'** (पा ६, २, १९९) इत्यनेन, बस. **'नञो जर-'** (पा ६, २, ११६) इत्यत्रोपसंख्यानाद् वा स्वरो व्याख्यातव्यः।

[e]) बस. अन्तोदात्तः (पा ६, २, १७२)। उप. यद्र.।

[f]) तस. नञ्-स्वरः (पा ६, २, २)। उप. बस. यद्र.।

[g]) तस. स्वरः नापू. द्र.। उप. यद्र.।

[h]) परोक्षनिष्पत्तिकं प्राति.। **√अच्** इत्यत इत्यर्वाञ्चः। नञ्पूर्वाच् **√चि** इत्यस्माद् वा, **√अञ्च्** इत्यस्माद् वेति उ. च म. च। 'अ-पाक-' इति नञ्-तत्पुरुषस्य साहचर्यादत्रापि तस. एव तु संभाव्येत।

[i]) **अ-चिष्टम्'** इति मुपा.।

[j]) तस. नञ्-स्वरे (पा ६, २, २) प्राप्ते अन्तोदात्त उसं. (तु. पा ६, २, १६०)। उप. **<√चुद्** द्र.।

[k]) अविस्पष्टपदभूयिष्ठं स्थलं द्र.। यथानिर्देशं **'वा'** इति **'ते'** इति पृथक् पदे इव भवतः। तत ऊर्ध्वं **'तानि'** इति **'अच्छे'** इति द्वे पदे स्यातामुताहो एषां चतुर्णां पदानां स्थाने **'वाते तान् यच्छे'** इति पदत्रयी स्यादिति सन्देहो भवति। प्रथमस्य कल्पस्यापेक्षया द्वितीयः साधीयान् प्रतीयते। अर्थस्य स्फुटत्वविशेषसौकर्यात्। एवं च सति मुपा. यथावत् संशोधनीयः। कल्पद्वयापेक्षया **√अच्छ्,** इति **√यच्छ्** इति च विकल्पकल्पने तत्त्वं द्र.।

[l]) अविस्पष्टपदसङ्कुलः मुपा. द्र.। अभिगमनार्थे मन्त्रस्वारस्यप्रतिभानात् तस्मिन्नर्थे यनि. धातुः सुकल्पः स्यात्। तस्मिन्नेवार्थेऽयं धातुराधुनिक्यां पश्चिमोत्तर-भारतीये **रावलपिण्डी-प्रदेशे** प्रवर्त्तमानायां भाषायां लभ्यत इति च भूयस उक्तोपबृंहणाय द्र.।

१अच्छ– **-च्छम्**[a] क **३५**,७.

अच्छु[b]– -०च्छवः पै **२**, ९१, २.

२अ॒च्छ, अ॒च्छा[c] ऋ **१**, २, २; ४४, ४; १०१, ८; १०५, १४; १२९, ५; १३०, १; ५; [१३२, ५; १३९, १]; १६३, १३; १६५, ४; १३; १४; १६७, २; १७३, ११; १८६, ६; **२**, १९, २; ३; ३९, १; **३**, १, १; ४, ३; १५, ५; १९, २; [३३, ५; **६**, ४९, ४]; [३५, १; (**७**, २३, ४)]; ३९, १[d]; ५४, ५; ६१, ५; **४**, १, २; १४, १; २०, २; २१, ४; २४, ८; २९, ४; ३४, १; ३; ३८, ५; ४४, ५; ४५, ७; **५**, १, १; ४; ४२, १५; ४५, ९[e]; ५२, १४; १५; ५९, ६[e]; ७४, ३; ७६, १; **६**, ६, १; १६, १२[f]; ४४[g]; ३०, ४; ३२, ४; ३७, ३; ४१, १; ४४, १५; [४७, ७; **८**, ७१, ६; **१०**, ४५, ९]; ५१, ३; ६७, २; **७**, १, १८; १८, ४[h]; २४, ३; ३४, २०[i]; ५७, ७[j]; [९०, १[k]; (**१**, १३५, २; **८**, ८२, ५)]; ९२, ३[l]; **८**, २, २८; ५, ३३; १६, १०; २२, ४; ३३, १३[m]; ४८, ६; ९३, २३; [१०२, ७; (**५**, ७, १)]; १०३, २; ९; **९**, [(३८, १); ५७, १]; ६४, १६; ६६, [११; १०७, १२]; [१२; (६४, १७)]; ६८, १[n]; ६९, ९^{२}; ८१, २[o]; ९१, १; ९५, ३; ९७, ८; २५; १०८, २; **१०**, १, ७; २६, १; ३०, १; ५; ३२, ५; ४५, ९; ११२, ४; १४३, ५; खि **१**, ४, ८; **२**, ७, ४; **३**, १०, १, ६; †मा **१२**, २६; **१५**, २४; **२०**, ४९; **२७**, २७[l]; **२९**, २४; **३३**, ५५; ७८; †का **१३**, २, ९; **१६**, ५, ५; **२२**, ५, ३; **२९**, ३, ४; **३१**, ३, १३; **३२**, ५, १; ६, ९; †तै **१**, १, २, १४; ५, ६, ३; **२**, २, १२, ८; **४**, २, २, ३; ३, १३, ६; ४, ४, २; ६, ७, ५; मै **१**, १, २; ६, ४¶; **२**, ७, ९; १३, ७†; **३**, ९, २¶; †**४**, १, २; १०, १; ६^{२}; ११, २; ३^{३}; १४, १८; काठ **१**, २; **२**, १५; **८**, १७; **९**, १८†; **१०**, १२; **१६**, ९; **३१**, १; **३५**, २; **३८**, ७; **४६**, ३; क **४१**, २; **४७**, १^{२}; ¶; †कौ **१**, २१; ७३; १५१; ४५९; ४६१; ५१४; ५४३; ५४४; ५६३; ५६६; **२**, ८; ९; १२; ४३; ११७; २२९; २९६; ४६७; १०९६; ११०२;

---

[a]) एवं किल मूलकोशीयसाद्ध्यनिभृतो मुपा. भवति। शाखान्तरीयायाऽन्यप्रकारकाय पाठाय तु '**?अच्छंवषट्कारम्**' इत्यत्र टि. द्र.।

[b]) कर्तर्य् उः प्रत्ययः (तु. पा **३**, २, १६८)।

[c]) आद्युदात्तत्वं सांहितिको दीर्घश्च (फि **४**, १२; पा **६**, ३, १३६)।

[d]) '**आ॒···जिगाति**' इति क्रियया योगं वष्टि PW. किन्तु **मतेरागमनस्य**, इन्द्राभिमुख्यार्थविशिष्टत्वस्यात्र प्राधान्येन श्रावयितुमिष्टत्वात्तथात्वस्य चासमासाङ्गभूतेनैव सुतरां वक्तुं योग्यत्वात् कर्मप्रवचनीयता समुचिता द्र.।

[e]) तु. नापूटि.। अत्राप्याभिमुख्यार्थस्य श्रावणे मन्त्रस्वारस्यात्तस्य च कर्मप्रवचनीयतायोगेन सुसाधत्वात्तथात्वं निरदेशीति दिक्। गतित्वार्थम् तु. GW. PW.।

[f]) उत्तरेण '**विवाससि**' इति क्रियापदेन योग इति सा. GW. च। तु. शब्रा **१**, ४, १, २७; तैब्रा. **३**, ५, २, २.।

[g]) GW. गतिसंज्ञमाहोत्तरेण '**याहि**' इति क्रियापदेन युक्तम्। तन्न। तस्य तदुत्तरेणाऽऽङा विशिष्यान्वयप्रतीतेः। तु. सा.।

[h]) '**आ॒···गन्तु**' इति क्रियया योग इति GW.।

[i]) '**आ॒···गमन्ति**' इति क्रियया गतियोग इति GW.।

[j]) '**आ॒···जिगात**' इति क्रियया गतित्वयोगार्थम् तु. GW. PW.। पार्थक्येनान्वयार्थं च तु. सा.।

[k]) पूर्वेण '**याहि**' इति क्रियापदेन युक्तमिति सा.। तद् विमृश्यं भवति। तथात्वेऽप्याङ्पूर्वत्ववतोऽर्थस्य प्रकरणापेक्षितस्याक्षेपसाध्यत्वाद् व्यर्थप्रयासादित्यर्थः। तु. ऋ **६**, १६, ४४।

[l]) गतिं पूर्वेण '**यासि**' इति क्रियापदेनाभिसम्बद्धं सा. आह '**प्र**' इति स्पष्टं श्रावितमुपसर्गं तु स विस्मरतीति चित्रम्।

[m]) गतिरिति सा. GW. च। उत्तरेण '**शृणवत्**' इति क्रियापदेन योगात्।

[g]) क. -मम् इत्येवं मूको.। ततो लब्धसङ्केतः काठ. सं. -मम् इत्याकारकं मूको. -माम् इत्याकारतया शोधयेत्। उभयथापि साधु भवति। कथमिति। काठ. तावद् एकादशिनी विशिष्यते (तु. अनुपदं श्रूयमाणं सत्रिया इति पदम्)। सैवं यथा स्यात् तथेति कृत्वा क. च क्रिवि. श्रूयत इत्येष विवेकः द्र.। यत्तु क. सं. -रमे इत्येवं श्रावयितुमिच्छति, तत्र मूको. प्रामाण्यमनुपलभमानोऽभाव् आपश्रौ. १४, ७, २० इत्यत्र प्रयुक्तस्य तादृशस्य शब्दस्य साद्यमुदाहरति। निष्प्रयोजनस्त्वयमुपक्रमो भवति। अन्या हि काठकी कापिष्ठली च शाब्दी प्रवृत्तिरन्या च श्रौतसूत्रीया शाब्दी प्रवृत्तिः। प्रथमा तावद् एकादशिनी-विशेषण-द्वारिकेत्यवोचाम। उत्तरस्यां च **अतिरात्राणां चरमः** इति कृत्वाऽऽवसानिकोऽतिरात्र एकादशिन्युपलक्षितकर्मविशेषस्य कृत औपयिककाल-लक्षणतयोपस्थाप्यते। तद् एवमुभयोः प्रयोगयोः साधुत्वाऽव्यभिचारसामान्येऽपि शब्दप्रवृत्तिभेदानुरोधेन सौत्रात् पा. सांहितिकः पा. विवेक्तव्य इति दिक्।

[h]) दिवा. कर्तरि प्रयोगः। मै. १, ११, ९ इत्यत्र श्रूयमाणम् एतत्-समानरूपि रू. स्वरभेदात् कर्मणि यगन्तं यक्-स्वरं चेत्येवमतो विवेक्तव्यं भवति (द्विउ. रू.)। कर्त्रर्थकर्मार्थयोर् भिन्नयोरपि सतोरिह तात्पर्यतोऽभेदः द्र.।

क **४१**, २; **४४**, ९^{3}; **४५**, ४^{2}; **४७**, १^{2}; ¶अ॒तिरिच्येते तै **७**, ४, १०, २; ११, २; मै **४**, ७, ५; काठ **३३**, २; ४; अ॒ति (रिच्येते) मै **४**, ७, ५; ¶अ॒तिरिच्यन्ते मै **४**, ३, ३; ६, ४; ७, ५; ९^{2}; अतिरिच्यसे पै ८, १८, १०; अ॒त्यरिच्यत ऋ **१०**, ९०, ५; मा **३१**, ५†; का **३५**, १, ५; तै **२**, ३, ६, १¶; ¶मै **१**, ११,५; **२**,२,८; ¶काठ **१०**,१०; ¶क **३६**,१; कौ **३**,४, ७†; जै **२**,३,१०†; शौ **१९**,६, ९; पै **९**, ५, ७; अत्यु॒रिच्यत मै **२**, ४, ३; **३**, ६, ८¶; ¶काठ **१४**, ५; **२३**, ४; **३०**,७; अति …अरिच्यत काठ **१०**, १०¶; अतिरिच्येरन् काठ **३४**, १.

अ॒ति…रिरि॒चे ऋ **६**, २१, २; अ॒ति…अरेचि मै **४**, ७, ४¶.

¶अति√रेचि, अ॒तिरेचयति तै **७**, ३, १, २; मै **४**, १, २; ८, ९; काठ **३१**, १; क **४७**, १; अ॒ति… रेचयतः मै **४**, ६, ७; अ॒ति… रेचयन्ति तै **६**, ६,११, ५; अ॒तिरेचयेत् मै **३**, ६, ८; **४**, ८, ९; काठ **१३**, १०; **२६**, ४^{3}; **२७**, ५; **२८**, १^{2}; **२९**, ८^{2}; क **३६**,२; **४१**, २^{3}; **४२**, ५; **४४**, १; अ॒ति…रेचयेत् तै **२**, ५, ११, ४; **३**, ४, १, ३.

अ॒ति-रिक्त,क्ता[a]- -¶क्तः तै **७**, १, ५,६; १०, ३; ४,१०, २; ११, २; मै **२**, २, ११; **४**, ७, ४^{2}; काठ **२४**, १; २८, ९^{3}; **३३**, २; ३; क **३७**, २; **४४**, ९^{2}; शौ ८, ९, १७§; पै **१६**, १९, ७§; –क्तम् ऋ ८, ५८, ३[b]; खि **१**, ४, १; ¶तै **१**, ८, ६, २; **२**, ३, १२, २; **३**, ४,१,२-४; **६**, ३, ४, ७;८^{3}; **७**,५, ५, २^{2}; ¶मै **१**, ४, ११^{2}; **२**, २, ११^{2}; **३**, ७, ९^{2}; **४**, ८, ५^{2}; ¶काठ **१३**, १०^{2}; **१४**, १०^{3}; **२३**, ४; **२४**, १; **२६**, ६; **२८**,९^{3}; **३०**, ७^{2}; **३४**, ४^{3}; **४०**, ५; ¶क **३६**, १; **३७**,२^{2}; **४१**,४; **४४**,९^{3}; –¶क्तस्य तै **३**, ४,१, ४; –¶क्ता तै **७**, १, ५, ६; –¶क्ताः तै **७**, ४, ७,३; मै **४**, ७, ३; काठ **२९**, ८; **३०**, ७; –¶क्तात् तै **७**, ४, ७,३; मै **२**, २, ११; –¶क्ते तै **३**, ४, १,४; **७**, ५, ५, २; काठ **१३**, १०; **३४**, ४; –¶क्तेन तै **७**, ५, ५, २; काठ **१३**, १०; **१४**, १०; **२४**, १; **२८**, ९; **३०**,७; **३४**, ४; क **३७**, २; **४४**, ९. [°क्त-ऊन°]

अति-रेक- अन्°

अति√रुच्, †अतिरो॒चते ऋ **१०**, १८७, २; जै **३**, ३२, २; शौ **६**, ३४, ३; †अ॒तिरोचसे ऋ **१**, ९४, ७; शौ **१३**, १, ३६; पै **१२**, १, ७.

अति<>ती-रु॒च्[c]- -रुभ्याम् मा **२५**, ३; का **२७**, ३, २; मै **३**, १५, ३.

¶अति<>ती-रोकु॒[d]- -काः काठ **२३**,१; क **३५**,७; –कान् मै **३**, ६, १; काठ **२२**, १३.

अति-रो॒चमान[e]- -नम् ऋ **१०**, ५१, ३.

अति√रुह्, †अतिरो॒हति ऋ **१०**, ९०, २; मा **३१**, २; का **३५**, १, २; कौ **३**, ४, ६; जै **२**, ३, ९; पै **२**, ८१, २; अ॒ति… अरुहत्[f] शौ **१९**, ४९, २.

ϕअति-रो॒हत्[g]- -हन् ऋ **९**, १७, ५.

अति√रेज्[h], अ॒ति… रेजन्ते ऋ **१**, १४३, ३.

अ॒ति-लोमश[i]- -शम् मा **३०**, २२; का **३४**, ४, ४.

¶अति√वद्, अ॒तिवदति तै **५**, ४, ७, ७; **६**, १, ८, १; मै **३**, ७, ६; काठ **२१**, १०.

---

[a]) कर्मणि निष्ठायामनन्तरगतिस्वरः (पा ६,२,४६)।

[b]) ‘अ॒ति। रिक्तम्’ इति पपा. अपेक्षितमध्याऽवग्रह-विहीनोऽनपेक्षितविराममध्यो मुद्रापकप्रमाददुष्टः द्र.।

[c]) मै. उपसर्गस्य क्विपि दीर्घः (पा ६, ३, ११६)। गत्युत्तर-कृत्-प्रकृतिस्वरः (पा ६,२,१३९)।

[d]) उस. घञन्ते कृति थाथादि-स्वरः (पा ६,२,१४४) उपसर्गस्य च दीर्घः (पा ६,३,१२२)। मै. नायं दीर्घः।

[e]) गस. शानजन्त-कृद्-उपप्रस्व. (पा ६,२,१३९)।

[f]) ‘अ॒धि…अरुहत्’ इत्यभिमतः पाठः संटि. द्र.।

[g]) गस. शत्रन्ते कृति उपप्रस्व. (पा ६, २, १३९)।

[h]) यदत्र अक्तु॒ः > -क्तुम् इति विभक्तिं विपरिणमय्य सा. तत्सम्बन्धेन कप्र. अपश्यत्, तद् भ्रान्तम्। अक्तु- इत्यस्येहोपमानभावेन श्रूयमाणत्वप्रतीते रात्रिपर्यायत्वा-ऽभावात्। अस्य च योऽर्थः ऋ २, ३०, १ इत्यत्राऽपां गतिमतीनामभिसंबन्धेनाभिप्रेतो भवति स एवेह सिन्धु-त्वेन विशिष्टः सन्नग्नेः सिन्धूनां सतां त्वेषाणां स्यन्दन-शीलत्वमुखेनौपम्यौपयिकतामापद्यमानः द्र.। एवं चाग्ने-स्त्वेषा अतिशयेन रेजन्ते गतिमन्तो भवन्तीति सा. अनभिप्रेतोऽपि सन् प्रकरणेन संगततर इति सदर्थः द्र.। ‘न’ इत्यस्याऽनिषेधार्थीयत्वादिति दिक्।

[i]) प्रास. पूपप्रस्व. (पा ६,२,२)। धातुलोप-विषयाऽभा-वादिह ‘अतेः’ (पा ६,२,१९१) इत्यन्तोदात्तो न भवति।

अति···वदति मै ४, २, १; अति···वदत्[a] खि ५, १५, ६; अतिवदेत् शौ ११, ३, २५; पै १६, ५४, ११.

¶अति-वाद[b]- -दे[c] तै ६, ४, ५, २. [°द- अन्°]

अति-वादन- } अन्°
अति-वादुक- }

अति√वन्, ‡[d]अति···वनामहे कौ २, २४३; जै ३, २१, ८.

अति√वह्, †अति···ववक्षिथ ऋ [१ ८१, ५; १०२, ८]; ३, ९, ३; कौ १, ३१२; जै १, ३२, १०; ४, ६, १; †अति···वक्षत् ऋ ६, २२, ७; शौ २०, ३६, ७.

अति√वा, अतिवाति शौ ४, ५, २.

अति√वी, अति···वेति ऋ ५, ४४, ७. अति···वेष्यत्[e] पै २, ६१, १.

अति√१वृ

¶अति-वरेण्य[f]- -ण्यः काठ २४, १; क ३७, २.

?अति-वृद्धि[g] पै १६, ६०, २.

अति√व्यथ्

अति-व्यथ- दुर्°

अति√व्यध्→विध्, अति···विध्यति ऋ ४, ८, ८; अतिविध्यन्ति काठ ३८, १४; शौ ८, ५, १९; पै १६, २८, ८.

अतिव्यात्सीः तै ७, ५, १०, १.

†अति-वि(द्ध→)द्धा[h]- -द्धा ऋ ८, ९६, २; मै ३, ८, ३; ४, १२, ५; काठ ९, १९.

अतिविद्ध-भेष(ज→)जी[i]- -जी शौ ६, १०९, १.

†अति-विधे[j] ऋ ५, ६२, ९; मै ४, १४, १०.

अति-व्याध- अन्°

अति-व्याधिन्[k]- -धी मा २२, २२; का २४, ८, १.

अति-व्याध्य- अन्°

अति√व्रज्

अति-व्रजत्[l]- -जद्भिः ऋ १, ११६, ४.

अति√शद्>शीय्, अतिशीयन्ते मै २, ६, १^{२}; ४, ३, १; काठ १५, १.

अति-शर्वर[m]- -रे शौ ४, ४; ५, -रेषु शौ ७, ८५, ४.

अति√शस्

अति-शस्[n]- -शसा खि ५, ५, ७.

¶**अति√शिष्**, अत्यशिष्यत तै २, ४, १२, १; ५, २, १; ६, १, ३, ३; ४, २, १; ६, ८, १.

अति-शिष्ट[h]- -ष्टाय तै ७, ३, २०, १; काठ ४३, १०.

अति-शुक्ल[o]- -क्लम् मा ३०, २२; का ३४, ४, ४.

अति√१शुच्

अ(ति>)ती-शोक[p]- -कः पै १, ३२, ३.

---

a) तु. अभि···विदत्, नृ इति शौ २०, १३०, १४ पाभे.।

b) गस. उप. घञन्ते कृति थाथादि-स्वरे (पा ६, २, १४४) प्राप्ते परादि-स्वरः उसं. । न च गस. मा भूत् प्रास. भवत्विति वाच्यम् । तथात्वेऽप्य् अव्यय-पूपप्रस्व. प्राप्ते (पा ६, २, २) परादिस्वरस्य उसं. ऋते निर्वाहासम्भवादिति यावत् ।

c) 'गायत्री···नातिवादे (भवति)' इत्येवम् एकं वाक्यं पपा. द्र (तु. भा.) । KT. त्वत्र वाक्यद्वयं वष्टि । 'गायत्री (भवति)' इत्येकं 'नातिवादो (भवति)' इत्यपरम् इत्येवं तन्मते प्र१ इति विवेको विमृश्यः ।

d) 'अति···मनामहे' इति ऋ (९, ४१, २) पाभे. ।

e) तु. ऋ १, १८९, २ । किमत्राऽपि 'विश्वा' इत्यस्य स्थाने 'वेष्यत्' इत्यपपाठो भवत्य् उताहो √वी इत्यस्याऽत्युपसृष्टस्याऽन्तर्भावित-ण्यर्थे तिङ्-वृत्तमित्यत्र विमृड्भिः प्रततप्रयत्नैर् भाव्यम् ।

f) प्रास. । उप. यद्र. ।

g) यमु. पा. चिन्त्यः । अ-व्यृद्धि- यद्र. ।

h) कर्मणि क्तेऽनन्तरगतिस्वरः (पा ६, २, ४९) ।

i) षतस. सासस्व. (पा ६, १, २२३) । उप. स्त्रियां ङीप् (पा ४, १, ३०) । यत्तु सा. प्रथमवर्णके बस. इत्याह । तन्न । तथात्वे हि पूपप्रस्व. स्यात् । यदप्युत्तरवर्णके अतिविद्ध- इति कर्त्तरि क्तान्तमित्याह । तदपि न । अप्रसिद्धेरसामर्थ्याच्च साहसमात्रताऽव्यभिचारादिति । न चेहाभीष्टः षतस. तदविदित इति क्षेपः । तद्विद्वानपि क्षिप्तभेषजी- इत्यत्र तत्रैव द्वितीये वर्णके तथा व्याचक्षाणोऽपि यदनायासेनोल्लक्षणं व्याकरणविहारमभिरोचयते न च तत्र दोषलवमपि शङ्कते तेनैव चित्रीयते चेतः ।

j) केनन्त-कृद्-उपप्रस्व. (पा ६, १, १९७; २, १३९) ।

k) ताच्छील्ये णिनिः । कृद्-उपप्रस्व. (पा ६, २, १३९) ।

l) गस. शत्रन्त-कृत्स्वरः प्रकृत्या (पा ६, २, १३९) ।

m) प्रास. 'अहःसर्व-' (पा ५, ४, ८७ उउ.) इत्यत्र समासान्ताऽच्प्रकरणे शर्वरी- इति उसं. । तेनाऽकारान्ततापत्तिश्च चित्स्वरश्च द्र. (पा ६, १, १६३) ।

n) 'अतिशषा' इति मुपा. चिन्त्यः । असंगतेः । तु. तत्रैव संटि. यतः साद्दयाऽन्तरबलेन दन्त्यसकारान्तं प्राति. मूलतोऽभिप्रेतमिति सुलभं भवति ।

o) प्रास. अव्ययपूपप्रस्व. (पा ६, २, २) ।

p) उस. उप. भावे घञ् । पूप. दीर्घः (पा ६, ३, १२२) । 'अभिशोकः' इति शौ (१, २५, ३) पाभे. ।

अति√शो(→शा), अति···शिशीते ऋ १, ३६, १६.

अति√श्रा>श्र

अति-श्टत[a]– -तम् मै १, ८, २.

अति√ष(<स)ञ्ज्[b]

अति-ष(क्त>)क्ता[a]– -क्ता शौ १२,३,२३;–¶क्ताः,–¶क्ताभिः काठ २५, १; क ३८, ४.

अति√षि(<सि)[c]

†अति-षित[a]– -तम् ऋ १०, ७३, ९; कौ १, ३३१; जै १,३४,९.

अति√ष्क<>स्कन्द्[d], अतिस्कन्दति काठ ६, ३; क ४, २; अतिष्कन्दन्ति ऋ ५, ५२, ३.

अति-ष्कदस्(>:)[e] ऋ १०,१०८,२.

अति-ष्कदे[f] ऋ ८, ६७;१९.

अति-ष्कु(द्वन्>)द्वरी[g]– -रीम् मा ३०, १५; का ३४, ३, २.

अति√ष्ठि(<स्ति)घ्[h]

अति√तिष्टिघिष

अति-तिष्टिघिषत्[i]– -षन् मै १, ६, ३.

अति-ष्टिघम्[j] मै १, ६, ३.

अ-तिष्ठत्[k]– -ष्ठन्तम् ऋ १०,८९,२.

†अतिष्ठन्ती[l]– -न्तीनाम् ऋ १, ३२, १०; पै १३, ६, १०.

¶**अ-तिष्ठमान,ना**[k]– -ना तै ६, १, ४, १; ४, ११,२; –नाः तै २, २, ११, ४; ५; ६, २, २, १; –ने तै ६, १, ३, १.

अति√ष्ठा(<स्था)[m]→तिष्ठ,अतितिष्ठति काठ १३, ४; †अत्यतिष्ठत् ऋ १०,९०,१; मा ३१, १; का ३५, १, १: कौ ३, ४, ३; जै २, ३, ६; शौ १९, ६, १: पै ९, ५, १.

अतितस्थौ ऋ १०, ६०,३.

अति-ष्ठा[n]–

अतिष्ठा-वत्[o]– -वान् शौ ३, २२, ६.

अति-ष्ठावन्[p]– -वा पै २, ६९,५.

अति-ष्ठाय[q] शौ १९, ३३, ५; पै १२, ५, ५.

अति-ष्ठाय[r]– -यः;-यम्[?] काठ १३,४.

अति-सर्ग- अति√सृज् यद्र.

अति√सह्, अति[s] (सहस्व);(अति) ···सहस्व तै ४, १, ७, ३; अति[s](सहस्व); (अति)···सहस्व मा २७, ६; का २९, १, ६.

अति√सृ, अतिसरः पै ५, ३१,७.

अति-सर्[t]– -राः शौ ५, ८, २;

---

[a]) कर्मणि क्तेऽनन्तरगतिस्वरः (पा ६, २,४९)।

[b]) 'उपसर्गात्' (पा ८,३,६५) इति षत्वम् ।

[c]) 'परिनिविभ्यः' (पा ८, ३, ७०) इत्यत्र अतीत्यस्य उसं. षत्वम् द्र. ।

[d]) 'परेश्च' (पा ८, ३, ७४) इत्यत्राऽतेर् उसं. द्र. । तेन शाखाभेदेनाऽतिपरस्य √स्कन्द् इत्यस्य षत्वविकल्पः सुसाधः स्यात् (तु. रू.) ।

[e]) गस. कसुन्नन्त-कृद्-उपप्रस्व. (पा ६, १, १९७;२, १३९) ।

[f]) उप. तुमर्थे केन् प्रत्ययः । सस्व. नापूद्र. ।

[g]) गस. क्वनिबन्त-कृद्-उपप्रस्व. (पा ६, २, १३६) । स्त्रियां ङीब् रेफान्तादेशश्च (पा ४,१,४) ।

[h]) पा ८,३,६५ इत्यत्रोपसंख्यानाद् षत्वम् ।

[i]) सन्नन्ताच् शत्रन्तं प्राति. द्र. । गत्युपपद-कृद्-उपप्रस्व. । सनो नित्त्वादाद्युदात्तत्वे प्राप्ते (पा ६,१,१९७) अभ्यासात् परस्य स्वरः उसं. (पा ६, १, १९२) ।

[j]) गस. उप. कमुल् प्रत्ययः । कृद्-उपप्रस्व. (पा ६, १, १९३; २, १३९) ।

[k]) तस. नञ्-स्वरः (पा ६,२,२) । उप. यद्र. ।

[l]) स्त्रियां ङीपः (पा ४,१,६) पित्त्वान्निघाते स्वरेऽभेदः ।

[m]) षत्वम् (पा ८,३,६५) कृद्रूपेष्व् औपयिकं द्र. ।

[n]) नाउ. मतुबन्तस्य सिद्धयौपयिकं सदेतत् प्राति. तत्तादवस्थ्याधीनसत्ताकं द्र. । यस्थि. उप. भावे अङ् (पा ३,३,१०६) । ततः स्त्रियां टाप् । गत्युत्तरकृत्-प्रस्व. (पा ६, २, १३९) ।

[o]) मतुपः पित्त्वान्निघाते नापू. स्वरेऽविशेषः । यदिह सा. एतद्=नाउ. इत्येवमभिसंधायैतद् वनिबन्ततया विकल्पेन व्याचिख्यासति, तदरुचिरमिव भवति। पपा. 'वान्' इत्यवयवस्याऽवगृहीतत्वाद् मतुपस्तदास्था-विषयत्वस्य स्पष्टत्वाद् वनो नलोपाऽभावस्य च छान्दसत्वेन व्याख्येयस्य व्यर्थप्रयासाऽनर्थान्तरत्वात् ।

[p]) गस. उप. वनिप् प्रत्ययः (पा ३, २, ७४) । प्र१ रूपे नलोपः (पा ८,२,७) द्र. ।

[q]) गस. ल्यबन्त-कृद्-उपप्रस्व. (पा ६, १,१९३; २, १३६) इह सा. 'अधिष्ठाय' इति पाठमाह ।

[r]) गस. 'आतश्चोपसर्गे' (पा ३,१,१३६) इति सगतिकेभ्य आदन्तेभ्यो धातुभ्यः क-प्रत्ययेऽनुशिष्टे सत्यपि 'श्याद्' (पा ३,१,१४१) इत्यत्र सोपसर्गादपि √स्था इत्यस्मात् तदपवादात्मकः कर्त्तरि णः प्र. उसं. । युगागमः (पा ७,३,३३) ।

[s]) 'अति···तर' इति पाठं तै. मा. काठ. शौ. पठन् BC. उपेक्ष्यः भिन्नपाठदर्शनादिति (तु. अति√चर्> ···चर, इत्यत्र च अति√तॄ>···तर, ···तर इत्यत्र च टि. ।

[t]) पचाद्यचि थाथादि-स्वरः (पा ३, १, १३४; ६, २, १४४) ।

पै ७, १८, २; -०राः शौ ५, ८, ४; पै ७, १८, ४; ५; -रान् शौ ५, ८, ७.

अति-सृत्य पै ७, १८, ५.

अति√सृज्, अतिसृजति काठ २४, ७; अतिसृजामि शौ १०, ५, १५-२१; १६, १, ४; पै १०, ९, १; १६, १२९, १-१०; अति…सृजामि शौ १६, १, ७; पै ५, ३२, १; अतिसृजामः शौ १०, ५, १५-२१; अति…सृजन्तु शौ ४, १६, ६; अतिसृजस्व पै ५, २४, ८; अतिसृज शौ १५, १२, २; अतिसृजेत् शौ १५, १२, ३.

अतिसृज्यन्ते मै १, ४, ६.

†अति…असृक्षत ऋ ९, १०७, २५[a]; कौ १, ५२२; जै १, ५३, १०.

अति-सर्ग[b]- -र्गम् मै २, १३, २२; काठ ४०, १२.

अति-सृष्ट[c]- -ष्टः मै १, १, २; शौ १५, १२, ४; ७; १६, १, १; -ष्टाः शौ १६, १, १. [°सृष्ट-अन्°]

अति√सृप्, †अतिसर्पति ऋ ८, १०२, २१; मा ११, ७४; का १२, ७, ९; तै ४, १, १०, १; मै २, ७, ७; काठ १६, ७; शौ ४, २०, ९; †अतिसर्पति ऋ ९, ८६, ४४; कौ २, ९६५; जै ४, २०, १०; अतिसर्पात् शौ ४, १६, ४; अतिसर्पेत् तै ६, ३, १, ५^{२}; काठ २६, १; क ४०, ४.

अति-सृपे[d] मै ३, ८, १०.

अति√स्कन्द् अति√ष्कन्द् द्र.

अति-स्थूल[e]- -लः मै ३, ९, ४¶; -लम् मा ३०, २२; का ३४, ४, ४.

अति√स्रस्[f], अतिस्रसेम ऋ ६, ११, ६.

अति√स्रु, अत्यस्रवत् मै ४, २, १२.

अति-स्रुत- -तः[g] मा १०, ३१; का ११, १०, १; मै २, ३, ८; ३, ११, ७.

अति√स्वृ, अति…स्वर्षत्[h] कौ ४, ६; ७^{२}.

अति√हन्, अतिहन्यात् मै २, २, १¶.

अति-घातम्[i] मै २, ४, ५.

अति-घ्न[j]-, >घ्नी-

अतिघ्न्य[k]- -घ्न्यः शौ ११, ७, १६; पै १६, ८३, ६.

अति-ह(त→)ता- -ताः पै १३, ५, २.

अति√२हा

अति-हाय[l] ऋ १, १६२, २०; मा २५, ४३†; ¶तै २, ६, ६, ६; ४, ६, ९, ४†; ६, ३, १, ३; ¶मै १, ८, ५; ३, ८, १०; काठ ६, ५; ४६, ५†; क ४, ४.

?अतिहायति[m] पै ५, २१, २.

अति-हित- अति√धा द्र.

अति√हु, अतिजुहोति मै ३, ४, १.

¶**अति√हृ**, अतिहरेत् तै ६, ३, ९, ५; अतिहरेत् तै २, ६, ८, ४; ६, ३, ९, ५; मै ३, १०, १^{२}; काठ २८, १.

†अतिजभ्रिषे[n] ऋ [९, ८६, २९; १००; ९]; कौ २, ३६८; जै ३, ३०, ११.

अति-ह्रस्व[e]- -स्वम् मा ३०, २२ का ३४, ४, ४.

अति√ह्वे, अतिह्वये पै ५, ४, ९.

अती(√ति√इ), अत्येति ऋ ६, ४, ५; ९, ७२, ३; [८५, ९; ८६, ७];

---

[a] √सृज् इत्यस्य ण्यन्तेन √गम् इत्यनेन समानतात्पर्यपर्यवसानकत्वात् कर्मीभूतानां सोमानां पवित्राऽतिक्रमणेन तत्पूर्वकं धारया सृज्यमानत्वेन च समानमन्वितत्वाद् गतित्वमभ्युपेयमन्यथाऽऽस्थश्च सा. उक्तादेव हेतोरुपेक्ष्यश्च द्र.।

[b] उप. घञन्ते कृति थाथादि-स्वरः (पा ६, २, १४४)।

[c] कर्मणि क्तेऽनन्तरस्य गतेः प्रस्व. (पा ६, २, ४९)।

[d] केनन्त-कृत्-स्वरः प्रकृत्या (पा ६, १, १९७; २, १३९)।

[e] प्रास. अव्यय-पूपप्रस्व. (पा ६, २, २)। उप यद्र.।

[f] अति√ध्वस् इत्यत्रत्यं टि. द्र.।

[g] शाखान्तरीयः पाभे. 'अतिद्रुतः' इति अति√द्रु इत्यत्र टि. द्र.।

[h] शाखान्तरीयः अति…पर्षत् इति पाभे. अति√पृ इत्यत्र गद्र.।

[i] आभीक्ष्ण्ये णमुलि कृद्-उपप्रस्व. (पा ३, ४, २२; ६, १, १९३; २, १३९)।

[j] घञर्थे टक् प्र. उसं. (पा ३, २, ५३)। उपधालोपः कुत्वञ्च (पा ६, ४, ९८; ७, ३, ५४)।

[k] तस्येदमित्यर्थे यति तित्स्वरितं द्र. (पा ४, ३, १२१; ६, १, १८५)।

[l] अतिक्रमणेऽतिलङ्घन इत्यर्थः। त्यागार्थस्याऽसंगतेर् अति√१हा स्यादित्येवं भ्रमो न स्यात्। ल्यबन्त-कृद्-उपप्रस्व. (पा ६, १, १९३; २, १३९)।

[m] विकृतः पा. संस्करणान्तरसापेक्षः। अत्य् अंहतिम् अति नो हिनुष्व इद् इति त्रैष्टुभः पादो मूलतः संभाव्येत।

[n] केवलं मौलिकस्य धात्वादेर् हकारस्य भकारतया दर्शनं भवति। अभ्यासांऽशस्य जकारतया श्रुतेर् बकारतया श्रूयमाणाभ्यासाद् √भृ इत्यस्माद् विवेकः सुकरः द्र.।

[१६, ६; १७]; १०, ३१, ९; मा ४०, ४; का ४०, १, ४; तै ३, ४, ११, २†; ६, १, ४, ९¶; मै ४, १, ९¶; १२, ६†; काठ २३, १२†; †कौ २, २९४; ५२५; †जै ३, २४, १०; ४१, १; शौ १०, ८, १६; पै १६, १०२, ५; ¶अत्येति तै ६, ६, २, १^{२}; मै ४, १, ३; काठ १२, ११; ३१, २; ७; ३७, १२; क ४७, २; ७; अति…एति मा ३१, १८; का ३५, २, २; तै ६, ३, ३, १¶; काठ २६, ३^{२}; शौ १२, २, ११; अती(←ति)…एति मै ३, ९, २¶; अति-यन्ति ऋ १, ३२, ८; ९, ६९, ९; तै ३, २, २, १; २; मै ४, ५, २¶; शौ १८, ३, १७; पै १३, ६, ८; †अत्येपि ऋ ९, ९७, ३१; कौ १, ५३४; जै १, ५५, २; शौ १३, १, ५७$; अत्येषि ‡[a]कौ १, ५६२; २, ६६६; ‡[a]जै १, ५७, ७; ३, ५५, ७; शौ १८, १, ३९‡[a]; १९, ३३, ३; पै १२, ५, ३; अति…एतु शौ ६, ७५, ३^{२}‡[b];

†अतीतम् ऋ १०, ८५, ३२; शौ १४, २, ११; अतीहि ऋ ८, ३२, २१; मा ३, ६१^{२}; का ३, ८, ६^{२}; तै १, ८, ६, २; मै १, १०, ४; २०; काठ ९, ७; ३६, १४; क ८, १०; कौ १, २२३†; जै १, २४, ११†; †अति…इहि ऋ ३, ४५, १; ९, १०७, १९; मा २०, ५३; का २२, ५, ७; कौ १, २४६; ५१६; २, २७२; १०६८; जै १, २६, ४; ५३, ६; ३, २३, ४; शौ ७, १२२, १; १०, १, १६$; पै १६, ३६, ६$; अति…इहि ऋ ८, ३२, २२; अति…अयाम शौ १२, ३, १८; अत्यायन् काठ १२, ३¶; ¶अतीयात् तै ६, ३, १, ६; ४, २, ३; मै ३, ८, ९; १०; ¶अतीयात् तै ६, ४, २, ३; मै ३, ८, १०^{३}; ४, १, ४; काठ २६, १^{३}; ३१, ३; क ४०, ४^{४}; ४७, ३; अतीयाम ऋ ५, ५३, १४.

अति…एषः[c] शौ ९, ५, ९; पै १६, ९७, १०.

अती(ति-इ)त– -ताः पै १३, ५, १५.

अती(ति-इ)त्य काठ ३२, ६^{३}¶.

अती(ति-इ)त्व(त्वन्>)री[d]– -रीम् मा ३०, १५; का ३४, ३, २.

ϕअती(ति-ई)यिवँस्[e]– -वांसम्, अति(ईयिवांसम्) ऋ ३, ९, ४.

अत्या(ति-आ)य[f]– -यम् शौ १०, ८, ३; पै १६, १०१, ६.

अत्या(ति-आ)यम्[f] ऋ ८, १०१, १४.

अत्ये(ति-ए)तवै[g] ऋ ५, ८३, १०.

अत्येतु- दुर्°

अती-काश– अति√काश् द्र.

अती(ति√ई) क्ष्, अतीक्षेत काठ ३४, १८.

अ-ती(क्ष्ण>)क्ष्णा[h]– -क्ष्णाम् काठ २५, १; क ३८, ४.

अती-रुच्-, अती-रोक- अति √रुच् द्र.

अ-तीर्ण[i]– -र्णम् ऋ ८, ७९, ६.

¶अ-तीर्त्ति[j]– -र्त्यै काठ १९, २; क २९, ८.

¶अ-तीर्थ– -र्थम् काठ २६, ८;

---

[a]) 'पर्येति' इति बाह्वृचः (९, ८२, १) पाभे. ।

[b]) एकतरत्र 'अति' 'इहि' इति ऋ(८, ३२, २२)पाभे.द्र.।

[c]) लेटि सिपि अटि मपु२ द्र. । यत्तु GW. प्रमृ. √एष् इत्यत एतद् रू. इत्याहुस्तन्न। लेडर्थस्येह विवक्षितत्वाद् अस्य रू. च ततो लेटि ग्रहीतुमशक्यत्वात् । एषतु (शौ ६, ६७, ३) इत्यत्र उपेषन्तम् (शौ ८, ६, १७) इत्यत्र च कामम् ?√एष् वा स्यात् तन्मूलभूतः √१इष् इति वा स्यान्न त्विहाऽन्यथान्वये प्रकरणे । ननु तत्राऽप्युभयत्र √इ इत्यत एवं रूपकल्पनां कुरु किं वृथाऽनया धात्वन्तरकल्पनयेति चेत् । तर्हि मैवं जल्प । तथाऽभ्युपगमे √इ इत्यस्य लेडङ्गाद् इव सतो लोट्-सद्-अन्यतर-प्रत्ययोत्पत्तिप्रसङ्गात्तस्य च नितान्तं दुष्कल्पत्वादिति दिक् ।

[d]) गस. उप. क्वनिपः पित्त्वान्निघाते धातु-स्वरः प्रकृत्या (पा६, २, १३९)। स्त्रियां ङीब् रेफान्तादेशश्च (पा ४, १, ७)।

[e]) स्वरसंस्कारार्थम् अति√या>अतिययिवँस्-इति द्र.।

[f]) समानायां श्रुतौ शाखाभेदेन भिन्नस्वरपर्यवसायिनी भिन्ना शब्दप्रवृत्तिर् द्र. । तथाहि, उभयत्र क्रिवि. एतदिलेवं सत्यपि बाह्वृचे उप. णमुलन्तम् अव्य. लिति प्रत्यये तत्पूर्वधातुस्वरविशिष्टम् (पा ६, १, १९३) भवति। शौ. च ण-प्रत्ययान्तस्य (पा ३, १, १४१) प्रत्ययस्वरेणाऽन्तोदात्तस्य प्राति. द्वि१ भवतीति विवेकः सुलभः । उभयत्र तावद् गत्युत्तरकृत्-प्रकृतिस्वरः (पा ६, २, १३९) भवतीति स्पष्टम्। अत्रोक्तप्रकारेण भिन्नां शाब्दीं प्रवृत्तिमविविञ्चानाः PW. GW. MW. प्रभृ. अर्वाञ्चोऽप्रमाणं स्युः ।

[g]) तवै-प्रत्ययान्तस्य द्वैस्वर्यं भवति (पा ६, २, ५१) ।

[h]) तस. उप. तीक्ष्ण- यद्र. ।

[i]) तस. नञ्-स्वरः (पा ६, २, २)। उप. <√तॄ यद्र.।

[j]) तस. उप. √तॄ+भावे क्तिन् द्र. ।

क ४१, ६; –र्थेन काठ २६, ७[a]; क ४१, ५.

अती-शोक्- अति √१शुच् द्र.

¶**अती**(ति √१इ) **ष्**, अत्यैषन् मै १, १०, १४; काठ ३६, ८.

अ-तुर[b]– -रः पै ५, १३, ७; -राणाम् शौ ७, ५२, २. ?आतुर- यद्र.

?**अ-तुर्मुह्य**[c]– -**ह्यम्** मै २, १, ९^{२}¶.

अ-तूतुजि[d]– -**जिम्** ऋ ७, २८, ३.

१अ-तूर्त[b]– -र्तम् ऋ ८, ९९, ७; काठ २, १५[e]; कौ १, २८३; जै १, ३०, १; शौ २०, १०५, ३.

२अ-तूर्त[f]– -र्तः ऋ १, १२६, १. खि ५, ५, १; तै २, ५, ९, २; -र्तम् ऋ ५, २५, ५; मै ४, ११, १; -र्ते ऋ १०, १४९, १.

अ-तूर्तदक्ष[g]– -क्षा ऋ ८, २६, १.

अ-तूर्तपथिन्[h]– -न्थाः ऋ ५, ४२, १; १०, ६४, ५.

अ-तृदिल[i]– -लासः ऋ १०, ९४, ११.

---

a) **'तीर्थेन'** इति मुपा. मुद्रणप्रमादजः ।

b) तस. नञ्-स्वरः (पा ६,२,२)। उप.< √तुर् यद्र.।

c) गुणप्रतिषेधेऽत्र नञ्-तस. **'ययतोः'** (पा ६, २, १५६) इत्युक्तोऽन्तोदात्तः । उप. **तुर्मुह्–>तुर्मुह्य-** यद्र. । यत्त्व् (**अन्तर्मुह्-** >) **अन्तर्मुह्य-** इतीव R. पा. चिक्लृप्सते (तु. SBW.), तदपि विमृश्यम् । तथा सति ***अन्तर्मुह्-** इत्यतो भावे यः प्रत्ययः **उसं.** (पा ५, १, १२६) तत्स्वरश्च द्र. ।

d) तस.नञ्-स्वरः (पा ६,२,२)। उप.< **√तुज्** यद्र.।

e) बाह्वृच्यां समानायां श्रुतौ (तु. ऋ ५, २५, ५) उत्तरादिस्वरः । केवलं शाखाभेदेनायं विसंवाद उत वा किमप्यन्यद् भेदकं निमित्तं भवतीत्यादिविमर्शः वैश. विस्तरणीयः ।

f) बस.उप.भावे क्तः प्र. । **'नञो जर-'**(पा ६,२,११६) **इत्युपलक्षणं** न त्वत्र परिगणनमिति वक्तव्यम् । किमर्थमेतदुच्यत इति । यथा **तूर्त-** प्रभृ. लक्ष्याण्यपि समाविश्येरन्निति । यदा **१अ-तूर्त-** इति तस. भवति तदा क्तः कर्मणि भवति । यदा च **२अ-तूर्त-** इति बस. भवति तदा **क्तो** भावे भवतीत्युक्तपूर्वया दिशोभयोः प्रयोगयोरर्थसामान्याभेदेऽपि सूक्ष्मः कोऽपि शाब्दिको विवेकः द्र. ।

g) तस. नञ्-स्वरः (पा ६,२,२) । उप. बस. यद्र. । **'अतूर्त-दक्षा'** इति पपा. भवति । ततो न मन्येत यथाऽत्र नञ्-पूर्वं शब्दरूपं बस. भवतीति च **अतूर्त-** इति तत्र बस. पूप. भवतीति च । प्रवृत्तिर्ह्येषा पपा. भवति यथा निषेधार्थीयो नञ् नाऽवगृह्यत इति । ततः किमिति । ततोऽत्र **तूर्त-** इत्येतद् मूलतो नञा पुरश्चिकीर्षितं भवति **तूर्त-दक्ष-** इति वेति विनिश्चयो दुष्कर इति । कथमिति । उभयथापि स्वराऽविशेषे सामान्यार्थाविशेषे च सति विशेषणतायोगसामान्यादिति । तथाहि । यदा **तूर्त-** इत्यनेन नञ् मूलतः समस्यते तदा प्रथमं नञ्-स्वरस् तस. जायते । पश्चाच्चासौ **दक्ष-** इत्यनेन समस्यमानः बस. पूपप्रस्व. उपजनयति । कल्पान्तरे तस. उक्तः स्वरः । एवमर्थेऽपि तात्पर्यतः सामान्यं भवति । तद् यथा । यदा तस. तदा भावविशेषविशिष्टेन पदार्थविशेषेण विशिष्टो नञा विशिष्येत । यदा च बस. तदाऽसौ नञ्विशिष्टभावविशेषेण विशिष्टेन पदार्थविशेषेण विशिष्येत । अत एवंविधेषु निगमेषु तैस्तैर् व्याख्यातृभिः क्वचिद् बस. इति क्वचित् तस. इति क्वचिच्च बस. वा तस. वेति ताटस्थ्येन विकल्पभूयस्त्वमिव यदभाजि तेन नैव कापि चित्रीया सावसरा स्यात् । एस्थि. अपि यथा श्रौती शाब्दी प्रवृत्तिस् तस. विशेषेण पुष्णती दृष्टिपथमवतरति तथा नाउटि. द्र. ।

h) नापूटिदि. सस्व. द्र. । अत्र **तूर्त-पथिन्-** इति उप. समासान्तः अः प्र.(पा ५,४,७४) सामान्येनाऽनिवार्यप्रवृत्तिरपि सन् यल्लब्धावसरो न भवति तेनैतज् ज्ञापितं भवति यथा नञ्-संनियोगेन समासान्ताभावीयं यदनुशासनं (पा ५, ४, ७१) भवति तस्याऽयं विषय इति । स च समासान्ताऽभावो नञ्पूर्वशब्दान्तात् तस. एवाऽनुमतो भवति । अत्र **पथिन्-** इति स्वस्य च तदन्तस्य च समस्तशब्दरूपस्य समानं ग्राहको भवतीति तन्त्रसमयः विदुषां सुविदितः । यच्च **'पथो विभाषा'** (पा. नाउ.) इति **पथिन्-** इत्यस्याऽस्मिन् नञ्-संनियोगेन समासान्ताऽभावप्रकरणे विकल्पविषयत्वमन्वशासि तस्य तावद् **अ-पथ-** इत्यत्र यस्था. निदर्शनं भवति । तद् विनिगमनाऽन्तरस्य नितान्ताऽभावेऽत्रत्यः समासान्ताऽभाव एव विनिगमको भवति यथैतत्प्रकारकेषु नञ्-पूर्वपदेषु समस्त-शब्दरूपेषु सर्वत्राऽसति बाधकाऽन्तरे तस.भवतीत्येवमेवाऽभ्युपेयमिति। अतो यत् सा. **'अतूर्तस्त्वरारहितः पन्था यस्य'** (ऋ १०, ६४, ५) इत्येवं व्याचक्षाणोऽत्र बस. इत्यातस्थे तन्मन्दमिव भवति । तथात्वे नञ्पूर्वत्वाऽभावे तत्पुरुषाऽभावे च समासान्ताऽभावस्य दुरुपपादत्वात् । अपरं चाप्यत्र दूषणं भवति । तद् यथा । त्वरा-रहितत्वेन व्याख्यायमानं पूप. बसः भवेत् । तेन च तद् **२अतूर्त-** इत्याकारकं स्यान्न तु **१अतूर्त-** इत्याकारकम् । एवं चाऽभ्युपगते सति प्रकृते बस.पूपप्रस्व.नञ्-स्वरो नैवोपपद्येत।

i) तस. नञ्-स्वरः (पा ६,२,२)। उप. <**तृद्** यद्र. ।

अ-तृप[a]- -पासः ऋ ४, ५, १४.
अ-तृप्णुवत्[b]- -वन्तम् ऋ ४, १९, ३.
अ-तृषित[c]- -ताः ऋ १०, ९४, ११.
अ-तृष्णज्[d]- -ष्णजः ऋ १०, ९४, ११.
अ-तृष्य[e]- -ष्याः शौ ७, ६२, ४; ६. -ष्यासः पै ३, २६, ३.
अ-तृष्य(त्→)न्ती[c]- -न्ती ऋ १, ७१, ३.
अ-तेजस्[f]- -जसम् शौ २, १९, ५; २०, ५; २१, ५; २२, ५; २३, ५; -¶जाः काठ ३५, १७; क ४८, १५.
?अतैषैता[g] पै ५, ३१, २.
अतोऽधि- एतद्→५अ यद्र.
अत्क- √अत् यद्र.
अत्तवे, अत्तुम्, अत्तृ-, अत्त्वा-, अत्त्वाय √अद् यद्र.
?अत्मन्- अत्य- √अत् द्र.
अत्यं(ति-अं)हस्[h]- -हाः मा १७,८०; का १८, ७, १; तै १, ८, १३, ३; ४,६, ५,५; मै २, ६, ६¶; ११,१; काठ १८, ६; क २८,६.
¶अत्य(ति-अ)ग्र[i]- -ग्रम् तै २, ६, ५, ४^{२}; काठ २५,५^{२}; क ३९, २^{२}.
अत्य(ति-अ)णु[h]- -णुः मै ३, ९, ४.
अत्य(ति-अ)न्त- -न्तः पै १५,२३,१३.
*अत्य(ति-अ)न्न-
¶अत्यन्न(न्न-अ)दु[j]- -दः मै ३,२,६.
¶अत्य(ति-अ)प√हन्, अति····अपहन्ति मै २, १,५; काठ ११,५.
अत्य(ति√अ) र्ह्, †अति···अर्हात ऋ २, २३, १५; मा २६, ३; का २८, २, १; तै १, ८, २२, २; मै ४,१४, ४; काठ ४, १६; ४०, ११[k].
†अत्य(ति-अ)वि[l]- -विः ऋ ९, १३, १; कौ २, ५३७; जै ३, ४२, ३; -विम् ऋ [९, ६, ५; ४५, ५; १०६, ११]; कौ २,

---

a) तस.नञ्-स्वरे (पा ६,२,२) प्राप्तेऽन्तोदात्तः (पा ६,२, १५७)। उप.हि क-प्रत्ययान्तम् (पा ३,१,१३५) भवति। गुणप्रतिषेधे चाऽशक्त्यर्थपर्यवसानके समासः। तृप्- यद्र.।

b) तस. नञ्-स्वरः (पा ६, २, २)। उप. √तृप् (स्वा.) इत्यस्य शतरि रूपम्।

c) समासस्वरौ न.पूटिदि. द्र.। उप. <√तृष्।

d) तस.नञ्-स्वरः (पा६,२,२)। उप.पाप्र.√तृष् इत्यतो नजिङ् प्र. (पा३,२,१७२) साध्यमानं किमिति पपा.तृष्णज्- इत्येवं प्रत्ययाऽन्तःखण्डनेन विभज्यत इत्यत्र विमृशां भूयसी विमृष्टिः शरणायताम्। यथा च *तृष्ण+*अज्- (<√अज्)> *तृष्णाऽज्->तृष्णज्-इत्येवं शकन्ध्वादित्व-प्रकारिका (तु. पावा ६,१,९४) मौलिकी वस्तुस्थितिः संभाव्येतेत्यस्य भूयानपि विस्तरो भवति तथा अ-स्त्रभज्- इत्यत्र च यथायोगम् उप. च यद्र.।

e) तस. नञ्स्वरे (पा ६,२,२) प्राप्ते '**ययतोः**' (पा ६, २, १५६) इत्यन्तोदात्तः। उप. तृष्- शब्दाद् अर्हत्यर्थे यत् प्र. (पा ५,१,६७)।

) बस. अन्तोदात्तः (पा ६,२,१७२)। उप. यद्र.।

g) दुष्पठं संदिग्धं संस्करणान्तरसापेक्षं च प्राति. द्र.।

h) प्रास. अव्यय-पूपप्रस्व. (पा ६, २,२) उप. यद्र.।

i) अतिक्रान्तमग्रं यथा स्यात्तथेत्यर्थात् क्रिवि. भवति। समासस्वरौ नापूटि. द्र.।

j) सोपपदाद् √अद्+टः प्र. उसं. (पा ३, २, २०)। कृत्स्वरः प्रकृत्या (पा ६,२,१३९)। तु. अन्नाद्- इटि.।

k) रेफरहितो मुपा. **शोधार्हः**।

l) इह च अत्यंहस्- इत्यत्र च प्रास. अव्यय-पूपप्रस्व. अपवादरूपोऽन्तोदात्तः (पा ६, २, १६१) किमिति न प्रवृत्तिं लभत इत्युपपादनाऽर्हो विषयः। ननु तत्र कृद्भिन्नविषयत्वमुपात्तं भवतीह च कृदन्तभूतोणादिप्रत्ययसाधितविषयस्य कृद्विषयत्वाऽव्यभिचारात् तदविषयत्वमिति चेत्। तर्हि नैवं वाच्यम। अत्यन्नाद्- इत्यत्राऽकृद्भिन्ने विषयेऽन्तोदात्तप्रवृत्त्यभावाऽतिप्रसङ्गात्। न चाव्याप्त्यतिव्याप्तिपरिहाराय '**अतेर् धातुलोप इति वक्तव्यम्**' (पावा ६, २, १९१) इत्युक्तं भवतीति वा चोद्यपरिहाराय स्यादलमिति मन्तव्यम्। लक्ष्ये धातुलोपाऽनुगमदर्शनसामान्यात्। कस्तावत् समाधिरिति। यत्र मौलिकः क्रियांशः प्रधानो भवत्यप्रधानश्च नामीभावस्तत्र तावद् धातुलोपनिरपेक्षमन्तोदात्तः प्रवर्त्तमानः द्र.। तदेवंविधेषु निगमेषु प्रास. अपेक्षया गस. आस्थेयतरः। तद् यथा अति-जीव-, अति-दाहु-, अति-याज-, अति-मान-, अति-सन्ध- प्रभृ. गस. सुलभो भवति। एवम् अत्यन्नाद्- इत्यत्र √अद् इत्यनेन नेदीय इव संबद्धः सन् गतीयमानोऽतिर् भिन्नक्रमः। गस. चोत्तरकृत्-प्रकृतिस्वरः। यद्वा, एपूटिदि. अत्यन्नमिति प्रशस्ताऽन्नार्थे प्रास. पूपप्रस्व. स्यात् तत उस. च तथाप्युत्तरकृत्प्रकृतिस्वरत्वादिति यावत्। अथ यत्र वैयुत्पत्तिकः क्रियांशो गुणतामुपैति प्रवृत्तिविशेषानुरञ्जितो नामीभावश्च प्राधान्यं भजति तत्र खलु सत्यसत्यपि धातुलोपे प्रास. अव्यय-पूपप्रस्व. च। यथाऽसति धातुलोपे तावद् अति-कृश-, अति-कृष्ण-, अति-मेमिव-, अति-ह्रस्व-, अति-शुक्र-, अत्यणु-, अत्यन्तिक-, प्रभृ.। यथा च सति धातुलोपे अति-पूरुष-, अत्यंहस्-, अत्यवि- प्रभृ.। अत्यग्र-, अति-च्छन्दस्- प्रभृ. धातुलोपे सत्यसति चोभयथापि सुवच इत्यपरो विवरणविषयो विशेषश्च द्र.। अन्ततश्च यत्राऽतेर्

२९१; जै **३**, २४, ७.

अत्य(ति√२अ)**श्**→आशि

अत्या(ति-आ)शित[a]– -तस्य, –तेन मै **३**, ६, २.

अत्य (ति√१अ)**स्**, अत्यस्तु ऋ **७**, १, १४; अति…स्यात्[b] मै **३**, ३, २^{२}¶; अति…स्यात् मै **३**, २, ६; ३, २; **४**, ५, ८; अति… स्याम शौ **११**, १, १२; २१; पै **१६**, ९०, ९; ९१, २.

अत्यास- वि°

अत्या(ति-आ)**√क्रम्**

¶अत्या-क्रम्य[c] तै **६**, २, ३, ३.

अत्या (ति√आ)**प्**

अत्या(ति-आ)प्ति[d]– -प्तिः शौ **११**, ९, २२; पै **१६**, ८४, २.

अत्याय्-, अत्यायम् अती(ति√इ) द्र.

अत्या(ति-आ)**√या**, अति…आयातु ऋ **१०**, ४४, १[e]; अत्यायाहि ऋ **३**, ३५, ५; अति…आयाहि ऋ **३**, ४३, २; ˈअत्यायातम्[f] ऋ ५, ७५, २; कौ **२**, १०९४.

अत्या(ति-आ)**√सृ**, अत्यासरत् पै ५, ३१, १.

¶अत्या-सारि(न्→)णी[g]– -णी तै **२**, ६, ५, ४; –णीः क **३९**, २.

अत्या(ति-आ)**√सृज्**, अत्यासृजामि पै **१६**, १२९, १–१०.

¶**अत्या**(ति-आ)**√ह्वे**, अत्याह्वयति मै **४**, २, ७[d]; अत्याह्वयन्ति मै **१**, १०, १६; अत्याह्वयत् मै **४**, २, ६; अत्याह्वयन् काठ **३६**, ९; अत्याह्वयेत् मै **४**, २, ७. अत्याह्वयिष्यामि मै **४**, २, ६^{२}. अत्याहूयन्ते मै **४**, २, ६.

अत्यु(ति-उ)**द्**→**त्√पत्**→पाति, अति…उत्पातय पै **६**, २२, २४.

¶**अत्यु**(ति-उ) **द्√ग्रह्**, अत्युद्गृह्णीयात् मै **१**, ६, ६; काठ ८, १२; क **७**, ७.

अत्युद्-गृह्य[h]– -ह्यः मै **१**, ६, ६.

अत्यु(ति-उ)**प√धा**, अत्युपदधाति मै **३**, २, ४¶.

अत्यु(ति√उ) **ह्**[i], ˈअति…ओहते ऋ ८, ६९, १४; शौ **२०**, ९२, ११.

¶अत्यौहीत् मै **४**, ३, ८; ७, ८.

अत्यू(ति-ऊ)**र्मि**[j]– -र्मिः ऋ **९**, १७, ३.

अत्यृ(ति√ऋ)**ष्**, ˈअति…अर्षति ऋ ९, ८६, ४४; १०७, १७; कौ **१**, ५२०; **२**, ९६५; जै **१**, ५३, १२; **४**, २०, १०.

अत्ये(ति-आ√इ), अत्यायन्ति शौ **११**, १२, १४; अत्यायन्तु शौ **११**, १२, १५; अत्येहि पै **४**, १४, २; ४.

उत्तरवर्त्तिनो नामीभावपूर्त्तावपि मौलिकभावात्मकता नैव विहन्येत तत्र धातुलोपविषयत्वे सति गस. असम्भवत्यप्य् अन्तोदात्त एव प्रवर्त्तमानः द्र.। यथा **अति-नाष्ट्र-**(शब्रा.) इत्यत्र। तस्मादस्याऽन्तोदात्तानुशासनस्य कृद्विषयत्वे सति धातुलोपस्याऽन्यथासिद्धायमानत्वात् साक्षाद्-धात्वर्थ-प्राधान्येन विशेषणीयत्वं द्र.। अथाऽकृद्विषयत्वे तस्य श्रौतनिदर्शनाभावे प्राक्तनाचार्यवचनप्रामाण्याद् धातुलोपे सतीति विशेषणमुपादेयम्। तेन हि **अत्यङ्कुश-** प्रभृ. उक्तः स्वरः प्रवर्त्तेत। शोभनो गार्ग्यः **अति-गार्ग्यः** इत्येवमादिषु च न प्रवर्त्तेत। एवं तावत् सूत्रे यथान्यासम् **'अकृत्पदे'** इति ध्रियमाणं सदेव **'धातुलोपे सति'** इत्येवं पुनर्विशेषणमुपाददीत। दिशा चानयाऽकृन्मात्र-विषयत्वमस्यानुशासनस्य मूलत आचार्यस्याभिप्रेतमित्यादिनिष्कर्षः सम्यग् अवधेयः।

a) गस. (तु. अत्यवि-) अण्यन्तकर्तृभूत-कर्मणि क्तेऽनन्तरगतिस्वरः (पा **६**, २, ४९)।

b) इवाऽर्थाऽनुरञ्जितोपसर्गार्थविशिष्टत्वं क्रियार्थस्याऽभिप्रयती श्रुतिर् इवस्य गतेश्च क्रियायाश्च मध्ये श्रावणमनुरुन्धाना द्र.। व्यवहितगतिप्रयोगमननुमन्वाने लोके नैवंविधाऽतिसूक्ष्मा शाब्दी प्रवृत्तिरनायासेनाभिव्यञ्जयितुमलमिति दिक्।

c) गस. ल्यबन्त-कृद्-उपप्रस्व. (पा **६**, १, १९३; २, १३९)।

d) गस. अनन्तरगतिस्वरः (पा **६**, २, ५०)।

e) **अति** इत्यत्रत्यं सस्थ. टि. द्र.।

f) मन्त्रादावपि सतः क्रियापदस्योपसृष्टत्वाद् अतिङ उत्तरत्वे तिङ्ङंशस्य निघातो गतिद्वये च प्रथमस्य गतेर्निघातः (पा ८, १, २८; ७०)।

g) **णिनि**-प्रत्यायान्तात् स्त्रियां ङीप्। तस्य पित्त्वान्निघाते स्वरस्तदवस्थः।

h) गस. कृद्-उपप्रस्व. (पा **६**, २, १३९)। उप. **क्यबन्ते** (पा **३**, २, ११९) प्रत्ययस्य पित्त्वनिघाताद् धातुस्वरशेषः।

i) **√२ऊह्** इत्यत्रोपसृज्येतेत्यर्वाञ्चः PW. प्रभृ. अभिप्रयन्ति। तथात्वे लघूपधत्वाभावाद् गुणबाधः प्रसज्येत (पा **७**, ३, ८६)। यत्त्विह √२ऊह् इत्येवं यस्था. संकेत्यमानो वितर्कार्थे पाध्या. भवति, सोऽप्यत्राऽनुपयुक्तो भवति। गुणबाधप्रसङ्गसामान्ये सति वाच्यार्थाऽसंबन्धादिति यावत्। न च **√ओह्<आ+√२ऊह्** इत्येवमुपसर्गान्तरकल्पनया **'आ+ऊहते'** इत्येवं व्याख्येयमिति निर्बाधम्। तथात्व आङः सस्वरत्वे सति **'ओहते…ओहसे'** इत्यनुदात्तयो रू. असंभाव्यमानत्वादिति दिक्। अपि च उपसर्गस्येह द्विः पाठोऽनर्थक इव द्र.।

j) प्रास. पूपप्रस्व. (पा **६**, २, २)। विस्तरः **'अत्यवि-'** इत्यत्र टि. द्र.।

अत्ये(ति-ए)त्य काठ १२, ३.
अत्येतवै, अत्येतु- अती(ति√इ) द्र.
१अत्र-, २अत्र- √अद् द्र.
३अत्र ६अ<एतद्- द्र.
¶अ-त्रपु[a]- -पु मै १,८,२; क ४,२[b].
अत्रप्व(पु-अ)यः(←स्)पात्र[c]- -त्रम् काठ ६, ३.
?अत्रव्याः ?जत्रव्य- द्र.
अ-त्रस्नु[d]- -स्नू मै ४, १३, ९.
अ-त्रासुक[e]- -काः मै ४, २,३¶.
अत्रि-, अत्रिन्- √अद् द्र.
?अत्रिरिच्चंतयूते[f] पै १३, ३, ५.
अ-त्वॅक्-
अ-त्वक्क[g]- -क्काय तै ७, ५,१२, २; काठ ४५, ३.
?अत्वाभ[h] पै १६, ७२, ४.
अ-त्स(र→)रा[i]- -राभिः मै ३, १५, ६.
अत्साः √त्सर् द्र.
अत्स्यत्- √अद् द्र.
√*अथ्[j]
१*अथ[k]-
*अथ-र[l]-
*अथर्[m]-
?*अथरि[n]-
अथरी[o]- -र्यः[p] ऋ ४,६,८.
√अथर्य[q]

---

[a]) बस. 'नञ्सुभ्याम्' (पा ६,२,१७२) इत्युक्तः स्वरः। अत्रपुस्- इति चापि मूको. द्र.।

[b]) अत्र वैयाकरण-सौक्ष्म्यनिदानभूतः शाखान्तरीयः पाभे. भवति। तु. अत्रप्वयः पात्र- इति नाउ. टि. द्र.।

[c]) त्रपुभिन्नस्याऽयसः पात्र- इत्यर्थः। अयस उत्तरपदत्वात् तत्-स्थस्य विसर्जनीयस्य 'अतः' (पा ८, ३, ४६) इति प्राप्तस्य सकारादेशस्याऽभावो भवति। शाखान्तरीये (क ४, २) मूपा. सकारादेशस्याऽस्य सद्भावस्तत्र पद-पार्थक्यं ज्ञापयेत्। तद् यथा 'अत्रपु। अयस्पात्रम्' इति। तथात्वे ह्यनुत्तरपदस्थस्य विसर्जनीयस्योक्त आदेश उपपद्येत। अहो सूक्ष्मेक्षिकाऽऽचार्यस्य यदेवंविधानि तत्तच्छाखीयानि शाब्दानि प्रवृत्तिरहांस्यप्यलक्षयद् इति। एस्थि. क. ४, २ इत्यत्र काठकीयपाठभेदमेनं सुसूक्ष्ममनाद्रियमाणेन संस्कर्त्रा टि. अपार्थमेव शोधप्रास्ताविकमुट्टङ्कनमकारीति दिक् (तु. अत्रपु-, अयस्पात्र-, तद्गते सस्थ. टि. च)। BW. प्रभृ. अत्र 'अत्रपु अयःपात्रम्' इति पदद्वयमनुमेनिरे तच्चिन्त्यम्।

[d]) तस. नञ्-स्वरः (पा ६, २, २)। उप. √त्रस्+क्नुः प्र. (पा ३, २, १४०)।

[e]) व्युत्पत्ति-स्वरार्थम् अ-घातुक- इटि द्र.। उप. <√त्रस्।

[f]) श्रुतिरत्र विमृशां विमर्शार्हा द्र.।

[g]) अ-चर्मक- इत्यत्र टि. द्र.।

[h]) 'अन्वाभवः' इति शोधः स्यात्। (यतु. <अन्वा-√भू। 'अनु' इत्यत्र सस्थ. टि. च द्र.)।

[i]) बस. उत्तराऽऽदिस्वरः उसं. (पा ६, २, ११६)। उप. <√त्सर्+घञर्थे कः प्र. (पावा ३,३,५८) यद्र.। पपा. अनवगृहीतः शाखान्तरीयः अच्छल- (तै ५, ७, १३, १) इति पाभे. त्स>छ इत्याकारकस्य प्राकृतिकस्य विकारस्य निदर्शनं भवति (तु. उत्सर>पंजा., हि. उच्छल प्रभृ.)।

[j]) उ. निष्पत्त्यौपयिक्य् अर्वाक्तनी काचित्की कल्पना द्र. (तु. MW., WW (१, ४२); ?अथन- (या ११, १८) इति च)।

[k]) उ. निष्पत्त्यौपयिकत्वैकदृक् कल्पना भवति (तुटि. अथ-र-, √अथर्य)। पचादित्वादच् चित्स्वरश्च (पा ३, १, १३४; ६, १, १६३)।

[l]) नापू. >ताद्धितः र-प्रत्ययान्तः उ. निष्पत्त्यौपयिकः द्र. (तुटि. अथरी-, √अथर्य)।

[m]) नाउउ. मूलभूतमेतद् <नापू. यद्वाऽन्यथा निष्पन्नम् अग्निपर्यायभूतभाषान्तरीयसजन्माभिसंबद्धं प्राति. भवतीत्यर्वाञ्चः (तु. GW., MW.)। एतत् ष१ भवति अॅथ्+अस् (>अर्) इतीवाऽप्य् अभिसन्धिर् भवति च (तु. WW १, ४२)। नाउउ. ष१ कथं बत मूलतामियाद् इति कृत्वाऽभिसंधिर् अयमनादरार्हः।

[n]) एपू. यद्वा नापू.>अस्य नाउ. निष्पत्त्यौपयिकी कल्पना भवति (तु. GW., MW.)। अनुमन्वाना अप्य् अस्य सत्ताम् √अत् इत्यस्माद् एतत् प्राति. इतीव प्राञ्चस्त्वातस्थिरे (दे २, ५)।

[o]) 'कृदिकारात्' (पाग ४, १, ४५) इति नापू. ङीष्-प्रत्ययान्तः। यद्वा अॅथर्- इत्येव मूलं प्राति. तस्य च √२अस्>अस्->तर- इत्येवं निष्पन्नस्य सतोऽन्यस्य वा कस्यचित् सरूपप्रायस्य सतः प्राकृतिकविकारात्मकं स्यात् (तु. पा ५, ३, ९० प्रभृ.; उद्धृतपर्यायभूतं पंजा. अथरा इति च)। एवं च अथ-र- इत्यतः स्त्रियां ङीष्य् उदात्तनिवृत्तिस्वरः (पा ६, १, १६१)।

[p]) प्र३। 'उदात्त-' (पा ८, २, ४) इति स्वरितः। यत्तु ष१ इतीवाऽर्वाञ्चो मन्वते (GW. BW.) तन्नैव सत्। 'उदात्तयणः' (पा ६,१,१७४) इत्युदात्तत्वदुर्वारत्वप्रसङ्गात्।

[q]) कण्ड्वादीनामाकृतिगणत्वात् (पा ३, १, २७) नाधा. यगन्तः द्र. (तु. निघ. २, १४ [तत्र √रथर्य इति मूको. पाभे. अपि यद्र.)। अयं च तावत् पाभे. प्रामाणिकतरः स्याद् अस्यैव तिङ्कृद्वृत्तस्य गत्यर्थे बाहृवृचश्रवणोपलम्भाद् √अथर्य इत्येतस्य च तिङ्वृत्तस्याऽश्रव-

अथर्यु*[a]- -०र्यै मा ३, ३७.

†**अथर्यु**[b]- -र्युम् ऋ ७, १,१; काठ ३४, १९; ३९,१५.

अथर्वन्[c]- -†र्वणः ऋ ६, १६, १४; १०,४८,२; मा ११, ३३; का १२, ३, ६; तै ३, ५, ११, ४; ४, १, ३, ३; मै २, ७, ३; काठ १६, ३; शौ १०, २, २७$; पै १६, ५९, १०$; **-र्वणा** ऋ १०,२१,५; **-र्वणाम्** शौ १६, ८, १६; **-र्वणि** ऋ ८, ९, ७; शौ २०, १४०, २†; **-र्वणे** शौ ७, १०९, १; **-०र्वन्** शौ ५, ११, २; पै ८, १, २; **-र्वभिः** काठ ५, ४; १८, १८; क २९, ६; **-र्वभ्यः** ऋ ६,४७, २४; मा ३०, १५; का ३४,३, २; पै १६, ९४, ६; **-र्वा** ऋ १, ८०, १६; ८३, ५; ६, १६, १३; १०, ९२, १०; १२०,९; मा ८, ५६; ११,३२^{2};†; १५, २२†; का ९, ७, ४; १२, ३, ४; ५†; १६, ५,३†; तै ३, ५, ११, ३†; ४, १, ३, २^{2}; ४,४, १†; ९, १; ¶५, १,४,३^{2}; ६, ६, ३; मै २,७,३†; ३, १,५¶; काठ १६, ३^{2}; †; १९, ४^{2};¶; क ३०,२^{2};¶; कौ १,९†; जै १, १, ९†; शौ ५, २, ९†; १०, २, २६; १०, १२; १७; १८, ३, ५४; १९, ४,१; ५४, ५; †२०, २५, ५; १०७, १२; पै ५, २, ७; ६, १, ९†; १२, २, १५; १६, ५९, ९; १०८, २; ६; **-र्वाणः** ऋ ९, ११, २; १०, १४, ६; मा १९, ५०†; तै २, ६, १२, ६†; †कौ २,२; जै ३, १, ४†; शौ ४, ३७, १; १०, ६, २०; ११, ८, १३; १८, १, ५८†; पै ५, ११,४; १३, ४, १; १५, १४, ६; १६, ४४, ३; **-र्वाणम्** शौ ४, १,७;

णात् कृद्वृत्तस्याऽपि गत्यर्थेन संबन्धाऽभावसंभावनाच्चेति दिक्])। यक् प्र. चेह *अथ-र्- इत्यतो वा स्याद् *अथर्- इत्यतो वा (तु. GW. प्रभृ.) अथाप्य् *अथ- इत्यतो वा। उत्तमे कल्पे रेफो मध्योपजनः द्र. (तु.रथ->√रथर्-य्)।

[a]) **पचाद्य्- अच्** (पा ३, १, १३४)। चित्- स्वरः (पा ६, १, १६३)। एतत्-प्रभृ. सजातेषु पपा. अवग्रहाऽभावो भवति। अयं चेह विवेकः सुवचः। **क्यच्**-प्रकारकेण प्रत्ययेन निष्पन्नस्य नाधा. तिङ्सु च कृत्सु च रू. पपा. अवग्रहो भवतीति च (तु. **अघायुति**, अघायुत्-, अघायु- प्रभृ.) **यका** निष्पन्नेषु च तेषु तेषु रू. पपा. अवग्रहो न भवतीति च (तु. **√इरज्य्**, **√इरस्य्**, **√इषुध्य्**, **√दुवस्य्**, प्रभृ.)। यत्त्विह **√वल्गू-य्** इत्येवं पपा. अवगृह्यमाणः नाधा. **कण्ड्वादिषु** (पा ३, १, २७) आचार्यैर् अपाठि तत्रोक्तविवेकतः पुनर्विमर्शार्हत्वं द्र.। **√अत्** इत्येतत्-संबन्धसंकेतार्थं नाउटि. द्र.।

[b]) **उः** प्रत्ययः **'क्यात्'** (पा ३, २, १७०) इत्यत्र **यकोऽप्य्** **उसं.** द्र.। प्रत्यय-स्वरः। एतच् च नापू. च नाउ. च प्राग्भिर् मूलतः<**√अत्** इत्येवमभिसमधायि (तु. या५, ११; उ. म. सा. च यस्था.)।

[c]) औणादिकः(४,११३) **वनिन्** प्र. **उसं.**। अतो लोपे (पा ६, ४, ४८) यकारलोपः (पा ६, १, ६६)। नित्-स्वरः (पा ६, १, १९७)। यद्वा माध्यमिक-रेफोपजनपूर्वकम् *अथ- इत्यतः **उसं.** *अथर्यु- इति ताद्धितात् सतस्तद्धिते **वनिन्**-प्रत्यये निष्पत्तिः। अथापि वा *अथर्- इत्यतो **वनिप्**-प्रत्यये तद्धिते निष्पद्यताम्। प्रथमे पूर्ववद् नित्-स्वरः। उत्तरे च प्रत्ययस्य पित्त्व-निघाते प्रकृतिस्वरः द्र.। यत्तु या. (११, १८) **अथनवन्तः** इत्याह तद् विमर्शविशेषमर्हेत्। तद् यथा। स्वरूपतोऽर्थतश्च किमेतद् **अथन-** इति जिज्ञास्येत। सरूपप्रायस्य नापू. निर्वचने **अतन-वत्-** (नि ५, ११) इति यदुपलभ्यते तदेवेह लेखक-प्रमादतो वर्गद्वितीयमध्यतयोपलभ्येतेति प्रथमः कल्पः। **√अथ्** इत्यस्य प्राक्-प्रसिद्ध्यभावाद् इति यावत्। ***अ-थर्वण-वन्तः** इत्यस्य वा ***अथर्व-वन्तः** इत्यस्य वा मूलतो यास्केनोक्तस्य लिपिकारितो विकार इति वा स्यादुत्तरः कल्पः। अयमेव च सदर्थस्य नेदीयानिव भवेत्। **'थर्वतिश्चरतिकर्मा तत्-प्रतिषेधः'** इत्युत्तरस्य तथाविधपाठस्यैव अ-गतिमद्वाचकस्य व्याख्यानतयोपयुक्तत्वात्। अन्यथा च पूर्वोत्तरयोः पाठभागयोर् गतिमत्त्व-गतिराहित्याऽऽत्मक-परस्परविरुद्धाऽर्थकयोः सतोर् व्याहतत्वदोषप्रसङ्गात्। अतः पूर्वभागे **√थर्व्**>***थर्व-** इति वा ***थर्वण-** इति वा नञ्-पूर्वश्च मतुबन्तश्च मौलिकः सन्-पाठ इति मतं भवेत्। अनया च दिशा **अ-थर्वन्-** इति तस. नञ्-स्वरः (पा ६, २, २) नापू. अतनवद्-वाचकाद् विपरीतार्थे इतीव या. मेने इत्यर्थो निर्गलेत्। तन्मतेन उप. ***थर्वन्-**<**√थर्व्**+**वनिप्** इत्येवं निष्पन्नं च भवेदित्यपि द्र.। यत्त्वत्र दुर्गः **'किमिदमथनम्'** इति प्रश्नमुत्थाप्याऽपि साकाङ्क्षीकृत्येव विरमति तद् अतीव खेदकरम्। यच्चाऽपि स्कन्दमहेश्वरीये ततो विशिष्टतरं किंचिद् व्याख्यानमुपलभ्यते तदपि संस्करणदोषभूयस्त्वग्रस्तं सन् नितराम् अस्पष्टमिव भवति। एवं दिङ्मात्रमिह प्रादर्शि विस्तरस्त्वन्यत्राऽनुसंधेयः।

५,११,११;७,२,१;पै८,१,११.

आथर्वण[a]- -०ण खि १, ९,४; शौ ६, १,१; -०ण कौ १, १७७; जै १,१९,३;-णः ऋ १, ११६, १२; ¶तै ५, १, ४, ४; ६, ६, ३; काठ १९, ४¶; क ३०, २¶; पै १, ८, ४; -णम् शौ ४, ३, ७; पै १, ८, ४; ३८, ४^{२}; -णाः शौ १०, ६, २०; पै १६, ४४, ३; -णानाम् शौ १६, ८, १७; १९, २३,१; -णाय ऋ १, ११७, २२.

आथर्वणी[b]- -णीः शौ ११,६,१६; पै १६, २२, ६.

†अथर्व-वत्[c] ऋ ६, १५, १७;१०, ८७, १२; शौ ८, ३, २१; पै १६, ८, १.

अथर्वा(र्व-अ)ङ्गिरस्[d]- -रसः शौ १०,७,२०; पै ९,२३,११; १६, ८४, ७.

√अथर्य्[e]

‡अथर्यु[f]- -र्युम् कौ १, ७२; २, ७२३; जै १, ७, १०; ३, ५९, १५.

अथर्-वी[g]- -र्व्यम् ऋ १, ११२, १०.

१*अथ- √*अथ् द्र.

२अथ[h], 'अथा[i] ऋ १, ४, ३; १०, ३; १६, ७; २४, १५; २६,९; [४७, ३;(६)]; ५४, ९; ५९,२;

---

[a]) गोत्रापत्येऽर्थे अण् प्र. तत्स्वरश्च (पा ४, १,११४)।

[b]) स्त्रियां ङीप उदात्तनिवृत्तिस्वरेणोदात्तत्वम् (पा ४, १, १५; ६, १, १६१)।

[c]) तुल्यार्थे वतिः (पा ५,१,११५)। प्रत्ययस्वरः।

[d]) द्वस. सामान्यः समास-स्वरः (पा ६,१,२२३)।

[e]) √अथर्य् इत्यनेन समानन्यायो नाधा. द्र०। क्ये पदत्वान्नलोपस्ततोऽकारलोपश्च (यक. पा १, ४, १५; ८, २, ७; ६, ४, ४८)।

[f]) ताच्छीलिक उः प्रत्ययः (पा ३, २, १७०)। अथर्यु- इति बाह्वृचः पाभे. गद्र.। यन् मध्यरेफरहितत्वेन क्वचिन् मुद्रापितं भवति (तु. BI., कसंग्र. च) तन् मन्दमिव भवति। बाह्वृचे पाभे. तत्सद्भावसाद्द्योपलम्भान् मूको. तद्दर्शनाच्च (तु. ST.)। सा. अपि मध्ये रेफं पपाठेति तदीयात् >√थर्व् इति विकल्पकथनात् सुलभानुमानं भवेत्। यदिह सा. <अथर्व् इतीवाऽनुमन्यमानः प्रादर्शि (तु. कसंग्र.) तन्न। आद्यस्य नञ् >अकारस्याऽनपेक्षितत्वाद् गतिमति तात्पर्योक्तेर् असंगतिदर्शनाच्च। √थर्व् गत्यर्थो भवति न त्व् √?अथर्व् इति यावत्। तेन च **आगम्यम्** इति व्याख्यानमप्य् **अ-गम्यम्** इत्येवं **शोध**-पूर्वकं पठितव्यं भवेत् (यतु. BI.)।

[g]) स्वरूपपरिच्छित्तिः संदेहग्रस्ता भवति। स्त्री. वि. भवति। ६अ+√थर्व्+अच्(ट्)>थर्व->थर्वी इतीवाऽभिसंदधानः सा.गमनपर्यायभूत-थर्वणाऽभाववत्यां तात्पर्यमाह। एवं तावत् तस. नञ्-स्वरेण (पा ६,२,२) भाव्यम्। स्त्रियां नद्यन्तत्वे द्वि१ **अमि पूर्वत्वेन** (पा ६, १,१०७) च भाव्यमिति चोद्यद्वयमापद्यमानं दुष्परिहरं स्यात्। अमनस्कोऽप्येतद् एवाऽनुवदन् GRI अप्येतेन प्रत्युक्तः द्र.। एतद्वैपरीत्येन <√अत् इतीव नापूपूदि. प्राक्तनैकदेशिकनिर्वचनसामान्येनाऽनुमन्यमानः वें.गमनवत्यां तात्पर्यमाह। एवं तावद् √अत् (<थ् >*अथ-)+र्+व(>वी) इत्येवं माध्यमिकरेफोपजनवति तद्धिते व-प्रत्यये स्त्रियां **गौरादित्वोपसंख्यानतः** (पा ४, १, ४१) **ङीषि** प्राति. संभवत्यपि द्वि१ **अमि पूर्वत्व**प्राप्तेः पूर्ववद् दुर्वारत्वं द्र.। एवमपि स्त्रियाम् **अथर्वन्**- इति वा<√अथरि+व>वी इति वा यद् अर्वाक्तनम् अपरं मतद्वयं भवति (तु. PW. GW. MW.) तदप्युक्तेन चोद्येन समानं ग्रस्तं द्र.। एस्थि. अपि पपा. तदीयैतद्विषयक-प्रक्रियाऽनुरोधेनाऽवग्रहाऽभावेऽपि तस. इति मतं भवति। पूप. तावद् *अथ- इति वा रेफोपजनवद् *अथर्- इति वा स्यात्। उप. च <√वी+क्विप् द्र.। स्वरश्च सामान्यः सामासिकः (पा ६, १,२२३) वा स्याद् उस. इति कृत्वा **'गतिकारक-'**(पा६,२, १३९) इत्युक्तो वा। द्वि१ रू. च **'एरनेकाचः'** (पा ६,४, ८२) इति यणय् **'उदात्त-'** (पा ८,२,४) इति स्वरितान्तं द्र.। वाच्यविमर्शस्तु वैश. विस्तरणीय इति दिक्।

[h]) मूलतो **य-था, त-था, क-था, इत्-था** इत्येतैः स-कक्षतया व्युत्पन्नमिदम् अव्य. संभाव्येत। तस्मिन् दर्शने **इदम्>३अ-** इति यत् सना. भवति ततस् **थाल्**-प्रत्यये लित्-स्वरः (पा ६,१,१९३)। अथवोक्तैः शब्दैः संपूर्ण-साकल्यार्थ था इत्येव प्रत्यय इत्यास्थाय कस्मिंश्चिदतिप्राचीने काले कथमपि स्वरपूर्वसंक्रमपूर्वकोऽन्त्यस्याऽचो ह्रस्वीभावेन परिणामः समजनीत्युच्येत। यत्तु भाषान्तरीय-साजात्यदृग्भिरस्य 'AND', 'UND' प्रभृ. समानार्थैः शब्दैः संबन्ध उत्प्रेक्षि (WW १, ६७) तदभित्तिकमित्युद्भाव्येत। एवं यत् क्वचिद् अस्मदीयैर्" एतद् <√अथ् इति संभावितं भवति (तु. वाच.), तदपि धात्वर्थान्वयाभावेऽसंबद्धप्रलापाद् अविशिष्टं द्र.।

[i]) नापूदि. मूलतो दीर्घान्तस्य स्वरपूर्वसंक्रान्त्या ह्रस्वान्ततया परिणतस्य संहितायां छन्दोऽनुरुद्धा पुनर् दीर्घाऽऽपत्तिः

७५,२;७६,३;[८१,८;(९१,९;
७.९६,५)]; ८७,४; ९२,१५:
९३,७;९४,९; १०२,६; १०;
[१०८,१;(५) ६-१२]; १०९,
२; ११४,९; ११७,१९:११९,
९; १३६,१; २; १६३, १३;
१६४,१२; **२**,[३,९;(**३**,८,
९: **७**,४७,३)]; ३६,३; ३७,
५; ३८,१; **३**,३,१; ६, ६:
९,३; १३,३; १७,३; ५;
२८,५; २९,१०; ३१,७;
३२,१०; ३४,१०; ४७,२;
५३,३; ११; **४**,१८,५; ११:
२०,९; २४,१०; ३५,३; ४;
३६,४; ४२,९; **५**, ३०,९;
६,१६,१८; ४०,१; ४;[५३,
५-७]; ५४,७; **७**,[११,४:
१०,५२,३]; ९८,५; **८**,९,
१४; १०,५; ४०,२; ४६,१५;
१६; ४८,६; ८९,२; [९६,७;
१०,५२,५]; १०२,१९; **९**,
[४,१-१०]; ८१,२; ८६,
२८; ८७,६;**१०**,१,७;१४,१०:
[१५,४;(३७,११)]११;१६,१;
२; २३,३; २७,२२; ५१,७;
८५,१६; ३३; १०७,३;१०८,
३; ८; १११,६; १२७,६:
१२९,६; १४३,३; १४५,३;
५; [१८२,१,३]; खि **१**,५,
९; ७,२; **२**,६,१,६; **३**,
१५,४; **४**,५,२७; २९; मा
३,१४†; **७**,२५; ३७†; **८**,
३४†; **१२**,१२†; ५२†; ६५;
१५,५६†; **१७**,३१; †**१९**,
५५; ५९; **२३**,२६; २७;
२६,२४; **२७**,६; **२९**,२४†;
३०,२२; **३३**,९५†; **४०**,
१५; का **३**,३,४†; **७**,१०,३;
२०,१†; **८**,८,१†; **१३**,
१,१३†; ४,८†; ५,४; **१६**,
६,८†; †**२१**,४,५; ८; **२५**,
६,६; ७; **२९**,१,६: **३१**,३,
१३†; **३४**,४,४; **४०**,१,१७;
तै **१**,१,१३,१^{२}; १४,१†:
२,३,३; ४,४२,१†; ५,१,२¶;
५,२‡; ९,१; ६^{२}¶; ११,३†;
६,४,२^{२}; १०,४¶; ७,¶२,
२-४; १३,४†; ८,५,२†:
¶**२**,१,२,१;३; ४,७; ८;५,
२; ८,४; २,६,४; ८,३;
११,३; ३,३,४; ५,१; १३,
२; १४,३†; ४,२,१; ४,१;
२; ६,२; १०,२; १२,२; ५,
११,२; ६,१,५; ३,५^{२}; ९,
३;४; ६; १२,२^{२}†; ¶**३**,१,२,
२: ३,१: ४,४\$; ९,६; ११,
२†; २,१,२; २,१; ८,४\$:
†११,२; ३; ३,७,३; ८,१:
४,१०,४;११,६‡; ५,१,२^{२}\$:
२,१; ६,१\$; **४**,१,७,३;
२,१,४†; ४,४†; ५,३:
‡६,१; २; ६,३,४^{२}; ७,५†;
७,१३,५†; ¶**५**,१,३,५^{२};
५,४; ४,२,२; ३,४^{२}; १०,
२; ७,२,५; ३,२; ४,२;
९,२;३; २६,१\$; ¶**६**,२,१,
१; ३,१^{२};५^{५}; ४,२; ५,१^{४}:
२^{३}; ११,४^{२}; ३,१,३^{२}; ६: २,
१; १०,४^{२}; ४,५,६; ७,२;
५,८,६^{३}; १०,१; ११,४;
६,४,२^{२}; ४; ६,२; ¶**७**,१,
३,१; ४,३; ५,३; ४; ५;६^{५};
७^{२}; ६,५; १०,३; २,१,४^{३};
४,१; ३; ७,३; ४; ९,१;
३,१,१; ३; ४^{२}; ४,१०,१^{३};
१९,२\$; ५,१,१^{२}; २,१;
३,१; ६,३; १५,१; ¶मै **१**,
१,६; १३^{२}\$;२,१०\$; १८†;
३,२३†; ३९\$; ४,५^{२}; ६;
१०; १२^{२}; १३^{११}; १५; ५,५;
८; ११; १२; १३; ६,४; ५^{२};
६^{५}; ८^{५}; ९^{२}; १०^{५}; ११; १२;
१३^{१६}; ७,१\$; ३^{२}; ४; ५; ८,
१; २; ४^{४}; ५^{६}; ६; ७^{४};८^{२};९^{२};
९.४^{५};६; ७^{३}; १०,५^{२}; ६;८^{२};
१०; ११^{३}; १२;१३;१४;१६^{६};
१७^{३};१८^{३}; १९; २०;११,५^{५};
७;८;९^{३}; **२**,१,१; २^{३};३^{२}; ८;
९; १२; २,४^{२}; ७^{२}; ९; १३^{२};
३,१^{३}; २^{२}; ३^{३};६^{२}; ९^{४}; ४,२^{२};
३; ४^{२}; ५^{२}; ५,१; २; ३^{५};४^{२};
५;६; ७;८;९^{३}; ६,१; ६^{२};\$७,
८; १२; १३^{२}‡; †; ८,१\$; ९,
१०\$;१२,५\$; **३**,१,१^{३}; ३;५;
१०^{४}; २,१^{४}; २^{२}; ४^{२}; ५^{२};६^{७};
७^{६}; ८^{४}; ९^{४}; १०; ३,१^{४}; २^{८};
३^{२}; ५; ७; ८; १०; ४,३; ६;
८; ५,२; ३; ५; ६,२^{२}; ५^{२};
६^{३}; ९\$; ७,२;३; ४^{३}; ८;९^{५};
१०; ८,१; २; ३^{३}; ४^{१४}; ६^{५};
७; ८;९; १०^{३}; ९,१^{३}; २^{२};४;
५^{४}; ६^{२}; ७^{२}; ८^{५}; १०,१^{२};२;
३^{२}; ४^{४}; ५^{२}; १३,१\$; **४**,१,
१^{२}; ६; ८^{७}; ११; १२^{७}; २,१^{४};
२^{२}; ७; ९; ११; १२\$; १३^{६};
१४^{३}; ३,१^{२}; २^{२}; ३^{२}; ४; ५;
६^{२}; ७^{५}; ८^{३}; ९^{३}; ४,१^{१२}; २;
५; ८; ९; १०^{२}; ५,१^{२}; २^{२};४;
५^{२}; ६^{२}; ८; ९; ६,१^{३}; २; ३^{७};
४^{८}; ५; ७^{४}; ९^{२}; ७,२^{२}; ३^{२};
४; ५; ६^{२}; ७; ८^{३}; ९^{७}; ८,१^{२};
३^{२}; ५^{३};७^{२}; ८^{६}; ९^{३};१०,६^{२}†;
११,१†; †१२,१; ५; \$१४,
३†; ५†; ६; १२; १३^{२};१५†;
१७†; १८†; काठ **१**,१२^{२};
२,१५; **३**,८; **५**,६; **६**,१;
४^{६}; ६^{३}; **७**,७; ८^{२}; **८**,४^{८};
५-७; १३; **९**,३; १४; १५^{२};
१०,२; १०^{२}; **११**,१^{२}; २;३^{२};
६^{२}; १०^{३}; **१२**,१; ३^{२}; ४^{२};७;

८^{३}; १०^{२}; १२; १३^{३}; **१३**, ३^{२}; ४^{४}; ५^{७}; ६; **१४**, ५^{४}; ९^{४}; **१५**, ५^{२}; १०; **१६**, ८; **१८**, ३^{२}; १६; **१९**, ८^{२}; ९; १०; १२; **२०**, २; ५; ६^{४}; ७–११; १४; **२१**, २^{४}; ३^{२}; ४^{५}; ६^{५} ८; १०^{३}; १२; १३; १४^{२}; **२२**, १; ६^{८}; ११^{६}; **२३**, १; ३; ६; ९; **२४**, ८; **२५**, २; ६; ७; १०^{२}; **२६**, ९; १०; **२७**, १; ३^{३}; ४^{२}; १०; **२८**, ३; ६^{४}; ७; ९; **२९**, ३; ४^{२}; ७^{२}; ९^{१३}; १०; **३०**, १^{२}; २^{३}; ३^{२}; ८; १०^{२}; **३१**, ४; ६^{७}; ९^{३}; १३; **३२**, २^{२}; ३; ७; **३३**, २^{३}; ६^{२}; ८^{२}; **३४**, ३; ५; ८^{३}; ११; १५; **३५**, १६; १७; १८^{२}; १९^{३}; २०^{३}; **३६**, ३; ५^{२}; ६^{२}; ७; १०^{४}; ११^{२}; १२; १३; १४; **३७**, २; ३^{२}; ४^{२}; ५^{२}; ९; ११; १६^{२}; १७^{२}; **४०**, ११-१३; **४४**, ४; **४५**, ४^{३}; **४६**, ३; ¶क **२**, १५†; **३**, १२; **४**, ३^{६}; ५^{३}; **६**, ९^{६}; **७**, ४; **८**, १; ६; **२८**, ३^{२}\$; **२९**, ४\$; **३०**, ६; **३१**, २; ४; ७; ८^{४}; ९–१३; १७^{३}; १८^{२}; १९^{५}; २१^{५}; **३४**, १^{८}; **३५**, ५^{६}; ७; **३६**, ६; **३८**, १; ५; **३९**, ३; ४^{३}; ५; **४०**, २; ३^{२}; **४१**, ७; ८; **४२**, १\$; ३^{३}; ४^{२}; **४४**, ३; ६^{४}; **४५**, ५^{२}; ८; **४६**, २^{८}; ३^{४}; ४^{२}; ५^{३}; ६^{२}; ८^{२}; **४७**, ४; ६^{७}; ८; ९^{२}; **४८**, १५; १६^{२}; १७^{३}; १८^{३}; †कौ **१**, ३२४; ३६६‡[a]; ४२२‡[a]; ४३३; **२**, ५७; ३९७–४०६; ४३९; ५२०‡[a]; ६९६; १०८३; **३**, १,४; †जै **१**, ३४,२; ३८, ७‡[a]; ४१, ४‡[a]; **२**, ५, १; **३**, ६, ३; ६‡[a]; ३१, १७–२६; ३३, १३; ४०, १६‡[a]; ५६, २३; शौ **१**, ७, ३; ७; १८, १; **२**, ६, ५; **३**, ३, ६; ८, १; १२, ५; २५, ६; **४**, १, ५; ४, ८; ७, २; १७, ८; **६**, ५०, १; ६६, ३; ११६, १; ११९, २; १२१, १; १३८, २; **७**, ९, १; १५, ३; ५८, ६; ८८, ४; **८**, १, ६; ८, २०; ९, २४; **९**, ५, २७; १४, १२†; **१०**, १, २८; ४, १; **११**, १, ८; ६, १४; १०, ३१; **१२**, २, ३०; ३, ५५–६०; ४, २२; २३; २५; २८; ३६; ५२; **१४**, १, १६†; २१‡[a]; २, २९†; **१५**, १२, ८; १३, ११; **१८**, २, ४†; ५^{२}†; ९; ३, ७१; **१९**, ३४, ८; ५२, ५; ६८, १; †**२०**, ११, १०; ५६, ५; ५७, ३; ६८, ३; ७३, ४; ८७, ५; १२८, १\$; \$१३०, १७-१९; \$१३६, ७; ८; १४१, ४; पै **१**, ३०, ५; ७१, ४; ८९, १; **२**, १, १; २६, ५; ५८, २; ७४, ६; ८०, २; **३**, ३३, ६; ३४, १‡[a]; **४**, ४, ३; ४; ७; **५**, ३९, २‡[a]; **७**, ९, ७; १२, १०‡[a]; १८, ८; १९, ३; **८**, ७, ५; १२, २; १५, ४; १३; १९, ३; २०, ५; **९**, १९, २; २२, १५; **१०**, १, ९; ४, ५; **१२**, ३, १३; १६; ७, १–४; ९^{२}; **१३**, १, ३; १६^{२}; ३, ८; ५, १८; **१४**, ४, ७[b]; **१५**, ५, ९; १०; २३, ९; **१६**, १, ६; ९, ३‡[a]; १५, १; २०, १^{२}; ३०, १०; ४९, ७; ५०, ८; ५८, ४^{२}; ६७, २†; ६९, १२‡[a]; ७१, ९; १०^{२}; ११; ८५, ५; १२६, १-३.

अ॒थो[c] ऋ **१**, २८, ६; ५०, १२; ११३, १३^{२}; १५७, ६^{२}; १६४, [४०; (**७**, ४१, ५)]; ४६; १९१, १; २^{३}; **३**, ३७, ११; ६०, ४; **६**, ७५, १५; **८**, ९१, ६; **९**, ३९, ५; [६०, २; (६४, २६)]; **१०**, २७, ९; ३६, ५; [६०, ८; ९; १०]; ८५, २; ३५; ४१; ९०, ५; ९२, ४; ९६, १३; ९७, ९; १६^{२}; १३६, ५; १३७, ४; १५९, ३; १७३, ६; १९०, ३; खि **३**, १०, २; १५, ६; १४; **५**, १२, ५; १५, ४^{२}; १०^{२}; मा **३**, ४३; **११**, ८२; **१२**, १७; ५४; ८३†; ९०^{२}; ९७; १००; **१५**, ५९; **१६**, ८; १२; **२३**, ६०; **३१**, ५†; का **३**, ४, ७; ९, ६; **११**, ६, १६^{२}†; **१२**, ७, ७; **१३**, १, १८; ४, १०; ६, ९†; २१; **१६**, ७, २; **१७**, १, ८; ११; **२५**, १०, ८; **३५**, १, ५†; ¶तै **१**, ५, १, ४; २, ४; ४, १; २; ७, २; ३; ८, ३^{२}; ९, ६; ८, २; ४; ७, १, ६; ३, १^{२}; ४, ३; ६, ३; ८, ६, १\$; **२**, २, ४, ६; ५, ४; ५^{२}; ३, ९, ३; ११, ५; १३, ३; ४, ६, २; ९, ३^{२}; १०, ३; ५, १, ४; ६; ३, ७; ५, १; ७, २; ८, ७; ११, २^{३}; ३^{२}; ६; ७; ६, १, ६^{२}; ६, ४; ९, १; ४; १०, ४; **३**, १, ५, २; ९, ३; २, ६, ३^{२}; ४; ६; ७; ३, ९, २\$; १०, १\$; ४, १, ३; ९, ७; १०, २; ५; ५, ५, २; ७, २; ३; \$**४**, १, ९, ३; २, १, ५; ४, ४; ५, १, ३; ४; **५**, १, १, २; ४, १; ६, २^{२}; ४; ८, ५; ९, ५; ६; २,

---

[a] अ॒ध, अ॒धा इति बाह्वृचः पाभे. यथायथं द्र. ।

[b] एतच्-शोधार्थं रा॒त्रि->त्रिः इत्यत्र सस्थ. टि. द्र. ।

[c] 'अ॒थ-उ' इति समुदितं निपातद्वयम् 'ओत्' (पा **१**, १, १५) इति प्रगृह्यतामापाद्य पपा. इति-कारेण पठ्यते ।

१, ३; ३, २; ५; ५, ४^{२}; ६^{२};
७, ३; ८, १^{२}; ९, ६; १०, ६;
३, १, २; २, २^{२}; ४, ७; ७, २;
४^{२}; ९, १;२;१०,४;४,१,१;२;
३; २, ३; ४^{२}; ३, २; ४; ४, १;
५, ५^{२}; ६, ४^{२}; ८, १; ४; ९,१;
१०, ३; ५^{२}; ५, १, ६; ५, ३;
७, २; १०, ५; ६, २, १; ३;
४, २; ६, २^{२}; ७, ३; ८, ४; ६;
९, १^{२}; १०, १;३; ७,३, २; ४,
१; ५, २; ७; ६, ३; ८, ३; ९,
३; ४^{२}; १०, २; **६**, १, १, ३;
३, ३; ५, २; ६, ५; ६; ७, २;
११, ३; ६; २, १, १; ७; २,२;
५, १; २^{२}; ३; ७, २; ८, ६; ९,
२; १०, ४; ११, ३; ३, १, २;
५, २; ४; ७, २; ३; ८, १^{२}; ३;
९, ४; ५; १०, १; ११, ३; ४,
३, ३; ४; ४, ३; ५, २; ५, ९,
२; ६, ३, २; ६, २; ७, २; ४;
७, १, १, २^{२}; ३; २, १; १०,
३; ४^{२}; २, १, २; ३^{२}; २, २^{२};
३; ३, २^{२}; ५, ५; ६; ८, २;
४–७; ३, १, २; ५, ३^{२}; ७, ३;
४; ८, १; ९, ३^{२}; १०, ४; ५;
४, १, ३^{२}; २, ४; ५^{२}; ३, ३^{३};
४^{३}; ५; ४, ३^{२}; ५, २–४; ७,
२^{२}; ९, १; ५, १, ५; ४, २; ५,
१; २; ८, ३; ५^{२}; ९, ३; १५,
२; ¶मै **१**, ४, ५; ७; ८; १०;
१३; १५; ५, ५^{३}; ६^{२}; ८; १०;
११^{२}; १२; ७, २; ४^{३}; ८, २^{२};
३^{३}; ४^{४}; ५^{५}; ६; ७^{३}; ८^{२}; १०,
४$; ५; ६^{३}; ७^{१०}; ९^{२}; १४;
१६; १७^{३}; २०; ११, ६–९;
२, १, ३; ७; ११; २, २; ८; ३,
१; ५^{२}; ६^{२}; ७; ४, १; २;
३^{४}; ४; ५; ५, २–५; ७^{४}; ८;
१०; $७, ७; १२; ९, २^{२}$;
१०, १$; **३**, १, १; २^{२};५;७^{४};

९^{२}; १०^{४}; २, १^{३}; २^{२}; ३^{५}; ४^{५};
५^{२}; ६^{५}; ७^{४}; ८; ९^{४}; १०^{२}; ३,
१^{२}; ६^{२}; ८; ९^{२}; १०^{३}; ४, ३;
४^{२}; ५–७; ६, १^{४}; २; ३^{२};
५; ६^{२}; ७^{२}; ८^{३}; ९^{३};$;७, २^{२};
४^{४}; ५; ७^{५}; ९^{३}; १०^{३}; ८, ४;
६^{२}; ७^{२}; ९; ९, २; ३^{२}; ५^{२}; ७;
१०, १^{३}; २; ३^{४}; ४^{२}; **४**, १, ५;
६; ८^{२}; १०^{२}; १२^{२}; १४^{२}; २,
१; २; ९^{२}; १४; ३,२^{२}; ८^{२}; ४,
२; ५; ८$^{२}; ५, १^{२}; २^{३}; ५; ६,
३; ५; ८^{२}; ९; ७, १; ४^{४}; ८^{२};
९^{२}; ८, ३^{३}; ५; ६; ८; ९; १४,
११$; काठ **७**, १५^{३}; **८**, १२;
१३; **९**, १; ७; **१०**, ५; ७;
११, १०^{३}; **१२**, ३; ६; १२;
१३, ९; १०; **१४**, ६; ८; **१६**,
७; ८; १३; १९; **१७**, ११^{२};
१९, १; ५–७; १०; **२०**, ३^{२};
४; ५^{२}; **२१**, ३; ७–९; १२^{२};
२२, १०; १३; **२३**, १; ४–६;
२४, ३; ४^{२}; ६;७; ८^{२}; ९;**२५**,
१^{२}; ५^{२}; ६; ७^{२}; ८; ९; १०^{२};
२६, ५; ७; ९^{२}; **२७**, १^{२}; २;
४; **२८**, १; ७; १०; **२९**, ८;
१०; **३०**, २; ७; **३१**, ८–११;
३२, १; ५^{२}; ७; **३३**, २; **३४**,
२^{२}; ५^{२}; १६; २०; **३६**, १; २;
५; ७; ९^{२}; १०; १२^{२}; **३७**,१;
१६; ¶क **६**, ५^{३}; ९^{२}; **७**,१; ७;
८, १; ४; १०$; **२५**, ४†; ९$;
२७, १^{२}$; **२९**, ८; **३०**, ३–५; ८; **३१**, ५^{२}; ६; ७^{२}; १८$;
३५, ४; **३६**, १; **३७**, ४; ५^{२};
७; ८; **३८**, १^{२}; २; ४^{२}, **३९**,
२^{२}; ३; ५^{२}; **४०**, १; २; ३^{२};
४१, ३; ५; ७^{२}; **४२**, १^{२}; २;
४; **४४**, ७; **४५**, १; **४६**, ३;
५; **४७**, ९–११; **४८**, १४;
१८; †कौ **२**, २५२; ६५१;$**३**,

३, १^{२}; ४, ७; जै **१**, १८,
८; **२**, १, ४^{२}; ३, १०†; **३**,
२१, १७†; शौ **१**, १४, २^{२};
२२, २; ४†; **२**, ४, ६^{२}; ९,
१; ३१, २; ४; ३२, ५; ३६,
७; **३**, २,४^{२}; १८, ५; २१, ९;
२४, १; २५, ५; **४**, ३, ४;^{२}४,
५; ६, ६; ९, ३^{२}; १३,५†;१७,
७; १९, ३; २०, ५;३६, १;**५**,
१४, २; २१, ४–६; २२, १०;
२३, १२; ३०, १३; **६**, १३,१;
e) अध्रि-गु- इत्येवं पपा. भवति। तत्र अ-ध्रि- इत्याकारकं समस्तं पूप. द्र. इति सा.। इदंपर एव च तदनुसारिणामर्वाचां प्रायोवादः (तु. PW. GW. MW. WW.)। एतन्मतानुसारं तावद् यथाऽवयवम् १अ इत्यस्य च (√धृ+क्विः प्र.>) *ध्रि- इत्यस्य च पूप. समावेशो भवति। द्वितीये चेहावयवे कर्मणि प्र. (ध्रियते धृतो भवतीत्यर्थः, तु. यस्थ. सा.)। अथ गु- इत्य् उप. <√गा द्र. (तुटि. अग्रे-गू-)। एवं च ('ध्रिर् यथा स्यात्तथा गाति' इति कृत्वा) *ध्रि-गु- (दुर्गत- इत्यर्थे) तस. स्यात् तद्गर्भश्चात्र प्राति. नञ्-पूर्वं नञ्-स्वरश्च द्र.। अथ पक्षान्तरं भवति, यथाऽत्र तस. नञ उत्तरं ध्रिगु- इति उप. भवतीति (तु. NW. त. संकेतितो भाषान्तरीयसजन्मशब्दरूपसंवादश्च)। अस्मिन् पक्षेऽत्रत्यमपि साद्यप्रति भवति। तद् यथा। यो नाम √धृज् इति भौवादिकः पठ्यते गत्यर्थकः (पाधा २१९), तस्यैव √ध्रिज् इत्याकारतया स्वरूपपरिणामः (तु. MW.) कुत्सितगतिपरत्वेन चार्थपरिणामः द्र.। ततः घुकि प्र. दुर्गत- इत्येतद्-वचनं *ध्रिगु- इति प्राति. निष्पद्येत (तु. भृगु-, वल्गु- प्रभृ.)। काममस्यैव प्राति. (*ध्रिगु->*ध्रिग्>) धिक्-ग् इति अव्य. प्राकृतिकपरिणामतया द्र.। अद्यापि खलु पंजा. 'ध्रिग् जीवन' इत्याकारके प्रयोगे 'ध्रिक्कार' इत्यत्र शब्दे चोक्तपूर्वा परिणामप्रक्रिया निगम्यमाना लक्ष्येत। अपरं च। पंजा. ध्रिगी- इति खट्वा- इत्यस्य वि. भवति। तच्च वान-दाम-शैथिल्यवचनम्। एवं तु. नाउ. उप. *ध्रिज्- इति च पंजा. √ध्रिक्, हिं. √धर्क्, √धङ्क् प्रभृ. कम्पनार्थीयाः।

f) *अध्रिगु-गो- इत्येवं मूलतः सतः स्थानेऽन्त्ययोर्द्वयोः पदाऽवयवयोर् ध्वनिसाम्यप्रयोजिते प्रथमस्य प्राकृतिके लोपे सति यनि. प्राति. आविर्भाव इत्यभिसन्धिर्भवति। एस्थि. च बस. पूपप्रस्व. च द्र.। उप. उपसर्जनस्यापि सतो ह्रस्वाऽभावश्च उसं. (पा १,२,४८)। भूयानपि विशेषः नाउटि. द्र.।

g) सा. अर्वाञ्चश्च नापू. एव प्राति. एतद् रू. इत्या-

३[a]; ८, २२, ११[b].

अ(-?)ध्रि(-?)ज(ज्?)[c]- -ध्रिजः ऋ ५, ७, १०.

अ-ध्रुक् अ-द्रुह्- द्र.

¶अ-ध्रुव- -वः काठ २८, १; -वम् काठ २८, १; क ४४, १; -वाः काठ १२, २; -वाणाम् काठ २८, १.

¶अध्रुव-तम- -तमम् काठ २८,१.

¶अध्रुव-त्व- -त्वम् क ४४, १.

अध्वन्-
अध्वर-, √अध्वरीय } √अध् द्र.

¶अ-ध्वर्तव्य[d]- -व्याः तै ३, २,२,३.

अ-ध्वर्य[e]- -यैः काठ ३५, ७; क ४८, ९.

√अध्वर्य-, अध्वर्यु- √अध् द्र.

अ-ध्वस्मन्[f]- -स्मभिः ऋ २, ३४, ५; ३५, १४; ९, ९१, ३; -स्मानः ऋ १, १३९, ४.

¶अ-ध्वृत[g]- -तः मै ३, ६, १०.

√१अन्, अनति[h] शौ ४, ४, ३; पै ४, ५, ४.

अनीत् ऋ १०, १२९, २; आनीत् ऋ १०, ३२, ८. [अनु-प्र°, अप°, अभि-वि°, उद्°, प्र°, वि°, वि-अव°, सम्°]

१*अन्[i]-

१अनिल[j]- -लम् मा ४०, १५; का ४०, १, १७.

१†अन्य, न्या[k]- -†न्याम् ऋ ८,

ऽऽतिष्ठन्ते। अतस्तदीयाऽत्रत्या व्याख्या नापू. निर्विशेषा द्र.। कुतोऽस्मिन्नेव रू. सुपो णिद्वद्भावेनेव प्रयोजिता वृद्धिराकस्मिकीवाऽऽजायत इति प्रश्नस्तु प्रायेण व्यगणि। यत्रापि क्वचिदयमालोचि, तत्र 'गु-' इत्यन्तं प्राति. अविघात्यैव मिथ्यालक्षणदीर्घभावतया (=°गवः>°गावः इति) वाऽविस्पष्टनिमित्तकगोवद्भावतया वा समाधायि (तु. ORN. ऋ ८, २२, ११; NW. च)। यथा त्वस्य रू. उभयोः स्थलयोः परस्परविविक्तं नापू. च विशिष्टं व्याख्यानं सावसरं भवतीति नाउ. टि. संकेतितं द्र.।

a) प्रकृते पर्वतौपम्येन मरुतां वोढृत्वं स्तूयते। जलभारवाहका मरुतः किमाकारा भवन्तीत्यपेक्षायां तदुपमानभूताः पर्वता अध्वतगमनत्वेन वा (तु. सा. प्रभृ.) प्राशस्त्यादिगुणवत्तया वा (तु. NW.) विशेषयितुं नोचिताः स्युः। उभयथाऽपि वोढृत्ववैशेष्याऽनाविर्भावप्रतीतेरिति यावत्। यथाऽऽत्मन उपरि संचारिणोऽध्रिगु-गवादिपशून् वहन्तः पर्वताः शोभेरंस्तथा संचरणशीला वर्ष्या अपो वहन्तो मरुत इत्येवं विव्रियमाणे तावदुभयेषां पर्वतानां च मरुतां चोपमानोपमेयभावस्तदुह्यवहनसंकेतेन सुस्पष्टः स्यात्। एस्थि. अत्र रू. **गो-** इत्य् उप. तत्संज्ञकप्रसिद्धपशुपरमिति तत्त्वमवधेयम्।

b) नापूटिदि. अत्र प्रकृते स्तुत्ययोरध्रिगुतया विशिष्टयोः स्तोत्राऽध्रिगुना भाव्यमुताध्रिगु-वाचेत्येवं विचार्यमाण उत्तरः कल्प एव साधीयान् स्यादिति कृत्वाऽस्य रू. अपि व्याख्यानार्थं नापू. प्राति. भिन्नस्य प्रस्तावः द्र.। एवं सत्यप्ययं विशेषो भवति यथा नापू. स्थलाद् विशिष्टतयेह स्थले **गो-** इत्य् उप. वाक्-परं भवति न पशुपरमिति निष्कर्षः।

c) बस. नञ् पूप.। उप. √ध्रिज्+भावे क्विप्। अन्तोदात्तः (पा ६, २, १७२)। एकमात्रं रू. ष१। एवं तावद् नञ उत्तरं पद-विभागः द्र.। सा. तु 'अ-ध्रि-' +'ज-' इति द्विर्विभक्तं प्राति. आह। तत्र च समस्ते पूप. नञ उत्तरं 'ध्रि-'<√धृ (तुटि. अध्रिगु-) इति वा <√धृष् इति वेति निजाभिप्रायं विकल्प्य तत उत्तरं 'ज-'<√जन् इत्याह। तन्न। (√जन्>) 'ज' इत्येतद् यत्र कुत्रापि उप. भवति तत्र सर्वत्र पपा. अवगृह्यते। अत्र चाऽवग्रहादर्शनान्नैतदत्र पपा. अभिमतमित्यस्य स्पष्टत्वात्। यनि. रू. च सा. मतेन प्र१ इत्यत्रापरो विवेकः द्र.। GW. MW. चाप्येवंवादिनौ सन्तौ बह्वंशेन सा. अनुवादकौ भवतः। ORN. तदनु NW. च प्राति. जकारान्ततया प्रतिपद्येते। प्रकृतं रू. च ष१ वा प्र३ वेत्यत्र तद्विवेक आकरत एव प्रतिपत्तव्यः।

d) सस्व. नाउ. द्र.। उप. च तव्यत् प्र. इति विशेषः।

e) तस. नञ्-स्वरं बाधित्वा 'कृत्योक-' (पा ६, २, १६०) इत्यन्तोदात्तः। उप. √ध्वृ इत्यतो यत्प्रत्ययान्तनिपातनम् उसं. (पा ३, १, १२३)।

f) बस. अन्तोदात्तः (पा ६, २, १७२)। उप. √ध्वस्+भावे मनिन् प्र.।

g) तस. नञ्-स्वरः (पा ६,२,२) उप. √ध्वृ+क्तः प्र. द्र.।

h) लुग्विकरणे लेट्य् अडागमो द्र.। तिपः पित्त्वाद् अटश्चाऽऽगमस्वाभाव्याद् निघाते धातुस्वरो भवति। यद्-योगीयस् तिङ्-स्वरः (पा ८, १, ३०)।

i) भावे क्विप्। धातुस्वरस्तदवस्थः।

j) तद्धित इलन् प्र.। नित्स्वरः (पा ६,१,१९७) एतत् प्राति. उद्र. सरूपाद् इलच्- प्रत्ययान्तात् प्राक्करतया श्रूयमाणात् कृतः पृथग् द्र. (तु. तिल्व->तिल्विल- प्रत्ययस्वरः।

k) तत्र साधिवति वा तस्मै हितमिति वेत्यर्थे यत् प्र. (यक्र. पा ४, ४, ८९; ५, १, ५)। द्व्यच्कत्वादाद्युदात्तः (पा ६, १, २१३)। क्वचिद् वि. क्वचिच्च विशेष्यगर्भं वि. इत्यस्य यस्थ. विवेकः पराभिमतविमर्शसचिवः वैश. अनुसंधेयः। यत्तु सा. G. (तु. NW) च एतत् प्राति.

१, १०; २७, ११; कौ १,२९५; जै १, ३१, ३; –न्ये[a]? शौ १२, १, ४; –न्येभ्यः शौ १२, २, १६; –न्येषु शौ ११, ४, २३.

†अनत्[b]– -नत् ऋ १, १६४, ३०; शौ ९, १५, ८; पै १६, ६८, ९. [°नत्- <अप°, अवि°, अव्यव°, प्र°, वि°]

अनन-, अनितुम् <प्र°

२अनिल[c]– -लः खि ४,५,२७;२९.

†१अनु[d]– -नवः ऋ ५,३१,४; ७, १८,१४; तै १, ६,१२, ६; मै ४, १२, २; १४, १३; काठ ८, १६; कौ १,४४०; जै १,४६,४; –नवि ऋ ८, १०, ५; –नुषु ऋ १, १०८, ८.

†आनव[e]– -वः कौ १, ४५८[f]; –वम् ऋ ८, ७४, ४; कौ १,८९; जै १, ९, ९; –वस्य ऋ ७,१८, १३; –वाय[g] ऋ ६, ६२, ९; –वे ऋ ८, ४, १; कौ १, २७९; २, ५८१; जै १, २३, ५; ३,७, ७; शौ २०, १२०, १.

१*अन्- √१अन् द्र.

√२*अन्[h]

२*अन्[i]-

३*अन्[j]

४अन् <६अ <नञ्

√३*अन्[k]

अन-, -ना-, -ना इदम्- द्र.

अनं (न्-अं)शु[l]– -शु तै ३, २, २, १.

अनक्त- घृत°

अन(न्-अ)क्ष्[l]– -नक् ऋ २, १५, ७.

अन(न्-२अ)क्ष,क्षा[l]– -क्षा ऋ १०, २७, ११; –†क्षासः ऋ ९,७३, ६; पै ६, ११, ३.

अनक्षक[m]– -काय काठ ४५, ३.

अ-नक्षत्र[l]– -त्राः काठ ३७, १२.

¶अन(न्-अ)क्षसङ्ग[n]– -ङ्गः काठ २६, ३; क ४१, १; –ङ्गम्° तै ६, ३, ३, ३; मै ३, ९, २.

*अन(न्-अ)क्षि[l]-

अनक्षिक[p]– -काय तै ७, ५,१२,१.

अन(न्-अ)क्षित,ता[n]– -ताः मै ४,२,९[?].

अ-नग्न,ग्ना[n]– -¶ग्नः मै ३,१,५; ९,३; –ग्नाः ऋ ३,१,६; शौ १२,३,५१; –¶ग्ने काठ २५, ९; क ४०, २.

¶अ-नग्नंभावुक[q]– -कः काठ २५,

२अन्य- इत्यतोऽभिन्नत्वे सति तदर्थविशिष्टवैशिष्ट्यवृत्तितया व्याचिख्यासतस् तदरुचिरमिव भवति । स्वरपूर्वसंक्रमाऽनुपपत्तेरिति यावत् । अथ यत् PW प्रभृ. (तु. NW) ६अ+नि+(√या>) या- (=*अ-निया-) इत्येवं तस. सतो माध्यमिकाऽज्लोपमिवाऽऽस्थाय तदाश्रयमर्थं विवृणुयुस् तत्र लक्षणतोऽदोषो भवति । आर्थ्यां तु दृष्ट्या तावत् कुत्र कः कल्पः कथमुपकल्पतामित्यत्रापि पुनः वैश. एव शरणम् ।

a) मूको. 'अन्ने' इत्यपि पठ्यते (यद्र.) । एतदेव च प्रासङ्गिकमिव स्यादिति कृत्वेह यनि. प्राश्निकं चिह्नं प्रत्तं द्र. ।

b) 'तास्यनुदात्तेत्' (पा ६, १, १८६) इत्यस्याऽलब्धावसरत्वाच् शतृ-स्वरः ।

c) इलच् प्र. (पाउ १, ५३) । चित्स्वरः (पा ६, १, १६३) । तु. तृदिल-, सलिल- प्रभृ. ।

d) उः प्रत्ययः (तु. पाउ १, ७) । तस्य च नित्त्वादाद्युदात्तः (पा ६, १, १९७) । व्युत्पत्तितः प्राणिसामान्यपरं सत् प्रवृत्तितो मनुष्यकुलविशेषपरं प्राति. एतद् द्र. ।

e) प्राग्दीव्यतो येऽर्थास्तेष्व् अञ् (पा ४,१,८६) । ञित्स्वरः (पा ६, १, १९७) ।

f) 'सहस्रमानवः' इतीव स्वरद्वयोपेतां पदद्वयीं सतीं यत् सा. 'सहस्रसंख्याका मनुष्या यस्य' इति बस. इति कृत्वा व्याचष्टे ततस्तस्य पाठ इतो विभिन्नस्वरः प्रतीयेत ।

g) सामान्यविशेषातिरिक्तत्वादिहास्य रू. अर्थप्रवृत्तेर् मूलभूतस्य प्राति. १अनु- इत्यस्य मौलिक्याः प्रवृत्तेः सामान्यपरत्वमनुमीयेतेति दिक् ।

h) मूलतः स्थगनात्मकप्रतिबन्धसामान्ये प्रवृत्तस्य सतोऽस्यैव धातोः शब्दविशेषत्वेन परिणामे मूर्धन्यान्तत्वं द्र. (तु. पाधा. √अण् [शब्दे=शब्दप्रतिबन्धे ?,] पंजा. √अड़, आड़- प्रभृ.) । अनस्-, अन्त-, अन्ति, प्रभृ. तद्भवाश्चैतत्-प्रकृतिकत्वेनोपदर्श्यमानाः यद्र. ।

i) भावे क्विबन्तं प्राति. भवति । २अनु इत्यत्रास्योपयोगः यद्र. ।

j) अभ्यन्तरार्थीयः नि. । ३अन्तम-, अन्तर-, अन्तर्-, ?अनीक- प्रभृ. चैतत्-प्रकृतिकत्वेनोपदर्श्यमानाः यद्र. ।

k) कान्त्यर्थीयो धा. । ?अनीक-, आन- (लोके आनन- इत्यपि) प्रभृ. शब्दाश्चैतन्निष्पन्नाः यद्र. ।

l) बस. अन्तोदात्तः (पा ६, २, १७२) । उप. यद्र. ।

m) समासान्तः कप् प्र. । तै. पाभे. उप. इकारान्तं यद्र. ।

n) तस. नञ्-स्वरः (पा ६, २, २) । उप. यद्र. ।

o) प्रयोगतः क्रिवि. भवति ।

p) समासान्ते कपि ह्रस्वान्तेऽन्त्यात् पूर्वं स्वरे प्राप्ते कपि पूर्वः स्वरः उसं. (पा ५, ४, १५४; ६, २, १७३; १७४) । उप. इकारान्तत्वे द्विपू. काठ. पाभे. विशेषः द्र. ।

q) सस्व. नापू. द्र. । उप. नग्नोपपदाद् √१भू खुकञ् प्रत्ययो मुमागमश्च (पा ३, २, ५७; ६, ३, ६७) ।

५; ३१, १०; क ३९, २; ४७, १०.

¶अन(न्-अ)ग्नि॒[a]– -ग्निः काठ ८, १२; क ७, ७; -ग्नौ तै ५, १, ३, १; ४; ६, १, ८, ३; २, ९, २; काठ १२, १; १९, ३; २४, ४^{२}; २५, ८; क ३०, १; ३७, ५^{२}; ४०, १.

†अ॒न(न्-अ)ग्नि(त्र→)त्रा[b]– -त्राः ऋ १, १८९, ३; मै ४, १४, ३.

†अ॒न(न्-अ)ग्निदग्ध[c]– -ग्धाः ऋ १०, १५, १४; शौ १८, २, ३५.

¶अन(न्-अ)ग्निदाह्य– -ह्यम् काठ २३, ९.

‡अ॒न(न्-अ)ग्निष्वात्त– -त्ताः[d] मा १९, ६०; का २१, ४, १०.

अन(न्-अ)ङ्ग॒[a]– -ङ्गाय तै ७, ५, १२, २.

अनङ्ग-क[e]– -काय काठ ४५, ३.

¶अन(न्-अ)ङ्गार– -रम् काठ २४, ६; क ३७, ७.

अन(न्-अ)ङ्गुरि॒[a]– -रेः शौ ८, ६, २२.

अन(न्-अ)ङ्गुलि– -लेः पै १६, ८१, ४.

अनडुह्- अनस्- द्र.

¶अ॒(न्-अ)तिक्रम्य[c] मै ३, ८, १.

¶अ॒न(न्-अ)तिदाह[c]– -हाय तै ५, २, ५, ३; १०, ३; ५, २, ४; ५; मै १, ६, ३; ३, २, ४; ६; ८; काठ २०, ३; ९; क ३१, ५; ११; ४०, ४.

¶अ॒न(न्-अ)तिदृश्न[f]– -श्नम् तै २, ६, ५, २^{२}.

अ॒न(न्-अ)तिद्भुत[g]– -ता ऋ ८, ९०, ३.

¶अन(न्-अ)तिद्रव[c]– -वाय काठ २७, ७.

¶अ॒न(न्-अ)तिनेद[h]– -दाय मै ३, १०, ४^{२}.

¶अन(न्-अ)तिपन्न[c]– -न्नम् काठ ६, ८^{२}; क ४, ७^{२}.

¶अन(न्-अ)तिपाद[i]– -दाय काठ ३३, ६^{३}.

¶अ॒न(न्-अ)तिरेक[c]– -काय काठ ३१, १; क ४७, १[j].

¶अ॒न(न्-अ)तिरेच[k]– -चाय मै ४, १, २.

¶*अ॒न(न्-अ)तिवाद[c]– -दाय मै ३, १, ७[l].

¶अन(न्-अ)तिवादन[m]– -नाः काठ ३१, १२

¶अ॒न(न्-अ)तिवादिन्[n]– -दिनः मै ४, १, १३.

¶अ॒न(न्-अ)तिवादुक[o]– -कः तै ६, ४, ५, २.

*अ॒न(न्-अ)तिव्याध[p]-

अनतिव्याध्य॑[q]– -ध्यम् शौ ९, २, १६; पै १६, ७७, १.

---

[a] बस. अन्तोदात्तः (पा ६, २, १७२)। उप. यद्र.।

[b] तस.नञ्-स्वरः (पा.६, २, २)। उप. बस. वा उस. वा। तत्रापि पूर्वे कल्पे उप. √त्रा + कर्तरि कः प्र.। उत्तरे च कल्पे सोपपदात् √त्रा + कः प्र.। (तु. अ॒-देवत्र- टि.)।

[c] सस्व. नापूटि. द्र.। उप. यद्र.।

[d] 'अ॒नग्निदग्धाः' इति बाह्वृचः (१०, १५, १४) पाभे.। शेषं नापू. द्र.।

[e] समासान्तः कप् प्रत्ययः (पा ५, ४, १५४)।

[f] तस. नञ्-स्वरः (पा ६,२,२)। उप. प्रास.। तत्राप्य् उप. √दृश्+भावे नङ् उसं. (पा ३, ३, ९०)।

[g] सस्व. नापूटि. द्र.। उप. कृते १अ॒द्-भुत- इत्यत्र टि. द्र.।

[h] सस्व. एपूटिदि. द्र.। उप. अति√निद्+भावे घञ्।

[i] तस. उप. अति√पद्+घञ्।

[j] क्वचिद् मूको. '-चाय' इत्यपि पा. भवति (तु. नाउ.)

[k] उप. कृदंशे कुत्वाभाव एव नापू. विशेषः सस्व. द्विपूटि. द्र.।

[l] तस. नञ्-स्वरः (पा ६, २, २)। उप. यद्र.। यत्तु मुपा. °न॒° इति स्वरो निरदेशि तदप्रमाणं स्यात्।

[m] सस्व. नापूटि. द्र. (तु. नाउउ. समानप्रकरणके शाखान्तरीये प्राति.) उप. अति √वद्+ताच्छीलिकः कर्तरि ण्युच् उसं. (पा ३, २, १४८ उउ.)।

[n] सस्व. एपूटिदि. द्र.। उप. अति√वद्+णिनिः प्र.।

[o] कथमिह तस. नञ्-स्वरो भवति (पा ६, २, २) यावता नञ उत्तरवर्त्तिन्य् उकञ्-प्रत्ययान्ते कृत्य् अन्तोदात्तः शिष्टो भवति (पा ६, २, १६०) इति। उच्यते। उक्तोऽन्तोदात्त उक्तकृदर्थप्रवृत्तिनिमित्ततच्छीलादि-प्रतिषेधविषयत्वेनैव शिष्टः। तेन यत्र नञ् सिद्धसमग्र-कृदन्तार्थाद् भिन्नार्थोपस्थापनार्थो भवति तत्रोक्तस्यान्तोदात्तस्यानवसरत्वं सामान्यस्य नञ्-स्वरस्य च सावसरत्वं द्र.। एवम् अत्रास्य नञादेः प्राति. अतिवादुकत्वेतर-गुणवति वृत्तिर्भवतीति तत्त्वमनुसंधेयम्।

[p] नाउ. व्यु. औपयिकं द्र.। तस. नञ्-स्वरः (पा ६, २,२)। उप. अति√व्यध्+भावे घञि थाथादि-स्वरः (पा ६, २, १४४)।

[q] तद्धितः यत् प्र. (पा ५, १, ६६) तित्स्वरः (६, १, १८५)। ननु किमिति नञ्-सहितात् प्राति. प्र. उच्यते न नञ्-योगः पश्चादिष्यत इति। लक्ष्यस्वर-

अन(न्-अ)तिसृष्ट[a]– -ष्टः शौ १५, १२, ८; ११.

अन(न्-अ)त्युद्य[b]– -द्यम् शौ १०, ७, २८.

अन(न्-१अ)दत्[c]– -दन्तः शौ ६, ५०, २.

अनदती[d]– -तीः ऋ ३, १, ६.

¶**अन(न्-अ)धिस्क(न्न→)न्ना**[e]– -न्ना मै २, ५, २.

¶**अन(न्-अ)ध्वर्यु**[e]– -र्युम् मै ३, १०, ५.

†**अन(न्-अ)नुकृत्य,त्या**[f]– -त्यम् ऋ १०, ६८, १०; शौ २०, १६, १०; –त्या ऋ १०, ११२, ५.

¶**अन(न्-अ)नुक्शाति**[e]– -त्यै मै ४, ७, ५^{२}; काठ ३७, १६.

¶**अन(न्-अ)नुगति**[e]– -त्यै काठ ८, ४; क ६, ९.

¶**अन(न्-अ)नुध्यायिन्**[e]– -यिनम् मै १, ८, ५^{४}; काठ ६, ८; क ४, ३; ७; –यी मै १, ६, ४; ११.

¶**अन(न्-अ)नु>नूयाज**[g]– -जम् तै ६, १, ५, ३; मै ३, ७, २; काठ २३, ९; २४, ८; क ३६, ६; ३८, १.

¶**अन(न्-अ)नुशस्त**[e]– -स्तम् मै १, ९, ७; काठ ३४, २.

¶**अन(न्-अ)नुसर्ग**[e]– -र्गाय तै ७, ५, ७, ४; काठ ३३, ७^{४}.

अन(न्-अ)न्त[h]– -०न्त खि ७, ३, १; –॑न्तः ऋ १, ११३, ३; ६, ६१, ८; कौ २, ११०१; –॑न्तम् ऋ १, ११५, ५; १०, ७५, ३; मा ३३, ३८; का ३२, ३, ९; मै १, ८, ७¶; ४, १४, ४; शौ ८, ४, १७‡[i]; १०, ८, १२^{२}$; २०, १२३, २; पै २, ८१, ३$; १३, ४, ६$; १६, १०, ७; १०१, ८^{२}$; –न्तान् ऋ ७, १०४, १७; –न्ताय मा ३०, १९; का ३४, ४, १; –न्तासः ऋ ५, ४७, २; –न्ते ऋ १, १३०, ३; ४, १, ७; –न्तैः ऋ १, १२१, ९.

अनन्त-नामन्– -मानि खि ७, ३, ३.

अनन्त-शुष्म[j]– -ष्माः ऋ १, ६४, १०.

अन(न्-अ)न्तर[h]– -रः, –रम् खि ३, १५, १२; –राः पै १, ६५, १.

¶**अन(न्-अ)न्तरय**[k]– -याय काठ ८, १३; क ८, १.

¶**अन(न्-अ)न्तराय**[e]– -यम्[l] तै ६, १, ८, ४; २, १०, २; –याय तै ५, ४, १२, ३.

अन(न्-अ)न्तरित[e]– -तः मै ४, ४, १०.

¶**अन(न्-अ)न्तरिति**[e]– -त्यै तै ५, २, ५, ६.

¶**अन(न्-अ)न्तर्हित**[m]– -तः मै १, ८, १; ३, ६, ६^{२}; काठ २३, ३^{२}; ३७, ६; क ३५, ९^{२}.

¶**अन(न्-अ)न्तर्हिति**[m]– -त्यै मै १, ४, १३; ३, २, ५.

?**अनंत्रङ्ङ्या**[n]– -०ङ्ये पै ६, ८, ५.

अन(न्-अ)न्ध[e]– -न्धः खि २, १०, २; तै ५, ६, ४, २¶; पै ११, १, ८.

¶**अन(न्-अ)न्न**[o]– -न्नम् मै २, १, २^{६}; ५, ७^{३}; काठ १०, ३; –न्नेन मै २, १, २; ५, ७.

अन(न्-२अ)न्य[h]– -न्यान् तै ३, २, ८, २; पै १, ८८, २.

¶**अन(न्-अ)न्वग्भाव**[p]– -वाय मै ३, ८, ५^{२}.

¶**अन(न्-अ)न्ववचार**[e]– -राय तै १,

सिद्ध्यर्थमिति। तथाहि। नञ्-योगात् पूर्वमुत्पद्यमाने तद्धिते तदर्थत्वे वा प्र. अगुणप्रतिषेधीयत्वे वा नञः समानं नञ्-स्वरेण भाव्यमथाऽतदर्थत्वे च प्र. गुणप्रतिषेधीयत्वे च नञोऽन्तोदात्तेन भाव्यम् (पा ६, २, १५६)। उभयथाऽपि चैवं तित्स्वरितत्वस्य लक्ष्ये विद्यमानस्याऽदर्शनं स्यात्। यनि. प्रकारेण व्याख्यायमाने तु निरवद्याऽभीष्टसिद्धिरित्यनुमन्यताम्।

[a]) तस. नञ्-स्वरः (पा ६, २, २)। उप. अति√सृज् + क्तः प्र.।

[b]) तस. नञ उत्तरे गस. √वद् इत्यस्मात् क्यबन्तं प्राति. भवति। तेन 'कृत्य-' (पा ६, २, १६०) इत्युक्तः स्वरः।

[c]) सस्व. एपूटि. द्र.। उप. यद्र.।

[d]) स्त्रियां ङीपः (पा ४, १, ६) पित्त्वान्निघाते स्वरेऽभेदः।

[e]) तस. नञ्-स्वरः (पा ६, २, २)। उप. यद्र.।

[f]) तस. नञ्स्वरापवादः 'कृत्यो-' (पा ६, २, १६०) इत्युक्तः स्वरः। उप. अनु√कृ + क्यप् प्रत्ययः।

[g]) बस. अन्तोदात्तः (पा ६, २, १७२)। उप. यद्र.। तै. °नू° इति दीर्घः (पा ६, ३, १२२)।

[h]) बस. अन्तोदात्तः (पा ६, २, १७२)। उप. यद्र.।

[i]) 'अनन्तान्' इति बाह्वृचः (७, १०४, १७) पाभे.।

[j]) बस. पूपप्रस्व. (पा ६, २, १)। उप. यद्र.।

[k]) तस. उप. अन्तर् √इ + भावे अच् (पा ३, ३, ५६) यद्र.।

[l]) तृ. स्थाने द्वि१ सद् क्रिवि. भवति।

[m]) तस. नञ्-स्वरः। उप. <अन्तर् √धा यद्र.।

[n]) दुरूहः संस्करणान्तरसापेक्षः मुपा. भवति।

[o]) तस. 'विभाषा तृन्-' (पा ६, २, १६१) इत्य् अन्तोदात्तः। उप. यद्र.।

[p]) तस. नञ्-स्वरः। मूको. उप. गकार-स्खलनं संटि. संकेतितं द्र.। उप. अन्वग्-भावँ- यद्र.।

६, ८, ४; २, २, २, ३; ६, ६, ३; ६, २, १, ६; ४, २, ६; ९, ५.

¶**अन(न्-अ)न्ववजय**[a]- -याय मै ३, ९, ५; ३, १०, ६^{२}.

¶**अन(न्-अ)न्ववाय**[b]- -याय मै १, १०, १३; २०; २, ५, ६; ३, २, ४^{२}; ६, १; ४, ५, १; ८, ५; काठ २०, ६; १३; ३१, १०; ३६, ७; १४; क ३१, ८; ४०, १; ४७, १०.

¶**अन(न्-अ)न्वारब्ध**[c]- -ब्धम् तै ६, ३, ८, २.

¶**अन(न्-अ)न्वारभ्य**[b] तै ३, १, २, ४^{२}.

अन(न्-अ)पक्रमिन्[d]- -मिणः मै २, ३, २; ५.

¶**अन(न्-अ)पक्रामत्**- -मन्तः, -मन्तौ^{२} काठ ७, ५.

अन(न्-अ)पक्रामुक[e]- -काः मै ४, २, ४.

अन(न्-अ)पक्षेयुत(म>)मा[f]- -मा मै ३, ७, ३.

¶**अन(न्-अ)पग,गा**[b]- -गाः तै १, ५, ८, २; २, १, १, २; -गान् काठ ११, ८; ३७, १६.

अन(न्-अ)पगामि(न्→)नी[g]- -नीम् खि २, ६, २; १५.

†**अन(न्-अ)पच्युत**[h]- -तः ऋ ४, ३१, १४; ८, ९३, ९; ९, ४, ८; १०, २६, ८; मै २, १३, ६; काठ ३९, १२; कौ २, ४०४; ५७४; जै ३, ३१, २४; ४६, १२; शौ २०, ४७, ३; १३७, १४; -तम् ऋ ४, १७, ४; ५, ४४, ६; ८, ९२, ८; १०, ९३, १२; कौ २, ९९३; जै ४, २७, २; -ता ऋ ८, २६, ७; ९, १११, ३^{२}; कौ २, ९४१^{२}; जै ४, १, २.

¶**अन(न्-अ)पच्छेद**[i]- -दाय मै ४, ६, ५.

¶**अन(न्-अ)पजय्य**[j]- -य्यम् तै १, ७, ५, ४^{२}; ५, २, १, १^{२}; मै ३, २, १^{२}.

अन(न्-अ)पत्य[k]- -त्यम् शौ १२, ४, २५; -त्यानि ऋ ३, ५४, १८.

अनपत्य-ता[l]- -ताम् शौ ४, १७, ६; पै ५, २३, ८[m].

अन(न्-अ)पत्यवत्[b]- -वन्तः शौ १८, २, ४७.

¶**अन(न्-अ)पदोष्य**[n]- -ष्यम् मै २, १, ४^{२}.

¶**अन(न्-अ)परुध्य**[o]- -ध्यः तै २, २, ८, ५; ३, १, २; -ध्यम् तै २, ३, १, ५.

अन(न्-अ)परोधु(क→)का[p]- -का मै ४, ४, २¶.

¶**अन(न्-अ)परोध्य**[q]- -ध्यः मै २, २, १; काठ ३८, १२^{२}.

अन(न्-अ)पवाच(न→)ना[r]- -ना शौ ८, ८, ९.

अन(न-अ)पवृज्य[s]- -ज्यान् ऋ १, १४६, ३.

†**अन(न्-अ)पव्ययत्**[b]- -यन्तः ऋ ६, ७५, ७; मा २९, ४४; तै ४, ६, ६, ३; मै ३, १६, ३; काठ ४६, १; पै १५, १०, ७.

अन(न्-अ)पस्पृश्[b]- -स्पृक् शौ १३, १, २७.

†**अन(न्-अ)पस्फुर्**[b]- -स्फुरः ऋ ८,

---

a) तस. नञ्-स्वरः (पा ६, २, २)। उप. अन्व(नु-अ)व √जि+भावे अच् प्रत्ययः।

b) सस्व. नापूटि. द्र.। उप. यद्र.।

c) सस्व. एपूटि. द्र.। उप. अन्वा√रभ्+क्तः प्र. द्र.।

d) तस. नञ्-स्वरः। उप. अप √क्रम्+इनिः प्र. (तु. पाउ ४, ६)। यद्वा तद्धित इनिः प्र. (पा ५, २, ११५)।

e) तस. 'कृत्योक-' (पा ६, २, १६०) इत्युक्तः स्वरः। (वैतु. अ-क्षोधुक-, अनपरोधुक-, अ-निर्दाहुक- प्रभृ.)। उप. अप√क्रम्+उकञ् प्र. यद्र.।

f) सस्व. नापूदि. द्र.। उप. अप√१क्षि+यत्- प्र. कृते आतिशायनिकस्तमप् प्र.।

g) तस. नञ्-स्वरः (पा ६, २, २)। उप. अप√गम्+णिनिः प्र.।

h) सस्व. नापूटि. द्र.। उप. <अप√च्यु यद्र.।

i) उप. अप√च्छिद्+भावे घञ्। सस्व. एपूटि. द्र.।

j) तस. 'कृत्योक-' (पा ६, २, १६०) इति नञ्-स्वरापवादोऽन्तोदात्तः। उप. कृत्यः प्र. शक्यार्थे द्र. तत्साहचर्येण धातोरयादेशस्य निपातनात् (पा ६, १, ८१)।

k) बस. अन्तोदात्तः (पा ६, २, १७२)। उप. यद्र.।

l) 'अनप-त्यताम्' इति पपा. भवति। तत्राऽवग्रहो भिन्नक्रमः द्र.। न ह्यु अपत्य- इत्येतद् अनपत्य- इत्येतद्वाऽवगृह्णन्ति (तु. W.)। भावे तल् प्र. लित्स्वरश्च (पा ५, १, ११९; ६, १, १९३)।

m) 'अनुपश्यताम्' इति मूको.।

n) तस. नञ्-स्वरापवादः 'कृत्योक'-(पा ६, २, १६०) इत्यन्तोदात्तः द्र.। उप. अप√दुष्+ण्यत् प्र.।

o) सस्व. नापूटिदि. द्र.। उप. अप√रुध्+क्यप् प्र.।

p) 'अ-क्षोधुक-' इत्यत्र टि. सस्व. द्र.। उप. अप √रुध्+उकञ् प्र.।

q) सस्व. द्विपूटिदि. द्र.। उप. ण्यदन्तं यद्र.।

r) बस. अन्तोदात्तः (पा ६, २, १७२)। उप.< अप√वच् यद्र.।

s) सस्व. कृते 'अनपजय्य-' इत्यत्र टि. द्र.। उप. अप √वृज्+क्यप् प्र.।

६९, १०; शौ २०, ९२, ७.

अन(न्-अ)**पस्फुरत्**[a]– -रन् शौ १०, १०, २७; पै १६, १०९, ७; –रन्तः पै ५, ६, १; १०; १६, १; –रन्तम् शौ १८, ४, ३६; पै ५, ४०, ८; –रन्तौ शौ ९, १, ७; पै १६, ३२, ६.

अनपस्फुरन्ती– -न्ती शौ १२, १, ४५; पै २, ७३, २; –न्तीः शौ १८, ४, ३४; -न्तीम् ऋ ४, ४२, १०; मा ७, १०; का ७, ४, २.

अन(न्-अ)**पस्फु**(र→)**रा**[a]– -राम् ऋ ६, ४८, ११.

अन(न्-अ)**पायिन्**[a]– -यिनः का २, ५, ८.

अन(न्-अ)**पावृत्**[b]– -वृत् ऋ ६, ३२, ५; १०, ८९, ३.

अन(न्-अ)**पिगृह्य** काठ २७, ८¶.

¶**अन**(न्-अ)**पिधाय**[a] मै ४, ६, ३^{३}.

अन(न्-अ)**पिनद्ध**[a]– -द्धम् ऋ ६, ७२, ४.

अन(न्-अ)**पिमन्त्र**– -न्त्रः काठ १३, १¶.

¶**अन**(न्-अ)**पेक्ष**[c]– -क्षम् मै १, ५, ७.

¶**अन**(न्-अ)**पेक्षमाण,णा**[a]– -णाः मै १, १०, १३; २०; ३, २, ४; ४, ८, ५; काठ ३६, ७; १२.

अन(न्-अ)**पे**(त→)**ता**[a]– -ताः मा १८, ६५; का २०, ४, ८; तै ५, ७, ७, ३.

¶**अन**(न्-अ)**पोब्ध**[a]– -ब्धः तै २, ४, १३, १^{२}; काठ ११, ४^{२}.

अनप्त[d]– -प्तम् ऋ ९, १६, ३.

अन(न्-अ)**प्नस्**[e]– -प्नसः ऋ २, २३, ९.

अन(न्-अ)**भिक्रम्य**[a] तै ३, १, २, ३¶.

¶**अन**(न्-अ)**भिगत**[a]– -तम् मै २, २, ७; ४, ६, ४.

¶**अन**(न्-अ)**भिघारित**[a]– -तम् तै २, ६, ३, ५.

¶**अन**(न्-अ)**भिघृत**[a]– -तम् मै १, १०, २०; ३, १०, ५; काठ २३, १; २५, ८; ३६, १४; क ३५, ७; ४०, १.

¶ **अन**(न्-अ)**भिचरत्**[a]– -रन् मै ४, ५, ५.

¶**अन**(न्-अ)**भिजित**[a]– -तः मै ३, ८, १; काठ ३०, ५; –तम् तै ३, ४, ३, ४^{२}; ५, ४, ६, ४; मै ३, ८, १०; ४, ५, १; काठ ८, ७; ९, १५; क ७, ४; –तस्य तै ७, ५, ९, २; मै ३, ४, १; काठ २१, ११.

अन(न्-अ)**भिदाह**– -हाय काठ २६, १.

†**अन**(न्-अ)**भिद्रुह्**[a]– -द्रुहा ऋ २, ४१, ५; कौ २, २६१; जै ३, २२, ८.

अन(न्-अ)**भिद्रोह**[a]– -हाय मै ४, ३, ४.

¶**अन**(न्-अ)**भिधृष्णुवत्**[a]– -वन् मै १, १०, १४; काठ ३६, ८.

¶**अन**(न्-अ)**भिध्वंसयत्**– -यन् काठ २७, ८.

¶**अन**(न्-अ)**भिप्रपाद**– -दाय क ४५, ३.

¶**अन**(न्-अ)**भिमानुक**[f]– -कः मै १, ४, १३; ३, १०, १^{२}; ५.

¶**अन**(न्-अ)**भिमृत**[a]– -तम्, –ते मै १, ६, ३.

†**अन**(न्-अ)**भिम्लातवर्ण**[a]– -र्णः ऋ २, ३५, १३; काठ ३५, ३; क ४८, ४.

¶**अन**(न्-अ)**भिविद्ध**[a]– -द्धम् तै २, ६, ८, ४.

†**अन**(न्-अ)**भिश** (स्त→) **स्ता**[a]– -स्ता ऋ ९, ८८, ७; कौ २, ८२३; जै ४, ४, ४.

१**अन**(न्-अ)**भिशस्ति**[a]– -स्ति[g] मा ५, ५; का ५, २, २.

२**अन**(न्-अ)**भिशस्ति**[e]– -स्तिः मै १, ४, ३; ८; काठ ५, ४; ३२, ४; ३४, १९; क ४८, १.

---

[a]) तस. नञ्-स्वरः (पा ६, २, २)। उप. यद्र.।

[b]) तस. नञ्-स्वरः (पा ६, २, २)। उप. अप√२वृ+क्विप्। प्र. उपसर्गस्य दीर्घः (पा ६, ३, ११६)।

[c]) सस्व. नापूटि. द्र.। उप. <अप√ईक्ष्। प्रयोगतः क्रिवि. भवति।

[d]) अन्-अप्त- इति पदविभागः प्रागर्वाक्-संमतो भवति। तत्र तावत् सा. वें च उप. आप्त- (<√आप्) इत्यस्य ह्रसितादिरूपान्तरमिति मन्वाते। PW. प्रभृ. च २अप्- इत्यनेनास्याऽभिसंबन्धं संभावयन्ति। वस्तुतस्त्वेतद् √आप् इत्यस्य सगोत्राद् २अप्- इत्यस्य च मूलभूताद् √अप् इत्यस्मात् क्ते निष्पन्नं सन् नञ्-पूर्वत्वे प्रवाहाऽभाववद्-वाचकं च सद् अपामपेक्षया 'दुष्टर-' इत्येतत्-सकक्षतया सोमस्य समुचितं वि. भवेदिति विचारयन्तु तत्त्वतः सुधियः।

[e]) बस. अन्तोदात्तः (पा ६, २, १७२) उप. यद्र.।

[f]) समासस्वरार्थम् अ-क्षोधुक- इत्यत्र टि. द्र.।

[g]) क्रिवि. भवति। तेनैतद् रू. न. द्वि१ इति। यत्तु उ. तदनु म. च MW चैवं बस. इति कृत्वा 'आज्यम्' इत्यस्य वि. इत्याहुः। तन्न। तथा सति ह्यन्तोदात्तं नाम प्राति. (तु. नाउ.) एतत् स्यात् (पा ६, २, १७२)। एतदादीनि त्रीणि पदानि प्र१ सत आज्य- इत्यस्य कर्मप्रसङ्गाऽऽक्षेप्यस्य सामान्येन वि. भवन्तीति चापि ब्रुवाणावेतौ व्याख्यातृवरौ (उ. म. च) साहसातिशयं कुर्वाणौ भवतः (यतु. अभिशस्तिपा-, अनभिशस्तेन्य-)।

अन(न्-अ)**भिशस्तेन्य**[a]- -न्यः मै १, २, ९; -न्यम् मा ५, ५; का ५, २, २; तै १, २, १०, २; ६, २, २, ४^{२}¶; मै १, २, ७; काठ २, ८; क २, २; -न्याय मै १, ४, १४¶.

¶**अन**(न्-अ)**भिषुत**[b]- -तस्य तै ६, ६, ९, २; मै ४, ७, ७; -तान् काठ २७, १; ३०, ७; क ४२, १.

अन(न्-अ)**भिहित**[b]- -ताय तै ७, ४, २२, १; काठ ४५, १.

अन(न्-अ)**भीशु**[c]- -शुः ऋ [१, १५२, ५; ४, ३६, १]; ६, ६६, ७.

¶**अन**(न्-अ)**भीष्ट**[b]- -ष्टः मै ३, १०, ४; -ष्टाः मै १, १०, १७; २०; काठ ३६, ११; १४.

अन(न्-अ)**भ्यक्त,क्ता**[b]- -क्तः खि ५, १३, १; मै १, ८, २¶; शौ २०, १२८, ६; -¶क्ताः तै ७, १, १, ३; मै १, ८, २; काठ ६, २; २५, १०; २६, ५; क ४, १; ४०, ३; ४१, ३.

¶**अन**(न्-अ)**भ्यवचारु**(क→)**का**[d]- -का मै ३, ८, ७.

अन(न्-अ)**भ्यारूढ**[b]- -ढम् शौ ११, ७, २३; पै १६, १५५, ४.

¶**अन**(न्-अ)**भ्यारोह**[e]- -हाय काठ ३६, ७.

¶**अन**(न्-अ)**भ्युदित**[b]- -तम् मै ४, ६, ४.

अन(न्-अ)**भ्रि**[c]- -भ्रयः शौ १९, २, ३; पै ८, ८, ९; १२, ९; ९, ११, ९.

अन(न्-अ)**भ्रिखा**(त→)**ता**- -ता पै ९, ९, ५.

अ-नमस्यु[b]- -स्युः ऋ १०, ४८, ६.

१**अन**(न्-अ)**मित्र**[f]- -त्रम् मा १८, ६; का ३, २, ६^{४}; १९, ४, २; तै ४, ७, ३, २; मै २, ११, ३; काठ १८, ९; ३७, १०^{४}; क २८, ९; शौ ६, ४०, ३^{४}.

२**अन**(न्-अ)**मित्र,त्रा**[g]- -त्रम् शौ १२, १, ४७; -त्राः काठ ३७, १०; -त्राम् शौ १२, १, १०; -त्राय तै १, ८, १०, २; -त्रैः काठ ३७, १०.

अन(न्-अ)**मीव,वा**[c]- -†वः ऋ ७, ४६, २; ५४, १; मा ३३, ८६; तै ३, ४, १०, १; मै १, ५, १३; शौ २, २९, ६$; पै १, १३, ३$; ५, २८, ७$; ७, ६, १०; -†वम् ऋ १०, १४, ११; शौ १८, २, १२; -वस्य ऋ ३, १६, ३; मा ११, ८३; का १२, ७, १८; तै ४, २, ३, १; ५, २, २, १; मै २, १०, १; काठ १६, १०; १९, १२; क २५, १; ३१, २; -वा शौ ११, १, २२; -वाः ऋ ३, २२, ४; ६२, १४; १०, १७, ८; १८, ७; ३५, ६; ३७, ७; खि २, ८, ३; मा १, १; ४, १२; १२, ५०†; का १, १, २; ४, ५, ४; १३, ४, ६†; तै १, १, १, १; ४, २, ४, ३†; मै १, २, ३; २, ७, ११†; काठ १, १; १६, ११†; ३०, १०^{२}; ¶; क १, १; २५, २†; ४६, ८^{२}; ¶; शौ २, ३०, ३; ३, १४, ३; १२, १, ६२; २, ३१†; १८, १, ४२†; ३, ५७; ४, ४६; -वान् शौ १२, २, २६; -वाम् ऋ १०, ९८, ३; पै १४, ३, २; -वासः ऋ [३, (५४, २) ५९, ३]; मै ४, १०, २†[h]; १२, ६.

?**अनय**[i]- -यम् पै ५, १८, २‡[j].

अन(न्-अ)**राति**[k]- -तिः पै ९, ३, ९-१३.

---

[a]) तस. नञो गुणप्रतिषेधीयत्वादन्तोदात्तः उसं. (पा ६, २, १५५)। उप. **अभिशस्त-** (यद्र.)+स्वार्थे एन्यः प्र.उसं. (पा ५, ३, ११५)।यत्तु भा.(तै ६, २, २, ४) कृत्तया तुडागमपूर्वकम् एन्य-प्रत्ययेन व्यु.विकल्प्याऽन्तोदात्तं छान्दसत्वेन व्याचष्टे। तदयुक्तम् । अर्थतः प्रस्ताव्यमानस्य प्र. कृत्याऽन्तर्भाव्यत्वात् **'कृत्योक-'** (पा ६, २, १६०) इत्यन्तोदात्तस्य सुलक्षितत्वादिति भावः। यदपि उ.म.च (मा ५, ५) '°**शस्तेनी**(<√नी)-' इति कृद्-उत्तरपदप्रकृतिस्वरलक्षणं प्राति. वदन्तौ लिङ्गव्यत्ययं च विभक्तिव्यत्ययं चाहतुः । तदप्यसत् । तथा हि सति **'उदात्तस्वरितयोः'** (पा ८, २, ४) इति विभक्तिस्वरितत्वाऽऽपत्तेः ।

[b]) तस. नञ्-स्वरः (पा ६, २, २) । उप. यद्र. ।

[c]) बस. अन्तोदात्तः (पा ६, २, १७२)। उप. यद्र. ।

[d]) उप. **अभि-अव√चर्+उकञ्** प्रत्ययः । शेषम् **अनपरोधुक-** इत्यत्रत्ये टि. द्र. ।

[e]) तस. नञ्-स्वरः (पा ६, २, २) । उप. **अभि-आ √रुह्+**भावे घञ् प्र. ।

[f]) बस. अन्तोदात्तः (पा ६, २, १७२) । भावप्रधानो निर्देशो भवति । अथवा **'अव्ययम्'** (पा २, १, ६) इत्यर्थाभावे नञ् अव्य. उ. सुपा समस्तं स्यात् तेन च अस. सासस्व. (पा ६, १, २२३) इति दिक् ।

[g]) बस. प्रयोगतः वि. इति नापू. विवेकः ।

[h]) '°**मीमासः**' इति सुपा. सु-**शोधः** ।

[i]) मूको. विकृतो भवति । **शोधस्य** सावसरत्वे सति शाखान्तरसंवादितरत्वाद् **'आमयम्'** इत्येव सुश्रवतरम् ।

[j]) **'यक्ष्मम्'** इति बाह्वृचः (१०, १३७, ४) पाभे. ।

[k]) ओषधिसेवनसमकालमेवाऽरातिभ्यो रोगरूपेभ्यो मुक्त इत्यभिप्रायाद् बस. द्र. (तु. **सहौषधि-**) ।

?अनरुषः[a] खि ५, ७, ४, ८.

अन(न्-अ)र्पण[b]– **-णम्** शौ १२, ४, ३३.

‡अन(न्-अ)र्मन्[c]– **-र्मणाम्** शौ ७, ८, १.

अन(न्-अ)र्व,र्वा[d]– **-र्वम्** ऋ १,१६४, २; १८५, ३; शौ ९, १४, २†; १३, ३, १८; पै १६, ६६,२†; -र्वा[e] ऋ [२, ४०, ६; ७, ४०, ४].

अन(न्-अ)र्वन्[f]– **-र्वणः** ऋ ५, ५१, ११[g];८, ३१, १२[h]; -र्वणम् ऋ १०, ९२, १४[i]; -र्वणाम् ऋ १०, ३६,११;६५,३; -र्वन् ऋ १, ११६, १६; -र्वा ऋ १,९४, २; ४,१७,२०; ५,४९,४; [(६, १८, २) ७, २०, ३]; १०, ६१, ५[j]; १३; ९९, ३; मा ६, १२; का ६, ३, १; तै १, ३, ८, १; ६, ३, ८, ४¶; मै १, २, १६; ३, १०, १[k]; ४, १४,१†; काठ ३, ६; ९, ४; क २, १३; ८, ७; पै १२, १, २†; -र्वाणः ऋ १, १९०,६; ८, १८,२; -†र्वाणम् ऋ १, ३७, १; ५१, १२; १३६, ५; १९०, १; २, ६, ५; ६, ४८, १५; ७, ९७, ५; ८, ९२, ८; तै ४, ३, १३, ६; मै ४, १०, ५; काठ १७, १८; २१, १३; कौ २, ९९३; जै ४, २७, २.

¶अन(न्-अ)र्वाञ्च्[b]– **-र्वाक्** मै ३, १०, ४.

?अनर्विश्- अनस्- द्र.

?*अन(न्-अ)र्श[l]-

†अनर्श-राति[m]– **-तिम्** ऋ ८,९९, ४; शौ २०, ५८, २.

अन(न्-अ)र्शनि[n]– **-निम्** ऋ ८,३२,२.

¶अन(न्-अ)वक्लृप्तः[b]– **-प्तः** तै ७, १, १, ३; ६.

¶अन(न्-अ)वकाम[b]– **-माय** मै ४, १, १४.

¶*अन(न्-अ)वक्लेश[b]– **-शाय** काठ २३, ६.

अन(न्-अ)वक्षाम[o]– **-मः** पै १६, १२४, ७.

¶अन(न्-अ)वगत[b]– **-तम्** तै २, ३, १, ४; मै २, २, १.

अन(न्-अ)वग्लायत्[p]– **-यता** ऋ ४, ४, ७; ६, १०१, ३.

¶अन(न्-अ)वच्छित्ति[q]– **-त्त्यै** तै ६, १,११, ५; २, १, २; ९,२.

¶अन(न्-अ)वजय[r]– **-याय** काठ २६, ७; क ४१, ५.

---

[a] **अ-ररिवस्-** >**अ-ररुषः** इति मूको. साद्दयसुपुष्टः शोधः स्यात् (तु. संटि.) ।

[b] तस. नञ्-स्वरः (पा ६, २, २) । उप. यद्र. ।

[c] बस. अन्तोदात्तः (पा ६, २, १७२) । यश्च **'अनर्वणाम्'** इति ऋ (१०, ३६, ११) पाभे. स उप. वकार-मकारान्यतरमध्यत्वे प्राकृतायित इव संभाव्येत ।

[d] समासस्वरार्थं नापूटि. द्र. ।

[e] यनि. वा स्त्री. रू. एतद् **अनर्वन्-** इत्यस्य वेति विवेक्तुं दुष्करमिव भवति (यतु. उभयत्र उप.) ।

[f] सस्व. द्विपूटि. द्र. ।

[g] इह सा. एतद् रू. प्र१ चोत्तरार्धे **'पूषा'** इत्यनेन समानाधिकरणं चेति प्रतिपद्यते । प्र१ च संप. चाऽदिति-सकृत्तदेवविशेषपरमित्यर्वाञ्चः (तु. BW. GW. MW., वैतु. NW. ORN. च यत्र यनि. प्र३ इति व्यवस्थापयितुमिष्टं भवति) । तथा **अन्-अर्वण-** इति पृथक् प्राति. यत् कल्प्यते तत्रोपोत्तमस्वरोऽपलक्षण आपद्येतेति तस्य प्राति. एव स्वरूपतश्चिन्त्यत्वमुपक्षिपेत् । अत इह द्वि३ रू. **'नः'** इत्येतत्समानाधिकरणमिति विमृड्भिर्विचार्यताम् ।

[h] नापूटिदि. प्र१ एतद् रू. वि. चेति यत् कैश्चिद-र्वाग्भिरुपतर्कितं भवति तत्र सौवरी विप्रतिपत्तिर् गपू. द्र. ।

[i] इह रू. उपधाया दीर्घाभावश्छन्दः-प्रयोजितः । एतदपि संप. देवविशेषपरमिति यत् केचिदर्वाञ्च आस्थिषत तत्र चोद्यम् एपूटिदि. द्र. ।

[j] **अनर्व-** इत्यस्य स्त्री. रू. इति PW. । तच्चिन्त्यम् । प्रकरणेऽस्त्रीविषयत्वाच्च पुं-सामानाधिकरण्याच्चेति दिक् ।

[k] **'°र्वाक्'** इति मुपा. चिन्त्यः । तु. नापू. स्थलम् ।

[l] नाउ. व्यु. औपयिक इति कृत्वा निर्देशोऽयं द्र. (तु. नाउ. टि.) ।

[m] पूप. उप. सद्. **अर्श-** इति भाववचनो वा वि. वेत्येतद्विवेचनमुपाश्रितं भवति यथेह बस. स्यादुत तस. इति । प्रथमं भावपक्षे तावद् नापू. प्राति. बस. अन्तोदात्तेन भाव्यम् (पा ६, २, १७२) । अत्रापि च बस. पूपप्रस्व. सता **'°र्श°'** इत्येवं स्वरसंकेतेन भाव्यम् । न चैवमुपलभ्यते । अतः नापू. प्राति. तस. नञ्-स्वरः (पा ६, २, २ [वैतु. **अर्श-** इत्यत्र GW.]) । अथवा, नापू. प्राति. मा निर्देशि । ***अर्श-राति-** इत्येतद् मौलिकं प्राति. स्यात् । तस्य च बस. सतः प्रकृते तस. नञ्पूर्वत्वेन परामर्श इति मतं स्यादिति दिक् (यतु. ***अर्श-राति-**) ।

[n] वैसं. सतः स्वरतः पदविभाग इव प्रादर्शि ।

[o] उप. **अव√क्षै+क्तः>मः** (पा ८,२, ५३) ।

[p] तस. नञ्-स्वरः (पा ६, २, २) । उप. **अव √ग्लै+शतृ-**प्र. ।

[q] उप. **अव√छिद्+स्त्रियां क्तिन्** प्र. । सस्व.नापूटि.द्र. ।

[r] तस. उप. **अव√जि+भावे अच्** प्र. ।

¶**अन(न्-अ)वत्त, त्ता**[a]- -त्तम् मै ३, १०, ३; -त्ताम् मै ४, ८, १.

¶**अन(न्-अ)वदानीय**[b]- -यम् काठ १३, ५^{2}; -यानि मै २, ५, ५.

अन(न्-अ)वद्य,द्या[c]- -०द्य ऋ १, ३१, ९; १२९, १^{2}; १७४, २; १०, १४७, २; -द्यः ऋ ९, ६९, १०; -†द्यम् ऋ १, ७१, ८; मा ३३, ११; का ३२, १, ११; तै १, ३, १४, ६; मै ४, १४, १५; -द्यस्य ऋ १, ३३, ६; -द्या ऋ १, ७३, ३; -द्याः ऋ १, १२३, ८; २, २७, २; ३, ३१, १३; ६, १९, ४; मै ४, १२, १[d]‡; -द्याभिः ऋ ४, ३२, ५; शौ २, २, ३; पै १, ७, ३; ७, ९, ३; -†द्यासः ऋ ७, ५७, ५; ९१, १; मै ४, १४, २; -†द्यैः ऋ १, ६, ८; शौ २०, ४०, २; ७०, ४.

†अनवद्य-रू(प→)पा[e]- -पाः ऋ १०, ६८, ३; शौ २०, १६, ३.

अन(न्-अ)वद्राण[f]- -०ण काठ ३७, १०^{2}; -णः काठ ३७, १०^{2}; शौ ८, १, १३; पै १६, २, ३.

अन(न्-अ)वधर्ष्य[c]- -र्ष्यम् शौ ८, २, १०; पै १६, ३, १०.

¶**अन(न्-अ)वपाद**- -दाय काठ ३३, ६^{3}.

अन(न्-अ)वपृग्ण[g]- -ग्णा ऋ १, १५२, ४.

†**अन(न्-अ)वब्रव**[h]- -वः ऋ १०, ८४, ५; शौ ४, ३१, ५; पै ४, १२, ५.

अन(न्-अ)वभ्रू[i]-

अनवभ्र-राधस्[c]- -धसः ऋ १, १६६, ७; [२, ३४, ४; ३, २६, ६]; ५, ५७, ५.

¶**अन(न्-अ)वरुद्ध,द्धा**[a]- -द्धः मै ३, ९, ४; काठ २४, ८; क ३८, १; -द्धम् मै १, ५, ७^{2}; ९, ७; ११, ९; ४, ७, ३; काठ १४, ९^{2}; २९, ७; क ४५, ८; -द्धस्य तै ५, २, ५, ६^{2}; मै ३, ४, १; काठ २१, ११; -द्धा तै १, ७, ६, ७; काठ ८, १२; क ७, ७; -द्धाः तै ५, १, ८, २; काठ ९, १५; १९, ८; २२, ७; क ३०, ६; ३५, १.

¶**अन(न्-अ)वरुध्य**[j] काठ १०, १.

अन(न्-अ)वस[k]- -सः ऋ ६, ६६, ७.

¶**अन(न्-अ)वस्तीर्य**[a] तै ६, २, १०, ४; ३, ४, २^{2}.

अन(न्-अ)वस्यत्[a]- -स्यन्तः ऋ ४, १३, ३.

अन(न्-अ)वहाय[a] तै १, ४, ४३, २; मै १, ३, ३७; ४, ८, २; काठ ४, ९; क ३, ७.

†**अन(न्-अ)वह्वर**[l]- -रम् ऋ २, ४१, ६; कौ २, २६२; जै ३, २२, ९.

¶**अन(न्-अ)वानम्**[m] तै ६, ६,

---

[a]) तस. नञ्-स्वरः (पा ६, २, २)। उप. यद्र.।

[b]) तस. उप.अवदानीय- इत्य् अव-दान- (<√२दा <√दो+भावे ल्युट्)+तादर्हिकश् छच्→ईयः प्र. उसं. (पा ५, १, ६९)। चिदनुबन्धप्रयोजितः अन्तोदात्तः (पा ६, १,१६३ [तु. तैब्रा. १,३,८,४])। अत्र गुणप्रतिषेधीये नञि पूप. अन्तोदात्तः (पा६,२,१५५)। नन्व् उप. तद्धितान्तं मा भूत् कृत्यान्तमे एव स्याद् अनीयर्-प्रत्ययान्तम् (पा ३,१,९६) इति मा वाचि। उपोत्तमस्वरापत्तेः (पा ६, १, २१७)। एस्थि. अपि दुर्दमः स्याच्चेत् कृत्य-पक्षपातस् तर्हि 'अनीयच्'प्र.उसं.। वस्तुतस्तु (ल्युड्>) अनाऽन्तात् कृतः स्वरसंवादकाऽनुबन्धकेन तद्धितेन प्र.निर्वाह एव साधीयान् स्याद् अन्यथासिद्धायतां चोक्तः कृत्यः प्र.इति दिक्।

[c]) तस. नञ्-स्वरे प्राप्ते 'कृत्योक-' (पा ६, २, १६०) इत्यन्तोदात्तः। उप .यद्र.।

[d]) 'अनिमिषाः' इति ऋ(२, २७, ९) विशिष्टः पाभे.।

[e]) बस. पूपप्रस्व. (पा ६, २, १)। उप. यद्र.।

[f]) बस.अन्तोदात्तः(पा६,२,१७२)।उप.अव√द्रा+ल्युट्प्र.

[g]) तस.नञ्-स्वरः (पा६,२,२)।उप. अव√पृच्+क्तः।

[h]) बस. अन्तोदात्तः (पा ६,२, १७२)। उप. <अव √ब्रू यद्र.। (तु.या ६,२९; सा.ऋ १०,८४,५। वैतु. सा. शौ ४,३१,५ यत्र अनवब्रव- इतीव तस. इत्युक्तं भवति)।

[i]) सस्व. नापूटिदि. द्र.। नाउ. पूप. भवति। अत्र अव√भृ> अव-भ्र- इति भावे क-प्रत्यये उप. द्र.। यत्तु वि. इति कृत्वाऽस्य उप. भावे निष्पत्तिमपरे नैव समर्थयेयुः (तु. सा. GW. प्रमृ. च) तच्चोद्यं स्यात्। अ-भावनिष्पत्तौ हि तस. नञ्स्वरः स्यान्न तु बस. अन्तोदात्त इति यावत्। यदपि सा. (ऋ २, ३४,४) अव-भ्र- <√भ्रंश्+डः प्र.(पा ३,२,४८ इत्यत्र उसं.) इत्याह, तन्न। गुणविशेषेऽसति गौरवमात्रत्वात्।

[j]) तस. उप. अव√रुध्+(क्त्वा→)ल्यप्।

[k]) बस. अन्तोदात्तः (पा ६,२, १७२)। उप. √अन् +असच् प्र. (पाउ ३,११७) इति वा (तु. सा. NW. च); अव√सा(<सो)+कः प्र. इति वा (तु. GW.MW.)।

[l]) तस. नञ्-स्वरः (पा ६, २, २)। उप. अव√ह्वृ+ अच् प्र. (पा ३, १, १३४)।

[m]) सस्व. नापूटिदि. द्र.। उप. अव√१अन्+णमुल् प्र.। यत्तु मै. पपा. 'अनवा-अनम्' इत्येव निरदेशि, तच् शोधनीयम्। पूप.नञ्-उत्तरमेकस्य उपसर्गस्य 'अव'इत्यस्यैवाभ्युपगमाद् द्वितीयस्य उपसर्गस्याऽऽङोऽनभ्युपगमाच्चाऽथ उप. णिति प्र. परे वृद्धेरनिवार्यत्वादिति। ननु पूप.

१०, २; काठ **२६**, ८; ९; **३६**, ४; क **४१**, ६; ७.

†**अन**(न्-अ)**वाय**[a]– -यम् ऋ **७**, १०४, २; काठ **२३**, ११; शौ ८, ४, २; पै **१६**, ९, २.

¶**अन**(न्-अ)**वार्**[b]– -रम् तै **७**, ५, ३, २; काठ **३३**, ५.

¶**अन**(न्-अ)**वेत**[c]– -तः, –तौ तै **२**, ६, ३, ५.

¶**अन**(न्-अ)**वेष्ट**[c]– -ष्टम् मै **१**, १०, ११; १३; काठ **३६**, ७.

?**अनव्याधात्**[d] पै **७**, १५, १.

अन(न्-अ)**शन**- अशन°, साशन°

अन(न्-अ)**शनि**[e]– -नि तै **२**, ४, ७, १.

¶**अन**(न्-अ)**शित**[c]– -तम् तै **१**, ६, ७, ४.

†**अन**(न्-अ)**श्नत्**[c]– -श्नन् ऋ **१**, १६४, २०; शौ **९**, १४, २०; पै **१६**, ६७, १०.

अ-नश्यत्[f]– -श्यतः काठ **३८**, १२.

अन(न्-अ)**श्रु**[b]– -श्रवः ऋ **१०**, १८, ७; शौ **१२**, २, ३१†; **१८**, ३, ५७; –श्रू मा **४**, ३३; का **४**, १०, ४; तै **१**, २, ८, २[g]; काठ **२**, ७[h].

†**अन**(न्-अ)**श्व**[b]– -श्वः ऋ [**१**, १५२, ५; **४**, ३६, १]; **६**, ६६, ७; –श्वम् ऋ **१**, ११२, १२; १२०, १०; –श्वासः ऋ **५**, ३१, ५; तै **१**, ६, १२, ६; मै **४**, १२, २; काठ ८, १६.

अन(न्-अ)**श्वदा**[c]– -दाम् ऋ **५**, ५४, ५.

अ-न(ष्ट→)**ष्टा**[c]– -ष्टाः मै **४**, १, १.

†**अनष्ट-पशु**[i]– -शुः ऋ **१०**, १७, ३; शौ **१८**, २, ५४.

अनष्ट-वेदस्[i]– -दसम् ऋ **६**, ५४, ८.

अनस्[j]– -नः ऋ **२**, १५, ६; **४**, ३०, ११; **१०**, ५९, १०; ७३, ६; ८५, १०; १२; ८६, १८; १३८, ५; तै **५**, २, २, ३¶; ¶मै **१**, ८, ९; **४**, ८, २; ३; ¶काठ **१९**, १२^{२}; **२४**, ६; **२६**, २; **२८**, ४; ५; ¶क **३१**, २^{२}; **३७**, ७; **४०**, ५; **४४**, ४; ५; †शौ **१४**, १, १०; १२; **२०**, १२६, १८; पै **१५**, ११, ३[k]; –नःसु काठ २, ७; –नसः ऋ **४**, ३०, १०; ८, ९१, ७; **१०**, १०२, ६; शौ **१२**, १, ४७; **१४**, १, ४१†; पै **४**, २६, ७†; –नसा ऋ **३**, ३३, ९; १०; ¶तै **५**, २, २, ३; **६**, १, ९, ३^{२}; ¶मै **३**, ७, ८[l]; ¶काठ **१९**, १२; **२४**, ६^{२}; ¶क **३१**, २; **३७**, ७^{२}; –¶नसि तै ५, ४, १०, २; –¶नसे

एक एवोपसर्गो न द्वावित्यत्र विनिगमकं ब्रूहीति। उच्यते, तु. शब्रा **१**, ३, ५, १४ यत्र 'अवान्यात्' इति पदं श्रूयते अन्यथा '**गतिर्गतौ**' (पा ८, १, ७०) इति सतोर्हि द्वयोरुपसर्गयोः पूर्वस्य निघाते 'अवान्यात्' इत्यनेन भाव्यमित्यभिसन्धेः। ननु भोः कथम् 'अवानिति' (शब्रा **४**, ३, २, ६) इति समाधित्सेरिति। यद्-योगीये तत्र तिङ्निघाताऽभावे धातुस्वरस्य सामञ्जस्यादिति।

a) सस्व. नाउटि. द्र.। उप. अव√इ+भावे अच् प्र. (पा **३**, ३, ५६)। प्रयोगतः क्रिवि. द्र.।

b) बस. अन्तोदात्तः (पा **६**, २, १७२)। उप. यद्र.।

c) तस. नञ्-स्वरः (पा **६**, २, २)। उप. यद्र.।

d) तु. पै **२**, ८५, ३. यत्र समानेऽपि मन्त्रे 'अनंव्यधात्' इत्यस्य प्रामादिकस्य मूको. स्थाने 'एनं व्य् अधात्' इति प्रामादिकशोधमुखः मुपा. भवति। उभयत्र मन्त्रस्य तृतीये पादे प्रमादतः 'पातु' इति पदस्य भिन्नक्रमत्वं संभाव्य '**पातु पश्चाद् अनुव्याधाद्**' इति **शोधः** पर्येष्टव्यः।

e) द्विपूटि. सस्व. द्र.। प्रयोगतः क्रिवि. द्र.।

f) तस. नञ्-स्वरः। उप. <√२नश् यद्र.। तैआ **६**, ५, २ इत्यत्र 'अनः-शतः' इत्यस्यान्यस्य च पाभे. कृते यतु. वैप२ टि.।

g) **अनःश्रुत्-** इत्यस्य वा **अनःश्रित्-** इत्यस्य वा मूलतः प्राति. सतः यनि. प्राति. विकारमात्रमितीवाभिप्रयन् भा. विमृश्यः।

h) मूको. एकदेशमुपाश्रितः 'अनश्रू' इतीव मुपा.।

i) बस. पूपप्रस्व. (पा **६**, २, १)। उप. यद्र.।

j) √२अन्+कर्तर्य् असुन् प्र. (पाउ **४**, १८९)। नित्त्वादाद्युदात्तः (पा **६**, १, १९७)। अथवा मूलतः अन्-अर्- इति तस. नञ्-स्वरः (तत्र च उप. √१ऋ+कर्तरि विच् प्र.)। एवं चास्य स्वतोऽगतिमति (=भाररूपेऽन्येनोह्ये) पदार्थमात्रे सामान्यायाः प्राथमिक्या वृत्त्याः सत्या वहने भारो यदधिकरणत्वेनोह्यते तस्मिन् छकटे वैशिष्ट्यं समजनीति सुवचम् (तु. ww **१**, १३२)। मूलतो रेफान्तत्वेऽस्य प्राति. अनर्-विश्- इत्यत्रत्यं पूप. विनिगमकं द्र. (एवम् अनड्-वाह्- इत्यत्र पूप. अनर्-> *अनल्->अनड् इति प्राकृतायितं सुलभम्)। अथापि वा ६अ+नश्-(>ष्>ट्, ड्, र्) इत्येषा मौलिकी स्थितिः स्यात्। एस्थि. अस्मिन् कल्पे नापू. कल्पाद् उप. प्रकृत्यंशमात्रे भेदः द्र.। तथाहि तत्र उप. <√१ऋ इह च उप. <√१नश् इति सुवेचम्। उभयत्र विनिगमिका सामग्री तु समानेति दिक्।

k) '**मनः**' इति मुपा. चिन्त्यः (तु. **अधिसर्पिस्-** इत्यत्रत्यं टि.)।

l) '**मनसा**' इति मुपा. चिन्त्यः (तु.क. पृ२०१.संटि.७)।

तै ६, २, ६, १; –¶नांसि तै ३, १, ३, १; ६, ३, २, ३; [°नस्-अर्चन°]

*अनस्(>ड्,ळ्)√१वह्[a]

अनडु(ड्-उ)ह्<>धुँ[b]– -डुत्सु ऋ ३, ५३, १८; –डुद्भिः मै २,७, १२; पै २, २२, ४; –डुद्भ्यः शौ ६,५९,१;–¶डुहः तै २,२,९,४; मै १,६,४;८; २, १,७; ३,६,१; काठ ६, ३; १०, १^{२}; २२,१३; क ४,२; \$शौ ४, ११, ३; ८; ९; ११; \$पै ३, २५,५; ७; ९; १०; –¶डुहा तै ६, १, १०, २; मै ३, ७, ७; काठ २४,२; क ३७, ३; पै १२, ३, ९\$[c]; –डुहि शौ ४, ११,७.

आनडुह[d]– -हे मै ३, ७,४.

अनड्-वाँह्[e]– -ड्वान् मा १४, १०; १८, २७; २१, १८; २२,२२; २९,५९; का १५, ३, ४; १९,८,४; २३, २,७; २४, ८, २; ३१,७,१; तै ¶१,५, २, ४; ¶२, २, २,१; १०, ५^{२}; ६, २, ३; ४; ४, ३, ५, १; ७,१०, २; ५, ५, २४,१; ¶६, १, १०, २; २, १, १; ७, ५, १८, १; ¶मै १, ६, ४^{२}; ७, २; ८, ९; २, १,१०; ५,४;६, १^{२}\$; २;८, २\$; ११,६\$; ३, ७,४;९;११, ११\$; १२, ६\$; ४,३, १^{२}; ४, ८; ८, ६; काठ ६, ३; ८, ८; १५; १३, ६; १५, १^{२}; १७, २; १८, १२; २४, ८; २९, ४; ३८, १०; ४५, १४; ४८, ३; ¶क ४,२; ८,३; २६,१\$;२९, १\$; ३८, १; ४५, ५; शौ ४, ११, १^{४}; २; ४; १०; ५, १७, १८; ८, ५, ११; ९, १, २२; ११, ६, १३; ७, १८; १२, ३, ४९; १९, ३९, ४; पं ३, २५, १^{४}; २; ३; ८; ११; १२; ५, १, ५; १५, ५; ६, ५, ५; ७, १०, ४; ८, १२, ११; ९, १६, १; १६,२२,३; २८,१; १५४,८.

अनड्-वाह्[f]– -ड्वाहः मा २४,८; १३; का २६, २,३; ३, ३; तै ५,६,१८,१; मै ३,१३,९; १८; काठ ४९, ८; शौ १९,५०, २; पै २, २२, ३; ८, १८, २; ९, १०, ११; १४, ४, १२; –ड्वाहम् ऋ १०, ५९, १०; खि ५, ५, ४; मा २८, ३०; ३५, १३; का ३०, ३, ७; ३५, ४, १२; तै १, ८, १८, १¶; ¶मै १, ६, ४^{२}; २, १, ६; काठ ११, ५¶; क ७,२¶; शौ ९, ५,२९; १२, २, ४८; पै ५, ३१, ६; –ड्वाहौ ऋ १०, ८५, १०; तै ५, ६, २१, १^{२}; मै ४, ४, ९¶; काठ ५०, १^{२}¶; शौ ३, ११, ५; ७, ५५, ५; १४, १, १०†; पै १, ६१, ३; ८, ११, ३.

¶अनड्-वा(ह्>)ही[g]– -ही

---

[a]) एकार्थवृत्तीनां सतामपि प्रत्ययभेदतः किञ्चिन्मात्र-विरूपान्तानां नाउउ.कृतां व्यु.औपयिकोऽयं धातुर् द्र.।पूप. स्>ड् इत्येतद्विवरणार्थं तु. माप्रा.३,४५, वस्तुतः र्>ड् द्विपूटि. च। यत्तु नाउ. कृति उप. वह्- इत्याकारकमिच्छेयुः केचित् (तु.GW. प्रभृ.) तदयुक्तम्। क्विब्-भिन्नप्रत्ययान्तरे निष्पन्नस्य सतोऽसर्वनामस्थानेऽजादिप्रत्यये परतः संप्रसारणं स्यादित्यस्य द्राघीयसः पथोऽपेक्षया क्विपि निष्पत्त्यैव निर्वाहलघीयस्त्वदर्शनाद् उपधावृद्ध्यभावे सति संप्रसारणवद्रूपाभावाऽननुपपत्त्यदर्शनाच्चेति दिक्। यदपि तदेव उप. वाह्- इत्येवंमात्रम् PW. इच्छति। तदप्ययुक्तमेव। तथा सति 'वाह ऊठ्' (पा ६,४,१३२) इत्यस्य प्रसङ्गाद् ह्य् अनडुहः प्रभृ.उदुपधत्वम् अनड्वाही-इत्यत्र संप्रसारणेतरोपधत्वं च नोपपद्येत। एस्थि. यनि. तत्तत्-प्रत्ययपरत्वं नाउउ. कृत्सु यथाकार्य्यं साध्ववधेयमिति दिक्।

[b]) उस. क्विब् उसं. तदन्तकृद्-उपप्रस्व. कित्त्वात् संप्रसारणं च (यक्र. पा ३, २, ६१; ६, २, १३९; १, १५)। भ-संज्ञायां परिणतहकारान्तता चरितार्था भवति। ततोऽन्यत्र (=पदान्ते) मौलिकवर्गतृतीयान्तता सुप्रतिष्ठिता द्र. (तु. टि. √१वह्; वैतु. पा ८, २, ७२ यदनु ह्>द् इत्याकारको वर्णपरिणामो भवति)। यथेह उप. वह्- इति वा वाह्- इति वा परामिमतं सदपि नैव युक्तं भवति, तथा नापूटि. गतार्थं द्र.।

[c]) '-डुहान्' इति मूको. '-हाम्' इति ष३ मूलतः सतोऽपभ्रंशः स्यात्। मुपा. तु नितरामपलक्षणत्वादुपेक्ष्यः।

[d]) तस्येदमित्यर्थे अञ् प्र. ञित्-स्वरश्च (पा ४, ३, १२३; ६, १, १९७)।

[e]) उप. ण्विः प्र. (पा ३,२,६४)। सस्व. एपूदि. द्र.। मौलिकोपधाभूतोऽकारः सानुनासिकः सन्नपि वृद्धिविषयः द्र. (वैतु. पा ७, १, ९८; ८२ यदनु सौ परे एपू. प्राति. आम् च नुम् चेष्येते)।

[f]) नापू. उपधायाः निरनुनासिकत्वमात्रत्वे विशेषः (वैतु. पा ७, १, ९८ येन द्विपू. प्राति. आम् भवति न तु भिन्नं प्राति. क्रियते)।

[g]) उस. कर्मण्य् अण् प्र. ततः स्त्रियां ङीप्य् उदात्त-निवृत्तिस्वरः (पा ३, २, १; ४, १, १५; ६, १, १६१)। व्यु. यतु. अनोवाहु- (वैतु. पाप्र. गौरादिषु पाठाद् ङीषन्तता च अनडुह्- इत्यत्र आम् च [पाग ४,१,४१; पावा ७, १, ९८])।

मै २,६,३; ४,३,४; काठ १३, ६;१५,२; –हीम् काठ १३,६.

?अन(न्-अ)र्विश्[a]- -र्विशे ऋ १, १२१,७.

अनस्-वत्[b]- -स्वन्तः ऋ १,१२६, ५; –स्वन्ता ऋ ५,२७,१.

अनस्वती[c]- -ती शौ १०, १,१५.

¶**अनस्विन्**[d]- -स्वी तै ५,२, २,३; काठ १९,१२; क ३१,२.

अनस्विनी- -नी पै १६, ३६,५.

अ(नस्>)नो-वाह[e]- -हौ तै ५,६, २१,१; काठ ५०,१.

¶**अ(नस्>)नो-वाह्य**[f]- -ह्यम् तै ६, १,९,४; मै ३,७,८; काठ २४,६; क ३७,७.

?अनसृ(प्तँ*>)प्ता[g]- -प्ताम् पै ८,१६,५.

अन(न्-अ)स्थ[h]- -स्थः ऋ ८,१, ३४; –स्थाः शौ ४,३४,२; पै ६,२२,२.

¶**अनस्थक**[i]- -कम् मै ३,३,५; काठ २१,५; क ३१,२०; –कात् मै ३,७,५; काठ २४,५; क ३७,६; –काय काठ ४५,३$

†**अन(न्-अ)स्थन्**[j]- -स्था ऋ १, १६४,४; शौ ९,१४,४; पै १६, ६६,४.

अन(न्-अ)स्थि[k]-

अनस्थिक[l]- -काय तै ७,५,१२, २; –केन तै ६,१,७,१^{२}¶.

¶**अन(न्-अ)स्थिचित्**[m]- -चित् मै ३,५,१.

अ-नह्यमान- -नस्य पै १६,१२०,१.

अना इदम्- द्र.

अना(न्-आ)कृत[n]- -तः ऋ १,१४१,७.

---

[a]) सांशयिकः पद-विभागः । अनस्- +विश्- इत्येवं कास. इति PW. प्रभृ. केचित् । सा. अपि विकल्पेन व्यु. एतामनुमनुते । तथा सति ‘**गतिकारक**-’ (पा ६,२,१३९) इति स्वरेण भवितव्यं पूपप्रस्व. च न भवितव्यमिति चोद्यम् । अतः **अन्**+**अर्विश्**- इति यत् सा. पक्षान्तरं भावयति तत् स्वरतः साधीयः (=तस. नञ्-स्वरः) । उप. अपि कास. भवत्य् उपप्रस्व. । तत्र च पूप. √१ऋ+भावकर्मणोर् **विच्** प्र.इति संकेतितमात्रं द्र. (तु. **अनस्**- टि.) । अथवा बस.पूपप्रस्व. । तत्र च ‘**अनो विड्** विश्यत इति कृत्वा निवासो यस्य’इति वा (तु.GW.) ‘**अनोयुक्ता विशो** यस्य’ इति वा (इह मध्यमपदलोपः) ‘**अनांसि च विशश्च** यस्य’ इति वा विग्रहः । **अनस्**> **अनर्** इत्यत्र तु. **उषर्बुध्**- (**उषस्**>**उषर्**) ।

[b]) **मतुपो** वत्वे भत्वम् (पा १,४,१९) । प्रत्ययस्य च पित्त्वान्निघाते स्वरे विशेषाऽभावः ।

[c]) स्त्रियां **ङीपः** (पा ४,१,६) पित्त्वान्निघाते स्वरस्तदवस्थः ।

[d]) मत्वर्थे **विनिः** प्रत्ययस्तत्स्वरश्च (पा ५,२,१२१) ।

[e]) कर्मण्युपपदे √१वह्+**अण्** प्र. । कृद्-उपप्रस्व. (पा ६,२,१३९) ।

[f]) उस. ‘**गति**-’ (पा ६,२,१३९) इत्युक्त उपप्रस्व. । उप. <√१वह्+**ण्यत्** तित्-स्वरश्च (पा ६,१,१८५) ।

[g]) **अनु**√**सृप्**+**क्तः** प्र. स्त्रियां **टाबन्त** इह शिश्रावयिषित इति पूर्वोत्तरसापेक्षालोचनवताम् अतिरोहितमिव भवेत् । अत इह **अनुसृप्ताम्** इति **शोधितः** पा. द्र. । अनुपदं श्रूयमाणस्यांशस्य **शोधार्थं** यस्था. तु. टि. **?२अहन**-, **?पूक्षन्**-, **?पापी(यँ*→)या**-, **?शमिद्ध(तँ*>)ती**- ।

[h]) बस. ‘**नञ्दुःसुभ्यः**’ (पा ५,४,१२१) इत्यत्र **अस्थि**- इत्यस्य उसं. द्र. । तेन विकल्पेन समासान्तोऽच् चित्स्वरेणाऽन्तोदात्तः । स्याद्वा पक्षान्तरं (तु. नाउ. टि.) ।

[i]) उक्तसमासान्तादपि **कप्** उसं॰ (पा ५,४,१५४) । कपि च परे ‘**ह्रस्वान्ते**’ (पा ६,२,१७४) इति स्वरः । ननु समासान्तात् समासान्तो मा भूदित्य् एउ. **अनस्थन्**- इत्यस्मादनुक्तसमासान्तात् **कपि** ह्रस्वान्तीय उक्तः स्वरः स्यादिति । नेति । कथमिति । ‘**नलोपः**’ (पा ८,२,२) इति स्वरविधौ नलोपस्याऽसिद्धत्ववचनाद् ह्रस्वान्तत्वाऽभावादिति दिक् । (तु. **अचर्मक**-, **अच्छन्दस्क**- प्रभृ.) । इह च नापू. च मूलतः **अस्थि**- इत्यतो विविच्यस्य ***अस्थ**-(यद्र.) प्राति. उपाश्रयेण वा सर्वं चतुरस्रं स्यादिति दिक् ।

[j]) पाप्र. उप. (**अस्थि**->**अस्थन्**) इत्यत्र **अनङ्** समासान्तः उसं. (पा ७,१,७५) तत्स्वरेण चान्तोदात्तः । मूलतः **अस्थन्**- इति **अस्थि**- इत्यतः पृथक् प्राति. (यद्र.) इति कल्पे तावद् अन्तोदात्तः (पा ६,२,१७२) इत्युक्त इति विवेकः सुलभः ।

[k]) समासान्तप्रत्ययाऽभावे **विकल्पः** (तु. द्विपूटि.) । अन्तोदात्तः (पा ६,२,१७२) ।

[l]) समासान्तः **कप्** (पा ५,४,१५४) । यत् **कपि** परे **ह्रस्वान्तीयः स्वरः** (पा ६,२,१७४) न भवति **कपिपूर्वीयः** (पा ६,२,१७३) एव च स्वरो भवति, तत्र शाखाविशेषनिघ्नविशेषत्वेन समाधानमनुसंधीयेताऽन्यथा वेति विमृश्यम् ।

[m]) तस. नञ्-स्वरः (पा ६,२,२) । उप. उस. कर्मण्युपपदे √१चि+**क्विप्** प्र. कृद्-उपप्रस्व. च (पा ६,२,१३९) ।

[n]) सस्व. नापूटिदि. द्र. । उप.आ√कृ+कर्मणि **क्तः** प्र. ।

अना(न्-आ-अ)क्ताक्ष[a]– -क्षः खि ५, १३, १; शौ २०, १२८, ६[b].

¶**अना(न्-आ)क्रम**[c]– -माय मै ४, १, १४.

†**अना(न्-आ)ग,गा**[d]– -गाः ऋ ७, ८७, ७; ९७, २; १०, ३६, १२; मा ३३, १७; का ३२, १, १७; तै ४, ७, १५, ७‡[e]; –गान् ऋ ३, ५४, १९; ४, १२, ४; १०, १२, ८; मै ३, १६, ५; काठ २, १५; शौ १८, १, ३६; –गाम् ऋ ८, १०१, १५.

¶**अना(न्-आ)गत**[f]– -तम् तै २, ५, ५, १; –ताय तै ६, २, १, १.

अना(न्-आ)गमिष्यत्[f]– -ष्यतः शौ १६, ६, १०.

१**अना(न्-आ)गस्**[g]– -गसः ऋ १, २४, १५; १२३, ३; २, २३, ७; ४, ५४, ३; ५, ८२, ६; ७, ६२, २; ८, [४७, १८; १०, १६४, ५]; ६७, ७; १०, ३५, ३; ३६, ९; ३७, ७; ६३, ४; खि ४, ५, ३; मा ४, १२; १२, १२†; का ४, ५, ४; १३, १, १३†; †तै १, ५, ११, ४; ४, १, ११, २; २, १, ४; मै १, २, ३; १८†; ४, १०, ३†; १४, १७^{२};†; †काठ ३, ८; १६, ८; ४०, ११; क २, १५†; कौ ३, १, ४†; जै २, ५, १२†; शौ ७, ७, १; ३५, १; ८८, ३†; ९, ५, २; १६, ६, १†; १८, ४, ६९; पै २, ३९, २; १४, ४, १७; १६, ३५, ७; –गसम् ऋ [(१, १६२, २२) ४, ३९, ३]; १०, ६३, १०; मा २१, ६†; ७; का २३, १, ६†; ७; तै १, ५, ११, ५†; मै ४, १०, १†; काठ २, ३; ७, १६†; शौ १९, ४४, ३; पै २, ३, १; १५, ३, ३; १६, ३६, ८; –†गाः ऋ ५, ८३, २; ७, ६०, १; ६६, ४; ८६, ७; मा ३३, २०; का ३२, २, ३; मै ४, १२, ४; कौ २, ७०१; जै ३, ४६, ७.

†**अनागास्-त्व**[h]– -त्वम् ऋ १, ९४, १५; [१६२, २२; (४, ३९, ३)]; १०, ३५, ३; मा २५, ४५; तै ४, ६, ९, ४; काठ ४६, ५; पै १२, १, १५; –त्वे ऋ १, १०४, ६; ६, ५०, २; ७, ५१, १; तै २, १, ११, ६; मै ४, १४, १४; –त्वेन ऋ १०, ३७, ९.

अना(गस्>)गो-हत्या[i]– -त्या शौ १०, १, २९; पै १६, ३७, १०.

२**अना(न्-आ)गस्**[j]– -गसः शौ १०, १, ७; १९, ५०, ७; –गसम् शौ २, १०, १–८; १०, १, १८; –†गाः ऋ १०, १६५, २; शौ ६, २७, २.

---

[a]) तस. नञ्-स्वरः (पा ६, २, २)। उप. बस. द्र.। तत्रापि पूप. <आ√अञ्ज्, उप. च २अक्ष- यद्र.।

[b]) अत्र -क्षा- इति पाण्डु. स्वर-संकेतो दुरूहः द्र.।

[c]) तस. नञ्-स्वरः (पा ६, २, २)। उप. <आ √क्रम् यद्र.।

[d]) सस्व. एडटिदि. द्र.। उप. *आग- (<आ√हन् [<घन्>] गन्+कर्तरि डः प्र.) इति वा (=[√अङ्घ्+कर्तर्य् अच् प्र.] >अङ्घ- >*आघ-) इति वा प्राकृतिकवर्णपरिणामभाग् द्र.। व्यु. २आगस्- इत्यस्मात् प्रत्ययमात्रे भिन्नम्। यत्त्वेतद् =१आगस्- इति कृत्वाऽपरे (तु. GW. प्रमृ.) बस. इह भवतीति प्रतिपन्नास्तच्चिन्त्यम्। बस. सत्यन्तोदात्त आपद्येतेति दिक्। भूयानपि विस्तर इह नाउउ. वैश. च द्र.।

[e]) 'अनागान्' इति ऋ (४, १२, ४) पाभे.।

[f]) तस. नञ्-स्वरः (पा ६, २, २)। उप. यद्र.।

[g]) समास-स्वरौ नापू. द्र.। उप. २*आगस्- इत्य् असुचा प्र. निष्पन्नम्। यदपीहाऽन्ये PW प्रमृ. १आगस- इत्येतद् उप. इति कृत्वा बस. इत्याहुस्तद् द्विपूटिदि. चिन्त्यम्।

[h]) भावे त्वः प्र. (पा ५, १, ११९)। प्रत्यय-स्वरः। प्र१ रू. व्यवहारप्राचुर्यात् प्राति. तत्सरूपतायामिव प्रतिभातायां तत एव भावे प्र. उत्पत्तिर्जातेति सुतर्कं सच् छान्दसमिति वा प्राकृतिकमिति वोपवर्ण्यताम्।

[i]) षतस. सासस्व. (पा ६, १, २२३)। उप. <√हन् यद्र.।

[j]) बस. अन्तोदात्तः (पा ६, २, १७२)। उप. १आगस्- इत्यत्र असुन् प्र.। यत्त्विह तस. इति MW. आह, तन्न। तथात्वे नञ्-स्वरापत्तेरिति यावत्। यदपि GW. इह आ√गा>आगा- इति कर्त्रर्थे निष्पन्नं प्राति. उप. भवतीति च नञ्पूर्वत्वे च तस. भवतीति चाह तदुभयमसत्। '-गसः' '-गसम्' इत्येतयो रू. व्याख्यानार्थमस्य यनि. प्राति. अवश्यमभ्युपेयत्वादभ्युपेते चास्मिन् '-गाः' इत्यस्य रू. अप्येतदीयत्वेन सुवचत्वे सिद्धे पराभिप्रेतस्य प्राति. अन्यथासिद्धायितमात्रत्वाच्च, यतरे कतरेऽपि च प्राति. अभ्युपगते सति गपूदि. स्वरतस् तस. अनुपपन्नत्वाच्चेति (तु. NW.)। एवं तावद् अस्य प्राति. अर्थतः गपू. अतिसूक्ष्ममिवाऽन्तरं भवति। (गपू.=आगसोऽकर्तृ- इत्य् एतच्च =आगसा रहित- इति)। अस्य चातिसूक्ष्मस्याऽर्थान्तरत्वस्य स्वरभेद एव लक्षणं भवतीति किमु वक्तव्यम्। एस्थि. अपि गपू. एव निगमसुभिन्नं भवत्यस्य तु प्राति.

¶**अना(न्-आ)ग्नेय**[a]– -यम् मै १, ७, ३^{२}; ४^{२}; काठ ९, १^{२}; २^{३}; १८, १९; क ८, ४^{२}; ५^{३}; २९, ७.

¶**अना(न्-आ)च्छिन्नस्तुक**[b]– -कस्य मै ३, ८, ५.

¶**अना(न्-आ)च्छृण्ण**[c]– -ण्णम् तै ५, १, ७, ४; कठ १९, ७; क ३०, ५.

अना(न्-आ)जानत्[d]– -नन् शौ ६, ११९, ३; पै १६, ५०, ७.

¶**अना(न्-आ)ज्ञात**[d]– -तम् तै २, १, ६, ५^{२}.

¶**अनाज्ञात-यक्ष्म**[e]– -क्ष्मः काठ १३, ६.

¶**अनाज्ञातयक्ष्म-गृहीत**– -तः काठ १३, ६^{२}.

अना(न्-आ)तत[d]– -तम् खि ५, १५, १७; शौ २०, १३२, ७; –ताय मा १६, १४; का १७, १, १४; तै ४, ५, १, ४; मै २, ९, २; काठ १७, ११; क २७, १; पै १४, २, १२.

१**अना(न्-आ)तुर,रा**[f]– -ꜝरम् ऋ १, ११४, १; ८, ४७, १०; १०, ९७, २०; मा १२, ९५; १६, ४८; का १३, ६, २२; १७, ८, २; मै २, ९, ९; काठ १७, १६; क २७, ६; पै १५, १५, २; –रस्य पै १, ९७, ३; –राः ऋ १०, ९४, ११; –०रे पै ४, २२, ६; –रेण पै २, ६१, १.

२**अना(न्-आ)तुर**[g]– -रम् ‡[h] तै ४, २, ६, ५; ५, १०, २; –रान् शौ १२, २, ४९.

१**अना(न्-आ)त्मन्**[d]– -त्मने तै ७, ५, १२, २.

२**अना(न्-आ)त्मन्**[i] -

अनात्मक[j]– -काय काठ ४५, ३.

ꜝ**अ-नाथ**[e]– -थम् ऋ १०, १०, ११; शौ १८, १, १२.

अना(न्-आ)दि(ष्ट→)ष्टा[d]– -ष्टाम् शौ १५, ६, १६.

¶**अना(न्-आ)दृत्य**[d] तै २, ५, ३, ५; ५, ३.

अना(न्-१आ)द्य,द्या[k]– -द्यम् तै ५, ७, ९, २¶; शौ ८, २, १९; पै १६, ४, ९; –द्या शौ ५, १८, ३; पै ९, १७, १०; –द्याम् शौ ५. १८, १; पै ९, १७, १.

अना(न्-आ)धृष्[l]– -धृषः शौ ६, २१, ३.

अना(न्-आ)धृष्ट,ष्टा[d]– -०ष्ट मै १, ४, ९; –ष्टः ऋ ७, १५, १४; तै ४, ४, ८, १; काठ ३९, ११; –ष्टम् ऋ ८, २२, १८; खि ४, १, १; मा १, ३१; ५, ५; ९^{३}; १४, ९; का १, १०, ४; ५, २, २; ३, २^{३}; १५, ३, २; तै १, २, १०, २; १२, १^{२}; ४, ३, ५, १; ४, १२, २; ६, २, २, ३^{२}; मै १, १, ११; २, ७; ८^{२}; ४, ४; ३, १६, ४; ४, १४, १७; काठ १, १०; २, ८; ९^{२}; ५, ६; ७, १४; २२, १४; ३२, ६; क १, १०; २, २; ३^{२}; ६, ४; पै २, ३०, ५; –ष्टा मा ७, १२; १७; ३७, १२; का ७, ६, २; ७, ३; ३७, २, २; मै १, ३, १२; ४, ९, ३; काठ ४, ४; २७, ८; क ३, ३; –ष्टाः मा १०, ४; ७; का ११, २, ४; ४, ३; तै १, ८, १२, १; मै २, ६, ८^{२}; ४, ४, २¶; काठ १५, ६^{३}; पै १, ३८, ३; १६, १५१, ५; –ष्टानि ऋ १०, १३८, ४; खि ५, ५, २; –ꜝष्टाभिः ऋ ४, ३२, ५; ८, १०२, १५; कौ २, ९२२; जै ४, ६, ७; –ष्टाय तै १, ५, १०, १; –ꜝष्टासः ऋ १, १९, ४; पै ६, १७, ५.

अनाधृष्ट-रथ[e]– -थाः खि ५, ५, ९.

अना(न्-आ)धृष्य पै १३, १०, १०.

अना(न्-आ)धृष्य,ष्या[k]- -ष्यः मा २७, ७; का २९, १, ७; तै ४, १, ७, ३; मै १, ९, १; ५¶; २, २, १२¶; १२, ५; ४, १४, १३; काठ ९, ९; १२;

ऋ. दशममण्डलमात्रे च शौ. च यस्थ. विरलमेव श्रवणं भवतीति विविचामनुसंधानाय कल्पताम् ।

[a]) तस. नञ्-स्वरः (पा ६, २, २)। उप. यद्र. । यत्तु नानाग्नेयम्(=न । अना°)इत्यत्र सुपा.'नानाऽग्नि->नानाग्नेयम्' (तु. BW., SBW.) इतीव वा 'नाना । आग्नेयम्' (तु. SIM) इतीव वा पदकृत्यं प्रास्तावि, तदसत् (तु. तैब्रा १, ३, १, २; ६) ।

[b]) सस्व. नापू. द्र. । उप. बस. द्र. ।

[c]) सस्व. एपू. द्र. । उप. √छृद् + कर्मणि क्तः प्र. ।

[d]) तस. नञ्-स्वरः (पा ६, २, २) । उप. यद्र. ।

[e]) बस. पूपप्रस्व. (पा ६, २, १) । उप. यद्र. ।

[f]) बस. अन्तोदात्तः (पा ६, २, १७२) । उप. यद्र. ।

[g]) शाखाभेदात् तस. नञ्-स्वरः (पा ६, २, २) । '-रम्' इति वा. क्रिवि. द्र. ।

[h]) 'अनातुरम्' इति ऋ (१, ११४, १) पाभे. ।

[i]) सस्व. द्विपूटिदि. द्र. । अयं संकेतः नापू. विवेकार्थो नाउ. स्वरसिद्धावौपयिकश्च द्र. ।

[j]) समासान्तः कप् प्र. (पा ५, ४, १५४) । स्वरविधौ नलोपाऽसिद्धेः (पा ८, २, २) ह्रस्वान्तीयस्वराप्रवृत्तौ कपिपूर्वीयः स्वरः (पा ६, २, १७३ उ.) तु. अनस्थक-, अनस्थिक- इत्यत्र टि. ।

[k]) तस.उप.कृत्यान्तत्वाद् नञ्-स्वरं बाधित्वा 'कृत्योक-' (पा ६, २, १६०) इत्यन्तोदात्तः ।

[l]) तस.नञ्-स्वरः(पा६, २, २)। उप.आ√धृष्+क्विप् प्र.।

१८,१६; क८,१२¶;२९,४; शौ ७,८४,१; पै ३, ३३,७; –ष्यम् ऋ ४, १८, १०; मा ५, ५; का ५, २, २; तै १, २, १०, २; ६, २, २, ३^{२}; मै १, २, ७; ८^{३}; २, ८, २; ४, ४, १¶; काठ २, ८; ९^{२}; ७, १४; १७, २; क २, २; ३^{२}; ६, ४; २६, १; पै १५, १, ५; –†ष्या ऋ १०, ४४, ५; शौ २०, ९४, ५; –†ष्याः ऋ १०, १०३, १३; १५४, २; मा १७, ४६; का १८, ४, १४; तै ४, ६, ४, ४; मै ४, ४, १; कौ २, १२१२; शौ १८, २, १६; पै १, ५६, १; –ष्याय मा ३८, ७; का ३८, २, १; मै ४, ९, ८; –ष्यौ कौ २, १२१९.

†**अना(न्-आ)नत**[a]– -०त ऋ ६, ४५, ९; –तः ऋ ८, ६४, ७; ९०, ४; कौ १, १४२; जै १, १५, ८; –तम् ऋ [७, ६, ४; १०, ७४, ५]; –तस्य ऋ ८, ६८, ४; कौ १, ३६४; जै १, ३८, ३; –ताः ऋ १, ८७, १.

[h]) लक्षणे कप्र.। '**तस्य** वरुणस्य **व्रतम् अनु तिस्र उषो वेनीरवर्धयन्**' इत्यन्वयः। यत्तु वें. सा. च '**तिस्र उषः**' इति द्वि३ इतीवाभिसन्धाय कालात्यन्तसंयोगार्थतयेव व्याचक्षाते। तच्चिन्त्यम्। '**तिसृभ्यः**' (पा ६, १, १६६) इत्युक्तदिशा '**तिस्रः**' इत्येतद् रू. प्र३ स्यात्। एतत्-समानाधिकरणं सद् '**उषः**' इत्येतदपि च तथेत्यभिसन्धेर् (**उषसः**>**उषः** इत्येवं सकारलोपश्च संजात इत्यपरो विशेष इह समवधेयः। न तु क्विप्य् **उष्-** इति भिन्नं प्राति. स्यादिति। तथा सति **जस्य्** अन्तोदात्तानुपपत्तेरिति दिक्)। उक्ते चान्वये **वेनीर्** इति द्वि३ रू. (वैतु. सा. प्र३ रू. इति प्रतिपन्नः [यथा चैतद् रू. √**वी**>**वय(न>)नी-** >**वेनी-** इत्यस्य प्राति. भवति न च पराभिमतस्य √**वेन्** इत्येतन्निष्पन्नस्याऽन्तोदात्तस्य सतः सरूपकल्पस्यान्यस्य प्राति. इत्येतद्विस्तरः यद्र.])। एस्थि. **उषस्त्रिकोपलक्षिताः** सर्वेऽपि काला वरुणव्रतानुसारिणः सन्तो **वेनीर्**नाम नदीर् वर्धयन्तीति तत्तन्मन्त्रवर्णप्रसिद्धेः स्रोत्यानां वरुणाज्ञानुसारित्वे तात्पर्यं द्र.।

[i]) इत्थंभूताख्यान इह कप्र.। वरुणव्रताधीना देवा इत्यर्थः। व्रतस्य देवकर्तृकानुवर्तनक्रियायाः कर्मीभावेन विवक्षितत्वेऽनोर्गतित्वं वा वाच्यं तत्प्रयोग-

२[a]; ६३, ५[b]; ६९, १८[c]; ८८, ५[d]; १०३, २[e]; ९, २२, ६[f]; २९, १[g]; ५४, १; ६३, ६; ७०, ३[h]; ९२, ३[i]; ९७, ५[j]; ३२[k]; १०३, ५; १०९, ७[l]; १०, २, ३[m];

सामर्थ्याच्च योग्यक्रियाऽध्याहारो वक्तव्यः (तु. वें. सा. GRI. प्रमृ.)। उभयोः कल्पयोरियानेव भेदो भवति यत् कर्मप्रवचनीयकल्पे देवानां वरुणव्रताधीनतामुखेन गतिकल्पे च तेषां तद्व्रताऽनुगमनाऽऽख्यानमुखेन वरुणः स्तूयते। प्रथमे तद्व्रतानुसारित्वं फलत्वेन कैमुतिकं द्वितीये प्रधानतया शाब्दस्तन्निर्देश इति दिक्।

a) लक्षणे कप्र. (तु. ऋ ८, ११, ८; ४३, २१)। यत्तु ‘अ॒नु॒प्र॒भूतः’ इत्येकं पदमिति GW. MW. च। तदसत्। स्वरद्वयोपपत्तिविरहात्।

b) लक्षणे कप्र. (क्र॒तुम् अ॒न्व् इति संबन्धः। ‘ते’ इत्यस्य चोत्तरार्धे संबन्धः)। क्रिवि. अव्य. इति सा. आह। तदीयेऽन्वये ‘अनूषत’ इत्यनेन क्रिप. गतिभावेन संबन्धवचनं साधीयः स्यादिति।

c) पश्चादर्थे अव्य. क्रिवि. (वैतु. ‘अ॒नु…आशत’ इत्येवं योजुकः सा. [एस्थि. ष. अन्वय आपद्येत न त्वसौ सुपोष इति चिन्त्यत्वं द्र.])।

d) ‘अ॒नु…ववक्षिथ’ इत्येवं योग इति कृत्वा यत् सा. सन्नन्ताद् *अनु√वह् इत्यत एतद् रू. आह। तन्न। अकर्मकस्य √२वक्ष् (यद्र.) इत्यस्याऽनुपसृष्टस्येह संगततरत्वादिति दिक्।

e) अधिकरणाऽनुलक्षणवचनः कप्र.। ‘पृथिव्यां विवर्तमानः सन्नपि देवान् अच्छ मज्मना नाकस्य सानौ प्रतिष्ठत इव’ इत्यभिप्रयती श्रुतिर् द्र. (वैतु. सा. यः दे॒वान् इत्यनेनास्य संबन्धमाह; PW. प्रभृ. च येऽत्र ‘अ॒नु…वि॒वावृते’ इति योगमाहुः; एवं वें. यः ‘अ॒नु…प्र॒…वि॒वावृते’ इति योगमाह)।

f) ‘प्रव॒तः’ (द्वि३) इत्येतदनुगतः कप्र. (तु. ऋ ६, १७, १२ प्रभृ., वैतु. सा. [यस्य प्रव॒तः इति प्र३, ‘अ॒नु…आशत’ इत्युपसर्गवती क्रिया चेति चिन्त्योऽन्वयः। पूर्वमन्त्रानुवर्तितबहुत्वविशिष्टसोमातिरिक्तकर्त्रन्तरानुपपत्तेरिति दिक्])।

g) लक्षणे कप्र.। ‘अ॒नुप्रभूषतः’ इति द्वैस्वर्येऽप्युत्तरेण शत्रन्तेनैकपदतां ब्रुवन्तः GW. प्रभृ. चिन्त्याः।

h) उत्तरार्धर्च-दिग्-विशिष्टाः सन्तः केतव उभयलोकप्रसिद्धाः सन्त्व् इत्यस्मिन् मन्त्रस्वारस्ये निर्जागल्यमाने जन्तुर्द्वित्वस्य प्राधान्येन शुश्रावयिषितत्वात् तत्साधकः कप्र. द्र. (तु. सा., वैतु. वें. PW. प्रभृ. च ‘अ॒नु… सन्तु’ इति)।

i) सप्तम्यर्थे कप्र. द्र. (तु. नापू. स. सकक्षा श्रुतिः। एवं तु. ऋ १, ९८, १; १८६, ११; ३, १६, ४; ५, ३७, १; ९, १११, ३; १०, ७५, ३ प्रभृ. यत्र √यत् इत्यस्य वृत्तम् अकर्मकं सत् तृ. वा स. वा सहकृतं श्रूयेत)। एस्थि. ‘अ॒नु…यतते’ इति योगमिच्छवः सा. प्रभृ. चिन्त्याः स्युः। अपरं च। सा. अनु√यत् इत्यस्य सकर्मकतामभिप्रयन् कर्मपदवाच्यस्याऽनुगमनरूपे यतने यदस्य वृत्तिमाह तदसमर्थमिव द्र.। अनोर् यतनक्रियार्थानुरञ्जकत्वात्तं प्रति गतिभावाभावाच्चोक्तायाः क्रियायाः कर्मपदवाच्यानुगमनसप्रयोजनतायामनोर्लक्षणार्थवाचकत्वेन पर्यवसानाच्चेति दिक्।

j) ‘धा॒म’ इति ‘इ॒न्द्रम्’ इति च पर्यायेण कर्मकारकतां नयन् यत् सा. अनुमुपसर्गीभावयन्नप्युभयत्र तथा न करोतीत्यर्धजरतीयं तन्मतेनापि नितरामजोष्यम्।

k) गतित्वमनुरुन्धान इव सा. (तु. MM.) ‘अभिक्रनिक्रदत् पुनः पुनः शब्दायते’ इति चेद्भणत्, तदासौ चिन्त्यः। एवं हि सति ‘प॒न्थाम्’ इति कर्मपदसनन्वितमिवापद्यते। अन्तर्भावितप्रधानकर्मणः क्यङन्तस्य √शब्दा॒य् इत्यस्य कर्मान्तरापेक्षाभावात्। अतस्तदर्पितक्रियाया अधिकरणलक्षणतया अनुना कप्र. द्वितीयान्तं ‘प॒न्थाम्’ इति पदं समन्वितं स्यात्।

l) ‘पूर्व्य॒ः’ इति (<पूर्वी॒-) द्वि३ इति कृत्वा तदन्वितः कप्र. द्र. (वैतु. वें. सा. यन्मते ‘अ॒नु…प॒वस्व’ इति योगः)।

m) देवानां मार्ग उपाश्रायि। तत्र किं लक्ष्यमिति। उच्यते, ‘य॒च्छक्न॒वाम’ (=यावती शक्तिर्भवति) ‘त॒द॒नु’ (तावतीं शक्तिमनुलक्ष्य=यथाशक्ति) प्र॒वोढुम् (=प्रकर्षेण क्रमितुं चलितुं=साफल्यं प्राप्तुम्) इति। एवं तावदस्मिन्नन्वये प्र√वह् इत्यस्याऽकर्मकतया प्रयोगः (तु. ऋ ५, ३०, ३; ४४, ८; ८, ४६, २६ प्रभृ.)। ‘प्र॒वोढुम्’ इत्यनेन (भावप्रधानेन नाम्नेव सता द्वि१) लक्ष्यभूतेनाऽनोरन्वय इतीवाभिप्रयन् भा. भवति (तु. तै १, १, १४, ३)। अस्यापेक्षया तावद् ‘यच्छक्नवाम तत् प्रवोढुम् अनु (-शक्नवाम)’ इत्येवं सकर्मकस्य अनु√शक् इत्यस्य प्रयोगतः साधीयानन्वयः संभवेत्। यत्त्वसौ ‘त॒द॒नु’ (=तं पन्थानमनु) इति लिङ्गव्यत्ययं विकल्पयति तत्

६[a]; ७; ११, ३; १४, १[b]; २[b]; ७[b]; १७, ११[४c]; १८, १[d]; २७, ५; ३७, ५; ४०, ९; १०[e]; ४५, ११; ५१, ६[f]; ५६, ३[२g]; ६१, २१[h]; ६८, १२[i]; ९१, ७; ९७, १९; १०३, ६[२j];

संभवत्युक्तप्रकारके वाक्ययोजनान्तरे नाऽऽद्रियेत। सा. अनुक्रमार्थे **अनुम्** अव्य. (प्रवोढुमित्येतत्-संबद्धं) क्रिवि. चेच्छति। तदपि विमृश्यम्। यत्तु GW. प्रभृ. **अनुप्रवोढुम्'** इति योगमाहुस्तदसत्। एकस्मिन् पदेऽपलक्षणस्वरद्वयाऽनुपपत्तेः। ननु लक्षणस्य लक्ष्यानुविधायित्वोपगमाद् अत्रत्यं द्वैस्वर्यमनुलक्ष्य लक्षणान्तरं क्रियेतेति चेत्। न। सति संभव उपपत्त्यन्तरस्य सामान्यलक्षणापवादाऽनौचित्यादिति दिक्।

[a]) लक्षणे कप्र. (वैतु. सा. **अनु**···**आयजस्व** इत्येवमपि विकल्पुकः)।

[b]) अत्र पूर्वेषां पितॄणां **स्वाः** पथ्या **अनु**(=स्वैः पथिभिस् [तृतीयार्थे कप्र.]) परायणं **यत्रेति** सप्तम्यर्थेन पदेनाधिकरणमुखेन श्रावितं भवति। अनयैव दिशा परायणमार्गविवेकेन परायणाधिकरणनिर्देशः ऋ १०, १४, ७ इत्यत्र विस्पष्टः कृतो भवति। अत एव कारणाद् ऋ १०, १४, १ इत्यत्र **'प्रवतो महीरनु'** इत्यत्र सप्तम्यर्थपर्यवसानकलक्षणोऽनुर्वक्तव्यः। प्रवत्सु महीषु परेयिवानिति यमस्तुतौ तात्पर्यम्। एवंस्थिते समानाधिकरणे **'प्रवतो महीः'** इति पदे व्यधिकरणतया व्याचक्षाणोऽनुं च गतितया योजयितुकामः सा. चिन्त्यः। एवम् ऋ १०, १४, २ इति मन्त्रेऽपि सा. सप्तमीतृतीययोर्मध्येऽव्यवस्थया भ्रान्तचित्त एवाऽनोर्मन्त्रस्थं संबन्धमपश्यन्नध्याहारमुखेन नवीनं वाक्यमुपकल्पयति। ऋ १०, १४, ७ इत्यत्र त्वधिकरणविवेकस्य निगदसिद्धत्वात् सा. अपि साधु भाष्यमाह।

[c]) **'प्रथमान्'** इति च **'च्यून्'** इति च समानाधिकरणे पदे अन्यथा विब्रुवन् सा. चिन्त्यः। तद्विस्तरस्तु वैश. द्र.। तार्तीयीकपादस्थश्चाऽनुः कैश्चिदुत्तरत्र **शत्रन्ते** कृत्य् अनुगमयितुमुपलिप्सितं भवति। तन्न। स्वरविरोधादेव। पूर्वोक्तदिशाऽत्र कर्तृभिन्नकारकान्तराऽनपेक्षया भावस्वरूपस्य प्रधानस्य क्रियार्थस्य समर्पणमात्रेणाऽऽत्मवती श्रुतिर्भवति। अतः प्रधानकर्मतयाऽनाकाङ्क्षितत्वादत्र **योनि-**शब्दः क्रियालक्षणाऽधिकरणाऽन्यतरार्थपर्यवसायितया तद्वचनसमर्थेनाऽनुना कर्मप्रवचनीयेन योगाद् द्वितीयायां श्रावितो भवति। अथ तुरीये पादे सा. अकारणमेव चैत्तीमव्यवस्थितिमुपागतो विकल्पभूयिष्ठं भाष्यमभाषत। शातपथेनौपसंहारिकेणोद्धारेण तु सप्तम्यर्थपर्यवसायित्वदिशाऽनोः कर्मप्रवचनीयत्वस्यैव प्रदर्शितत्वाद् वचनव्यत्ययाद्यपार्थप्रयासपुरस्कृताऽनुजुहोमीत्याद्यनेक-विकल-विकल्पकर्दमकलिलायमानोऽसौ न कस्य दयनीयः स्यात्।

[d]) तुटि. ऋ १०, १४, १; २; ७ यत्रोक्तदिशाऽत्रापि तृतीयार्थे कप्र.। परेण पथा परेहि दूरं गच्छेत्यर्थः। तद्दूरगमनाधिकरणभूतदेशविशेषार्थश्चेह तुरीयपादस्थयाऽस्मदीयप्रजादिनिवासाधिकरणभूताऽस्मत्संनिहितप्रस्तुतदेशव्यतिरेचनमुख्यया प्रार्थनया संकेत्यते। **'अनुपरेहि'** इति योगमिच्छवस्तु GW. MW. प्रभृ. सौवरीमनुपपत्तिमधिकृत्याऽनुयोक्तव्या भवेयुः (तु. सा.)।

[e]) लक्षणे कप्र.। यत्तु. सा. GW. प्रभृ. च **'अनु**···**दीधियुः'** इति क्रियायोगमाहुः स्तच्चिन्त्यम्।

[f]) **'अध्वानम्'** इत्येतदनुबद्धः कप्र.। यथा कश्चिद् रथी मार्गप्रस्थितः सन् कस्यचिदन्यस्य नियोगमुरीकुर्याद् अध्वानं प्राप्यैतदप्यन्वाचयेनैव संपादयिष्यामीति, तथाऽग्नेस्ते पूर्वे भ्रातरो देवान्तरोद्दिष्टहविर्वहनात्मकं नियोगमुरीकृतवन्त इत्यर्थः। एस्थि. तृतीयार्थे वा स्यात् सप्तम्यर्थे वा (वैतु. सा. PW. प्रभृ. **'अन्वावरीवुः'** इति द्व्युपसृष्टमाख्यातं स्यादिति कृत्वा व्यर्थसपलक्षणं द्वैस्वर्यम् अभिलाषुकाः)।

[g]) **प्रथमा**···**सत्या**···**धर्म** (=धर्माणि) **अनु'** इत्येकत्र **'पत्म अनु'** इत्यन्यत्र यथाश्रुतमन्वयः। सा. तु विहायैनमृजीयांसमन्वयं **'गाः'** इत्यनेन क्रिप. गतित्वेन योगमपश्यत्। तस्य मन्ददर्शनस्यैवैतत् फलं यत् साधनतया श्राव्यमाणयोर् **धर्मपत्मनोः**(तु. ऋ १, १६४, ४, ३; ५०; ६, ३, ७; ८, ८, २३ प्रभृ.)साध्याऽनुप्रवेशः समजनीति दिक्।

[h]) **'कनायाः**···**उपमातिम्**···**अनु'**इति संबन्धे सादृश्ये कप्र.। (वैतु. वें. सा. GW. ये **अनु**···**परेयुः** [<२अनुपरा√इ] इत्यातिष्ठन्ते)।

[i]) **'पूर्वीर्'** इत्येतेनाऽभिसंबद्धः कप्र.। **'अन्वानोनवीति'** इति योगं ब्रुवाणाः PW. प्रभृ. द्वैस्वर्यं प्रत्यनुयोक्तव्याः स्युः।

[j]) अत्र लक्षणे कप्र.। तु. अनुपदमेव मन्त्रे श्रूयमाणम् **'अनु संरभध्वम्'** इति। यत्रेन्द्रस्य प्रामुख्येनाऽऽदर्शीकृत्य शिश्रावयिषितत्वात् तल्लक्षणः कप्र. भवति। मै. त्वेवंविधेषु स्थलेषु सामान्यतः प्रथमं कप्र. अपि निहततया लक्षयन्ती गतिभावं प्रापयन्ती च प्रतीयते। (वैतु. वें. सा. PW. GW. प्रभृ. च येषाम् **अनुवीरयध्वम्** इत्य् **अनुसंरभध्वम्** इति च योगावभीष्टाविव भवतः)।

१०५, २[a]?; ११५, ६[b]; १२२, २[c]; १२४, ९[d]; १२५, ७[e]; १३५, ४[f]; १४२, ७[g]; १४५, ६[h]; १४९, ३; १५९, २; १६८, २[i]; खि २, १४, १०; ३, १५, १; २६[j]; १८, १[k]; ५, ४, ४; ११; ६, १[l]; मा १, २०[g]; २, १५[२m]; २६[n]; २७[n]; †३, १६; ५२[g]; ४, २८[o]; ५, २१†; ४०[२]; ६, १२; ७, १२†; ८, ३७; ४०†; ९, १४[२]†; १०, १९[p]; ११, १२[g]; १७[२q]; †; १२, ३†;

---

[a]) 'अनु√?वी>अनु··· वेः' इत्यत्रत्यं सस्थ. टि. द्र.।

[b]) अस्य मन्त्रस्य 'यः···वरम्···अनु···तृपु··· च्युवानः···अनुद्रे···चिद्···धृपता···धन्वना···इद् (अविष्यति तस्मै=) अविष्यते (वाजिन्तमत्वादिविशिष्टाय) जातवेदसे सुपिञ्य (स्तुतिपरो भवेति शेषः)' इत्येवमन्वयः स्यात्तत्र च वरम् इत्यनेनाऽन्वितो लक्षणार्थः कप्र. अनुद् इति सरलः पन्थाः (वैतु. सा. LUD., GRI. यन्मतेन अनु√च्यु> ϕअनु-च्युवान- इत्येकं समस्तं प्राति. भवति; एवं तु. ORN. यदीयविमर्शविस्तरानुविमर्शः वैश. अनुसन्धेयः)।

[c]) 'अनु···अजनयन्' इति क्रिययाऽन्वयं ब्रुवाणाः PW. प्रभृ. चिन्त्याः। देवानां (विश्व-) जननव्यापारस्याऽग्नेस्तादृशव्यापारात्मकं व्रतमनुलक्ष्याऽभिनिर्वर्त्तुकत्वेन समर्पणे श्रुतिस्वारस्यप्रतीतेर्लक्षणाऽर्थो गतित्वे सति समासाङ्गीभावाद् गुणतां मा गादिति कृत्वा कप्र. इत्यभिसन्धेः। एस्थि. क्रिप. भावसामान्ये प्रयुक्तत्वात् सकर्मकस्य सतोऽपि कर्मनिराकाङ्क्षत्वं द्र.। अथवा समुचितं कर्माऽऽक्षिप्येत (तु. सा.)।

[d]) उत्तरेण कृता शानजन्तेन '**चर्चूर्यमाणम्**' इत्यनेन गतित्वमुखेनैकपद्यमिच्छन्तः MW. प्रभृ. सौदर्या अनुपपत्तेर्विषये चोद्या भवेयुः (तु. सा.)।

[e]) अधिकरणानुलक्षणः कप्र. (तु. ऋ १, १८७, ४; १०, ९७, ७; १९; वैतु. PW. MW. अनु ···वितिष्ठे' इति युञ्जानौ)।

[f]) यः कुमार-मानसोपज्ञो रथः नापू. मन्त्रेऽश्रावि यद्विषये च तदितरेषां विप्राणां प्रवृत्त्यभाव इह समकेति, तमनुलक्ष्य (तदाधारेणेत्यर्थः) इतोऽग्रे साम तथाऽनभिप्लवां संप्रवृत्तिमलब्ध, यथा नाव्याहितं सत् किञ्चिद्वस्तु मध्येसागरमपि सुरक्षितं भवेदिति श्रुतिस्वरसे प्रतीयमानेऽपि यत् सा. प्रभृ. सर्वे व्याख्यातारः 'अनुप्रावर्तत' इति द्विस्वरं द्व्युपसर्गं च योगमनुमन्वीरंस्तत्राऽऽस्थाऽभावः साऽर्थः स्यात्।

[g]) लक्षणे कप्र. द्र.।

[h]) 'अनुप्र···धावतु' इति योगं ब्रुवाणाः PW. प्रभृ. चिन्त्याः। प्राधान्येन विवक्षितस्य लक्षणार्थस्य तथात्वे गुणताप्रसङ्गादैकपद्ये सति द्वैस्वर्यानुपपत्तेश्च (गतिद्वयं समस्तं सदेकपिण्डीभूतमेकस्वरं च स्यादित्यभिसन्धिर्भवति [तु. W. शौ ३, १८, ६])।

[i]) '**वातस्य**' इति षष्ठ्या सहाऽनुं कप्र. युयोजयिषुः सर्वथोत्तन्त्रः सा. उपेक्ष्यः। द्वितीयान्तेन '**वि-ष्ठाः**' इत्यनेन पदेनास्याऽन्वयः द्र.।

[j]) पाठः खण्डितोऽतो विवेको दुःशकः।

[k]) तु. ऋ ७, ७७, ३; ८, ५८, १।

[l]) सप्तम्यर्थे कप्र. द्र.।

[m]) '**अनूजेषम्**' इति द्व्युपसृष्टं द्विस्वरं च योगमुशन्तौ PW. MW. च चिन्त्यौ भवतः। अनुद् लक्षणे कप्र. द्र.। तथाऽन्वयस्य स्वारसिकत्वात्।

[n]) '**सूर्यस्याऽऽवृतमनु(=उद्दिश्य)आवर्ते**' इति वाक्यार्थस्य सुस्पष्टत्वाल् लक्षणार्थे कप्र. (वैतु. यस्था. **अन्वावर्त्तें** इति तै. काठ. शौ. पै. सौवरः पाभे. यतस् तत्राऽनोरुपसर्गता स्पष्टा भवति। सूर्यस्याऽऽवृतः कर्मतया विवक्षितत्वे सत्य् अन्वा√वृत् इत्येतस्य सकर्मकता चेति दिक्)।

[o]) '**अमृतान्**' इत्येतत्संबद्धो लक्षणे वाऽऽनन्तर्यार्थे वा कप्र. द्र.।

[p]) लक्षणार्थे समन्विते सत्यपि '**अनुरीयमाणाः**' इत्यैकपद्यावच्छेदेन द्विस्वरं योगमनुमन्यमानौ PW. MW. च चिन्त्यौ द्र.।

[q]) सा. (तै ४, १, २, २) म. च व्यवहितेन '**अख्यत्**' इत्यनेन क्रिप. गतित्वेन योगमाहतुः। तन्न। अनूपसृष्टधातुवाच्यार्थस्य प्रकरणाभावादिति यावत् (तुटि. ऋ ७, ७०, ४)। प्रथमयोर्द्वयोः पादयोश्चतुर्थे च पादे लक्षणार्थस्तृतीये च पादे सदृशार्थः कप्र. (तु. ऋ ५, ८१, २ यत्र सवितृ-संबन्धेन समानं वर्णनं भवति)। ननु√ख्या सकर्मकोऽकर्मको वेति। उभयमिति। कथमिति। उच्यते। यदा कर्मविशेषनिरपेक्षं सामान्येन दर्शनप्रकाशनाद्यर्थो भवति तदाऽयमकर्मकः (तु. ऋ १, ४६, १०; १२३, २; ४, १३, १; १४, १; १९, ९; २४, ८; १०, १२७, १ प्रभृ. शौ ७, ८२, ५ प्रभृ. च) एषु स्थलेषु क्वचित् क्वचित् प्रतिर् अनोः स्थाने श्रूयते। तत्र यदि प्रतिः कप्र. न स्यात्तर्हि प्रासङ्गिकार्थाद् विपरीतस्याऽर्थस्य प्रतीतिः स्यात् प्रतिख्यानात्मकस्य।

५^{४a}; २८†; ९३†; **१३**, ५^{४}†; ६; ७; ९†; **१७**, ३८^{२}†; ६६^{h}; **१९**, ४०^{h}; ५४†^{h}; **२०**, ४९†; **२७**, १६; **२९**, १९^{४}†; ४३†; **३२**, ४; **३३**, ३२†; **३५**, ७†; का **१**, ७, ४; १०, ५^{b}; **२**, ४, १^{२c}; ६, ५^{d}; ७^{d}; ७, ५^{e}; **३**, ३, ६†; ७, २†; **४**, ९, ५^{e}; **५**, ७, ५†; **७**, ६, १†; ८, ११, २; १५, १†; **१०**, ३, ७^{२}†; **११**, ६, ४^{f}; **१२**, २, १; ६^{४g};†; **१३**, १, ३†; ६^{४a}; २, ११†; ६, १९†; **१४**, १, ५^{४}†; ६; ७; ९†; **१८**, ४, ६^{२}†; ६, २^{h}; **२१**, ३, ११^{h}; ४, ४†; **२२**, ५, ३†; **२९**, २, ६; **३१**, २, १०†; ३, ८^{४}†; **३२**, ३, ३†; **३५**, ३, ४; ४, ६†; तै **१**, १, १०, ३^{h}; १४, ३†; २, ४, २^{३}; ६, १^{२i}; ८, १^{e}; १०, १; १४, १†; ४^{२}†; ३, १, २†; ७, १^{२j}; ८, २; ४, ९, १†; ४४, ३^{k}; ५, १, ३¶; २, २¶; ५¶^{h}; ५, १†; ७, १†; ८, ३¶; १०, ४^{l}; ६, ४, १^{५}; २^{३}; ५, २^{४m}; ¶७, १, १^{n}; ६^{o}; ४, २^{३p}; ५, १^{२h}; ३^{q};

न च तदुपयुज्येतेति यथा प्रतिस्तथाऽनुः प्रकरणसामान्ये कप्र. एव स्यादित्यभिसन्धिः ।

a) कप्र. द्र. । (तुटि. तै **१**, ६, ५, २; वैतु. मै **२**, ७, ८ यत्राऽनुगतत्वाद्यर्थैर्विक्रमणक्रियाया एकपिण्डीभावेनेव विवक्षायाः संभाव्यमानत्वाद् अनोर्गतिभावस्तदर्थाऽनुप्राणितक्रियायाः सकर्मत्वं च भवति) ।

b) सप्तम्यर्थे कप्र. [तु. पूर्वस्मिन् पादे **'पशुषु प्रविष्टः'** इति; वैतु. सा. **अनु···वितस्थे** इति द्व्युपसृष्टमाख्यातमिच्छन् (तथा संभवत्यपि **'वि-ष्ठाम्'** इत्यत्राऽनुव्याप्यत्वमभिप्रेतमिति कृत्वा **'कालाध्वनोः'** (पा **२**, ३, ५) इति द्वि. द्र. । सा. तु 'अनुसृत्य' इति भाषमाणः कर्मणि द्वि. इतीवाभिप्रैति)] ।

c) तुटि. मा **२**, १५^{२} ।

d) तुटि. मा **२**, २६; २७ ।

e) तुटि. मा **४**, २८ ।

f) तुटि. मा **१०**, १९ ।

g) तुटि. मा **११**, १७^{४} ।

h) लक्षणे कप्र. द्र. ।

i) तृतीयार्थे वा लक्षणार्थे वा कप्र. द्र. ।

j) लक्षणे कप्र. । गतिरिति ब्रुवन् MW. चिन्त्यः (तु. सा. भा. च) ।

k) आनन्तर्ये वा (तु. सा. भा. च) लक्षणे वा कप्र. द्र. । प्रथमे कल्पे **वसोर्धर्मस्य** च **दिवश्चाऽऽस्थान**क्रियासामान्याऽपेक्षया तत्पूर्ववर्तिन्या देवगणकर्तृकायाः क्रियाया अपेक्षयाऽऽनन्तर्यं द्र. (वैतु. सा. भा. च **वसुधर्म**विषयस्याऽऽस्थानस्यापेक्षया द्युविषयस्याऽऽस्थानस्याऽऽनन्तर्यमिति) । द्वितीये कल्पे **वसुधर्ममनु**लक्ष्येति संबन्धः (तु. शौ **७**, १०२, ४ पाभे.) ।

l) लक्षणार्थे कप्र. । (वैतु. PW. K. प्रभृ. **'अनुसंचरन्ति'** इत्यपलक्षणद्विस्वरं योगमसत्यप्यनिवार्यत्वेऽनुमन्यमानाः) ।

m) लक्षणे कप्र. । पृथिव्यन्तरिक्षद्युदिशां विक्रमणाधिकरणतया लक्ष्यत्वेनाऽनुश्रूयमाणत्वात् (तु. K.; वैतु. भा. यः पश्चादर्थे कप्र. इच्छन् **वि√क्रम्** इत्येतम् आत्म. सन्तं सकर्मकतां प्रापयिष्यन् भवति) ।

n) लक्षणे कप्र. (तु. भा.) । K. त्व् **अनुम्** **'उपतिष्ठन्ते'** इत्येतेनाऽऽख्यातेनाऽनुगमयति । पशूनां पाकयज्ञमनुलक्ष्योपस्थानस्य विवक्षितत्वात्तस्य च गतित्वे गौणतापत्तेः प्रथम एव कल्पः साधीयानित्यभिप्रेमः ।

o) दक्षिणाया यत्तद्वैशेष्येण युक्तायाः पश्वन्तरसंक्रमणलक्ष्यत्वेन शिश्रावयिषितत्वात् तदर्थीयः कप्र. द्र. ।

p) सा. भा. च **'लक्षण-'** (पा **१**, ४, ९०) इति कप्र. । **'तृतीयार्थे'** (पा **१**, ४, ८५) इति च K. । यथा तु MW. आनन्तर्यार्थे ग्राहयितुं गतित्वं संप्रधारयामास, नैतत् तथा संभवेत् । गतित्वं ह्युपगतोऽनुर्यदा भवति, तदैतदुपसृष्टस्याऽऽख्यातस्य द्विधा प्रवृत्तिर्भवति । कस्यचिदपरकर्तृकस्य स्वजातीयस्य स्वाभिन्नस्य वा भावस्यापेक्षयैतद्वाच्यस्य भावस्य भौतिके वा दिक्कालादिलक्षिते बौद्धे वा **चिति**संस्कारलक्षिते पश्चाद्भावित्वविशिष्टे सादृश्य-सामीप्याद्यर्थबोधने तात्पर्यमित्येकम् । प्राक्ताविशिष्टस्य भावस्य वा नामीभूतस्य वा तत्कर्तुर्वा तेनाऽनूपसृष्टेनाऽऽख्यातेन कर्मसंबन्धाद् उपसृष्टेस्तस्याः पूर्वमकर्मकस्यापि सतः सकर्मकता भवतीत्यपरम् । एवं च सत्य् **अनुश्चेद्** उपसर्गः स्यात्तर्हि यजमानकर्तृका देवकर्मिका वा देवोज्जितिकर्मिका वा तदनुपातिन्युज्जितिरवगम्येत । देवाः पूर्वं विजयिनः सन्तो यजमानेन पश्चाज्जिता इत्यर्थः । नचेयमिष्टापत्तिः । तात्पर्यविरोधात् । देवकर्तृकेण विजयेन तत्साधनकस्य तदनुलक्षितस्य वा यजमानकर्तृकस्य विजयस्य प्राधान्येन विवक्षितत्वात् । देवविजयस्य पूर्वसिद्धत्वात् तत्प्राक्का सिद्धयजमानकर्तृकस्य विजयस्य च पश्चात् तद्द्वारा च शाब्दं वाचनं त्वात् तदनन्तरता स्वत एव सिद्धा सती नापेक्षेत । एवं खलु कर्मप्रवचनीयवाद एवेह सुस्थितः । स एव च सौवरलक्षणानुकूलः (तुटि. मा **२**, १५^{२}) ।

q) लक्षणवचनः कप्र. न गतिः (वैतु. K. **'अनू-[नु । उ]पयन्ति'** इति) । नाउ. मन्त्रे त्व् **'अनूपयुन्ति'**

६, ३¶[a]; ७, २[b]; ८, ३^{२}†; ८, ५, १^{३}[c]; १४, २¶[d]; ¶२, १, ४, ५[e]; ५, १[f]; ६[g]; २, १, ४[h]; ५[i]; ९, ५[j]; ३, ३, १^{२}[k]; ५, ३[l]; ७, १[m]; १२, २[m]; ४, २, १^{२}[n]; २[o]; ४[o]; ८, १†; २[p]; ५, ३, २; ३; ४. २^{२}[q]; ५, ३[q]; ६, २[r]; ८, ७[s]; ६, ५, ६[t];

इति गतिर्न कप्र. इति स्वरविवेकेन विज्ञाप्यमानोऽसावुभयोः प्रयोगप्रकारयोर्विषये विवेचनीयः । तद् यत्र लक्षणाद्यर्थः कर्मकारकाद्यनुबद्धतया प्राधान्येन शिश्रावयिष्यते, तत्र तद्वाचकाः प्रातिस्विकस्वराः कप्र. प्रयुज्यन्ते । अथ यत्र त एव नि. अर्थान्तरवाचकाः सन्त आख्याताऽङ्गभूतास्तदर्थविशेषणपरत्वेन शिश्रावयिष्यन्ते, तत्र त उपसर्गधर्मिण आख्यातस्वरभावाभावव्यवस्थितस्वरा भवन्तीति । अन्यथैतावता संनिकर्षेणाऽपार्थस्वरभेदश्रुतेरनुपपत्तेरिति दिक् ।

[a]) '**अनु-पर्यावर्तते**' इत्येवमत्र प्रथमोत्तमस्वरवत् त्र्युपसर्गयोगमिवाऽऽतस्थिवान् MW. (तदनु K. च) चिन्त्यः स्याल्लक्षणार्थस्य विस्पष्टं श्राव्यमाणत्वात् ।

[b]) तृतीयार्थे कप्र. इति K.। लक्षणेऽपि सुगमः । गतित्वमुशन् भा. त्विह चिन्त्यः । स्वराऽनुपपत्तेः ।

[c]) प्रथमो द्वितीयश्चाऽनू इत्थंभूतलक्षणे, तृतीयश्च लक्षण इति विवेकः (तु. ऋ १, ८२, ३)। '**अनु**'''**प्र**'''**यासि**' इति योगे कृताऽऽस्थो भा. चिन्त्यः। वश- शब्देन तत्त्वतोऽपरिचयात् । अथाप्यसाविह मुधैव विकल्पग्रस्तः द्र. ।

[d]) गतिरिति भा. K. च। द्वैस्वर्यं त्वनिष्टं तथाऽऽपद्येतेति लक्षणे कप्र. एव द्र. । (तुटि. तै १, ६, ५, २)।

[e]) 'जघनतः' इत्यर्थे **जघने** (द्वि२) इत्यनेन सम्बद्धः कप्र. भवति । भा. K. च **जघने** इति स१ पश्यन्तौ '**अनूदैत्**' इति द्व्युपसृष्टत्वे सति द्विस्वरं योगं ब्रुवाणौ चिन्त्यौ, तन्मतेनैव **पश्चादर्थस्य जघन**-शब्देनोक्तत्वात् । प्रकरणे तन्मात्रतया संभवस्याऽन्वर्थस्य चारितार्थ्याभावं प्रति, सत्यैकपद्ये द्वैस्वर्यस्याऽपलक्षणतां च प्रति तौ चोद्यतां व्रजतः । **ननु जघन**- इति प्राति. पुं. श्रूयते (तु. ऋ १, २८, २ प्रभृ.) इति चेत् । सत्यमेतद् अंशत एव । न. अपि श्रुत्युपलम्भात् (तु. तैब्रा **२**, ४, २, ७ [यच्छाखासाम्याद् नेदिष्ठतया प्रामाण्यमर्हेत्])। नन्वेवमपि मुपा. पपा. च प्रगृह्यत्वलक्षणाऽनुपलम्भश्चोद्यः स्यादिति चेत् । ओमिति ब्रूमः । अस्मद्व्याख्यानेऽस्यांशस्य प्रामादिकविकारतयाऽनभ्युपाये सति मृग्यसमाधानान्तरत्वादिति दिक् ।

[f]) लक्षणे कप्र. । '**अनूदायन्**' इति गतित्वं मन्वानौ MW.K.च चिन्त्यौ । तथा तु सति स्वराऽनुपपत्तिर् द्र. ।

[g]) भा. K. चाऽत्र लक्षणार्थमपश्यन्तौ '**अनुसंतनोति**' इति रू. प्रतिपन्नौ न्याय्येतरद्वैस्वर्यपक्षपातिनौ सन्तौ चिन्त्यौ ।

[h]) पश्चादर्थे अव्य. (तु. नाउ. स्थ. यत्र '**उपरिष्टात्**' इति प्रयुज्यते; वैतु. MW. '**अनुनिर्वपेत्**' इति) ।

[i]) आनन्तर्यार्थबोधकम् अव्य. क्रिवि. संबन्धश्च (वैतु. मै **२**, १, १ यत्र समाने प्रकरणेऽनुः पृथग् अव्य. क्रिवि. असन् नाउ. क्रिप. गतिभावेनाऽनुप्रविष्टो भवति [तु. सस्थ. टि. **अनु-प्र**√**२यम्**> **अनुप्रयच्छति**])।

[j]) प्रधानभूतां वाचमनुलक्ष्याऽन्या वाचः प्रवदन्तीति वाक्यार्थप्रतीतिर् अनुः कप्र. (वैतु. MW. **अनुप्रवदन्ति**' इत्यन्याय्यो योगः) ।

[k]) लक्षणार्थस्य प्राधान्येन विवक्षितत्वाद् द्व्युपसृष्टिश्च तामनु द्विस्वरता चाऽनभीष्टा सुवारा द्र. । प्राच्येवमेव विवृण्वत्स्वपि गतित्वमेवाऽनुमन्वानाः MW.K.प्रभृ.चिन्त्याः।

[l]) **आ**√**प्याय्** इत्यस्य शुद्धस्याऽकर्मकत्वाद् भिन्नकर्तृकाऽऽप्यायनयोर्द्वयोर्मध्ये लक्षणलक्षितसंबन्धस्यैवोपपन्नत्वात् कप्र. एव सुवचः ।

[m]) लक्षणे कप्र. । अन्यथादर्शी MW. चिन्त्यः ।

[n]) लक्षणे (हीने वा तु. भा.) कप्र. । (वैतु. PW. प्रभृ. '**अनु-सम्-आ-रभामहे**' इति त्र्युपसृष्टं द्विस्वरं योगमनुमन्यमानाः सन्तश्चिन्त्यतामुपगताः । तथा हि सति '**गतिर्गतौ**' (पा ८, १, ७०) इत्युक्तदिशा निहतः स्याद् अनुः [तु. नाउ. नि. **सम्** इति; एवमपि तुटि. ऋ १०, १०३, ६]) ।

[o]) **अनोः** कप्र. सप्तम्या योगः समवधेयः ।

[p]) **अन्तर्** इत्यर्थेऽन्तर्भागानुलक्षणवचनः कप्र. (वैतु. **अनुवि**√**विश्** मै **२**, ४, ७; ८ यत्राऽयं कर्मण्येव कारकान्तरसंबन्धस्याऽन्तर्भावादिव गुणभावाद् गतिभावं प्रापितो भवति)।

[q]) पश्चादर्थे अव्य. द्र. ।

[r]) सप्तम्यर्थपर्यवसानकः कप्र. द्र. ।

[s]) एपूटिदि.कप्र.द्र.।'**अनुप्रपिपते**'इति योगम् PW.प्रभृ. आहुः । तन्मन्दम् । ऐकपद्ये स्वरद्वयस्याऽपलक्षणत्वात् ।

[t]) तु. तै **२**, ६, ५, ५ यथा तत्र **प्रस्तरस्याऽऽहवनीये** प्रहरणं श्रावितं भवति तथाऽत्र तत्सकक्षतया तदुत्तरविधितया च प्रस्तरस्य तदेकांशस्येत्यर्थे **बर्हिरनु** (बर्हिषि) प्रहरणं श्राव्यते । एवं चेह सप्तम्यर्थपर्यवसानो लक्षणे कप्र. एव वक्तव्यः । गतित्वाऽध्यवसानः MW. विस्पष्टेतरान्वयः K. च चिन्त्यौ भवेताम् ।

१०, ४[२a]; १२, २†; ¶३, १,
३, १[b]; ४, २$[c]; ८, ३[४]†;
२, १, ३[d]; ४, ५[e];
५, ५[२f]; ६[२g]; ६, १$[h];
३, ६, ३[३i]; ७, १[३i]; २[i];
४, ८, ३[j]; ६[k]; ५, १,

३[d]; ४[d]; २, ३[l]; ४[२l]; ६,
२[m]; ३[२m]; ४, १,२, १[d]; २[४n];
३[n]†; ८, २[o]; १०, ४†; २,
१, १[२p]; २[p]; २, ४†; ८, २†;
३[५]†; ९, ५[४]†; ३, १०,
३[q]; ११, १[२r]; ४[२]; ४, ४,

८[s]; ६, ४, २[२]†; ५, १;
६, ३†; ७, ३[४]†; ¶५, १, १,
४[t]; २, ६; ३, १[d];
७, ४[d]; ८, ६[d]; २, १,
३[२]; ३, ६; ५, ४[४u];
६, १; ७, ३[v]; ८,

---

a) हेतुवचनः कप्र. इति भा. अभिप्रैति । तथात्वं लक्षणावाचकताद्वारकमेवाऽनुवेदितव्यम् । पञ्चत्वसंख्यामनुलक्ष्य तत्पूर्त्तिहेतुना प्रायणवत्-समिष्टयजुःसंकलनेनोदयनपञ्चकस्योक्तत्वात् ।

b) तुटि. तै २, १, ५, ६ ।

c) लक्षणे वा तृतीयार्थे वा कप्र. । यत्तु भा. ऐकपद्यमिवोत्तरेण कर्मणि शानजन्तेन कृताऽभ्युवाह ‘अनुरज्यमानाः’ इत्येवं च व्याचचक्षे, तन्नोपपद्यते । प्रथमा खल्वापत्तिः सौवरी सुविदिता विमृशां भवति । कर्मणि प्रवृत्तिमतः पदस्य कर्त्तरि व्याख्यानं दुर्वचमित्यपरा । उपेक्षिताऽनुपदः K. तूपेक्ष्यः ।

d) लक्षणे कप्र. द्र. ।

e) यत्तु MW. **‘अनुप्रसर्पन्ति’** इत्य् आख्यातिकं योगमाह तदसत् । स्वरविरोधात् । अत एवंविधेषु लिङ्गान्तरैः सामान्येन गतितया वा कर्मप्रवचनीयतया वा सुवहेषु स्थलेषु स्वर एव विनिगमकः स्यात् । लक्षणाद्यर्थस्य प्राधान्ये द्वैपद्यं द्वैस्वर्यं च । तस्याऽऽख्यातान्तर्भावेण गौणत्व ऐकपद्यमैकस्वर्यं चेति दिक् ।

f) इत्थंभूतलक्षणे कप्र. । यथाऽनु विष्णुं भक्तस्तद्वदित्यर्थः । वस्तुतस्त्व् अनुगतत्वाऽऽदिबोधकाऽऽख्यातस्य गम्यत्वमिह द्र. । एवं च गर्भीकृताऽऽख्यातानुप्राणितार्थवचनसामर्थ्यमित्थंभूतलक्षणार्थ इति सुवचं भवति ।

g) हीने कप्र. इति भा. सुवचः ।

h) हेत्वर्थानर्थान्तरभूते लक्षणे कप्र. ।

i) नापूटिदि. कप्र. । गतित्ववादी MW. चिन्त्यः ।

j) इह द्वयोः कल्पनाऽऽख्यभावयोर्मध्ये प्रथमोक्तमनुलक्ष्य पश्चादुक्तस्य संभावितया श्रावितत्वाच्चाऽनुकल्पनाऽऽख्यस्योपसृष्टभावस्याऽप्रासङ्गिकत्वाच्च यथाकथमप्यभ्युगमे सति लक्षणविषयभूतवाचकस्य द्वितीयान्तपदस्याऽन्वयविघातकत्वाच्च गतित्वपक्षपातिनी मतिरर्वाक्तनी (तु. PW. प्रभृ.) नाऽऽद्रियेतेति दिक् ।

k) आनन्तर्ये गतित्वकर्मप्रवचनीयत्वव्यतिरिक्तं प्रातिस्विकाऽन्वययोग्यमव्ययमनुमन्तव्यमिति ।

l) आनन्तर्य इति भा., तृतीयार्थ इति K. । सप्तम्यर्थसामान्येऽथवा वक्तव्यः कप्र. अनुपदमोषध्यादिषु पश्वादीनां प्रतिष्ठापनात्मकाच्छ्रुतिलिङ्गात् । सर्वथाऽपि कर्मप्रवचनीयतामात्मनस्तु न जहातीति । अनु-सं√तन् इत्येवं वितथाऽनुमानीव प्रतीयमानः MW. चिन्त्य एव स्यात् ।

m) लक्षणे कप्र. । अनन्तरपर्यायं स्वतन्त्रम् अव्य. इति भा. ।

n) लक्षणे कप्र. (तु. ऋ ८, ४८, १३; तुटि. मा ११, १७[४]; वैतु. सा. अनु…आततान’ इति) ।

o) अनु√दद्<√१दा> ‘अनु…ददन्ते’ इत्यत्र टि. द्र. ।

p) तुटि. मा १२, ५[४]; वैतु. **अनु-वि√क्रम्>अनुविक्रमस्व** मै २,७,८[४] ।

q) स्वार्थप्रधानम् अव्य. (वैतु. ‘अनुव्यायन्’ मा १४,३०)।

r) इह **‘अनुसंचरन्ती’** इति पदं ब्रुवाणः सा. चिन्त्यः । एकस्मिन् पदेऽनेकस्वरानुपपत्तेः । अतः सप्तम्यर्थपर्यवसानके लक्षणे कप्र. एव प्रथमोऽनुः । अथ **‘ऋतस्य पन्थामनु’** इत्यत्र तृतीयार्थे वा लक्षणे वा द्वितीयोऽनुः कप्र. एव । ऋतस्य मार्गेण वा मार्गमुद्दिश्य वाऽऽगमनमात्रस्योषसां विवक्षितत्वात् । कुतः । उच्यते । अनुपदं ज्योतिषा त्रयाणां घर्माणामन्वागमनस्य श्रूयमाणत्वात् । आगमनमेवान्व् अन्वागमनस्योपपन्नत्वात् (तु. ‘रेतः’ शौ ८, ९, १३) । एवमस्यां कण्डिकायां त्रयोऽनवो भवन्ति । तेषां द्वौ कर्मप्रवचनीयावादिमौ चरमस्तु गतिरिति विवेकः । अन्यथेवाभिप्रयन्तौ सा. K. चोक्तदिशा चोद्यौ भवतः (तुटि. सस्थ. **अन्वा√गा>अनु…आगुः**) ।

s) इहेत्थंभूतलक्षणे वा हेत्वात्मकलक्षणे वा कप्र. द्र. । बाह्वृचे तु गतित्वमुपागतः (तु. ऋ १,१२७,१) ।

t) तृतीयार्थे वा हेत्वर्थतात्पर्यको वा कप्र. द्र. ।

u) लक्षणे कप्र. । ‘अनूत्सृजति[२]’ इति **‘अनुपर्यावर्तन्ते[२]’** इति च द्व्युपसृष्टं द्विस्वरं च योगं पश्यन्तौ PW. MW. चाऽयथार्थदर्शिनौ भवतः ।

v) वैतु. तै ५, २, ७, २ यत्रत्याद् **‘अनु-उप√धा’** इति योगादिहत्ये पृथक्कृताऽनुके प्रयोगे सूक्ष्मेक्षिकयाऽवश्यं विशेषः कश्चन भवति । तदपश्यन्तः MW. K. प्रभृ. चिन्त्याः ।

४^{२}[a]; ७[b]; ९, ५[c]; ३, १,
३[d]; ४, ७[e]; ५, २[f]; ७, ४[g];
४, २, १; ६, २; ७, १$;
६[h]; १०, ३[i]; ५, २, १[h];

५, २[j]; ७, ५[i]; १०,
६[i]; ६, ४, १; ७, ४,
४$; ७, १$; ९, २[k];
¶६, १, ५, ३[l]; ४^{२}; ७,

७$; ८, १[m]; ९, ५[n]; ११'
२$[o]; ३, ४, ७[p]; ५,
३$[q]; ७, १; ८, ३; ४$;
४, १, २^{२}; २, ६[r];

a) एकतरत्र गतिमदङ्गिरोभिःप्रसर्पतः पुरोडाशस्य केवलं गच्छन्तमनुगच्छति इत्याकारकः पौर्वापर्यात्मकोऽनुसार्यानुसरणविशिष्टः संबन्धो न भवति । किन्तु स्वर्गं यतोऽङ्गिरस उद्दिश्य (=तत्-सहभावप्राप्तये) स्वभावतश्चलितुमशक्नुवन्नपि कूर्मत्वमुपगच्छन् पुरोडाश आत्मनः प्रसर्पणमकारयदिति तात्पर्यात् कूर्मीभूतस्य पुरोडाशस्योद्देशविशेषसाधनतामुपगतायाः प्रसर्पणक्रियायाः श्रावणे मन्त्रस्वारस्यात् कप्र. अनुर् न गतिरित्यभिसन्धिः । अन्यत्र लक्षणे कप्र. (तुटि. तै ६,५,११,१)। उभयत्र वैतु. PW. प्रभृ. 'अनु-प्र√सृप्' च 'अनु-परा√भू' च ।

b) 'तृतीयार्थे' (पा १, ४, ८५) इति चीयमानाग्नेर्वेदिप्रवेशे करणं समर्पयितुमिष्टं द्र. । उलूखलमुपधेयमिति विधिर्भवति । नाभिर्हि तद् अग्नेश्चीयमानस्य भवति । तदुपधाने सति स्वनाभ्यैवासावग्निर्वेदिं प्रविशति । तदनुपधाने स्वनाभिमपश्यन् यजमानस्य प्रामादुकस्य नाभ्या द्वाराऽसौ वेदिप्रवेशं कुर्वाणस्तं विहृणीयात् । मैवं भूदित्युपधेयमुलूखलमिति श्रुत्यर्थो भवति । अथवाऽधिकरणात्मकः सप्तम्यर्थोऽभिप्रेतः स्यात्तद्वचनश्च कप्र. द्र. (तु. मै **३**, २, ७; काठ **२०**, ७; क **३१**, ६ यत्र ना॒भि- इत्यस्य स१ श्रूयते)। उभयथाऽपि **नाभिपदार्थस्य** मुख्यलक्ष्यत्वेन समर्पणे सति स्पष्टे प्राकरणिके तात्पर्ये यदेतदपश्यन्तः केचिद् '**अ॒नु॒प्र॒विशति**' इत्येकपदात्मकं द्विस्वरं योगं प्रतिपद्यन्ते (तु. MW. K.) तन्नाऽऽद्रियेतेति दिक् ।

c) तुटि. तै ५, २, ५, ४ ।

d) तृतीयार्थे कप्र. (तु. K.; वैतु. भा. लक्षण इति)।

e) अर्क्यम् (=अर्कभवं) साम शस्त्रं चाऽनुलक्ष्याऽर्के तदाधारेण विधा विधीयत इत्येव श्रुतिस्वारस्यं स्यात् (तु. तै **४**,३,८;९ च तदुपरि सा. भाष्यं च [K. टि. च]) । गतितया योजयन्तौ MW. K. च चिन्त्यौ भवतः ।

f) प्रणुदितान् भ्रातृव्यान् उद्दिश्येत्येवंप्रकारकेऽर्थे कप्र. द्र. ।

g) तृतीयार्थे कप्र. ।

h) लक्षणे प्रकरणस्य मुख्यं तात्पर्यमिति कृत्वा तदुद्बलनप्रयोजनः कप्र. । ऐकपद्ये सति द्वैस्वर्यानुपपत्तेः । (वैतु. भा. PW. प्रभृ. '**अ॒नु॒प्रा॒विशत्**' इति)।

i) लक्षणे कप्र. द्र. ।

i) पश्चादर्थे अव्य. वा लक्षणार्थे कप्र. वा । प्रथमे कल्पे प्रथमायाः स्वयमातृण्णाया उपधानं कृत्वा (पश्चात्) प्राणनक्रियां कुर्यादित्यन्वयः स्यात् । द्वितीये कल्पे प्रथमां स्वयमातृण्णामुपधीयमानामनुलक्ष्य प्राणयादिति संबन्धः । एवं चाऽन्यतरार्थकोऽनुरुत्तरयोर् उपधानयोरप्यनुवर्तयितव्यो भवति । नन्व् '**अ॒नु॒प्रा॒ण्यात्**' इत्येका द्व्युपसृष्टा क्रिया स्यादिति । नेति । कथम् । यावता सकृद्वे उत्तरे '**व्य॑न्यात्**' इति च '**अ॒पान्यात्**' इति चोभे अपि क्रिये अद्व्युपसृष्टे सती '**प्रा॒ण्यात्**' इति क्रियाऽपि तदन्व् अद्व्युपसृष्टेत्युपकल्पितामिति । अन्यथात्व ऐकपद्ये सति द्वैस्वरी नोपपद्येत ।

k) लक्षणे कप्र. । यत्राग्निर्भवति तत्रैव पशव उपतिष्ठन्त इत्यर्थः । '**अ॒नू॒पतिष्ठन्ते**' इति सकर्मको द्व्युपसृष्टो योग इति यद् भा. च K. चोष्टस्तन्न । तदभिप्रेतस्य **पश्चाद**र्थस्य प्रकरणेऽनभिप्रेतत्वाद् ऐकपद्ये सति द्वैस्वर्यस्याऽनुपपत्तेश्च (वैतु. मै **३**, २, ३; ७; ९, २; **४**, ७, ९ यत्र लक्षणार्थस्याऽप्राकरणिकत्वात् साकल्यार्थस्य च स्वारसिकत्वादिहाऽसंगतः पराभिप्रायः संगतो भवति) ।

l) तुटि. तै **३**, ४, ८, ३ ।

m) लक्षणे कप्र. । निक्रमणक्रिया पदषट्कपरिमितेत्यस्यैवाऽर्थस्य न त्विहाऽनुनिक्रमणार्थस्य प्राधान्येन विवक्षितत्वात् । अत एवाऽनौ पृथक् स्वरोऽप्यत्रैव ज्ञापको भवेत् । चिन्त्या अतो गतित्ववादिनो भा. MW. K. प्रभृ. (तुटि. '**अनु-नि√क्रम्>अनुनि॒क्रामति**' इति)।

n) सप्तम्यर्थे कप्र. तु. ततः किञ्चिदिव प्राक् श्रूयमाणं '**स॒र्वासु···उ॒प**' इति । एस्थि. भा. प्रभृ. '**अ॒नुसं॒चरति**' इति योगमनुजानानाश्चिन्त्याः स्युः । अपलक्षणद्वैस्वर्यापत्तेः ।

o) अन्तरिक्षमुद्दिश्य वाऽन्तरिक्षेण वाऽयनस्य विवक्षितत्वसंभवाल्लक्षणे वा तृतीयार्थे वा कप्र. ।

p) आनन्तर्यार्थे स्वार्थप्रधानम् अव्य. ।

q) छन्दोभिरेवैनं प्रजनयतीत्यानुपदिकाल्लिङ्गात् तृतीयार्थे कप्र. इति सिद्धमिव । वितथवादी MW. चिन्त्यः ।

r) लक्षणे कप्र. । न त्वनुपदम् **अ॒नन्ववचार-** इति

५, १[a]; ६, ३[b]; ७, १[c]; १०, ४[a]; ५, ३, ३[२d]; ८, १[३a]; ३[e]; १०, १[f]; ११, १[g]; २[२h]; ६, ४, २[i]; ६, १[२h]; ¶७, १, १, ४[२]; ५[२]; ६[२]; ५, ५[j]; ६, ८[k]; ७, ४[l]; २, ४, १[m]; ७, १[२a]; ८, २; ४;
५; ३, ७, २; ४, ४, १[n]; ८, ३[३]; ९, १[o]; ११, ४[३l]; ५, ६, २[२p]; मै १, १, ७[f]; २, ६[q]; ११†; १५[r]; १६; ३, ११†; ३३†; ३९[s]; ४, ७[२f]; ५, १†; ५[२]†; ६†; ६, २; ८, ५¶[f]; ९[५t]; †¶;
१०, ३†; १७[२u]¶; ११, २[२]†; २, १, १०¶[v]; २, २[२]¶; ४, ७†; ५, ३¶[v]; ७[२]¶[w]; १०[४]†; ६, ११[f]; ७, २[२s]; ८†; ९†; १५[२]; †; १०, ४[२]†; ६; १२, ४[x]; १३, ८[y]; १०[४]; ३, १, ४[२t]; ¶; ५[३z];

शब्दश्रवणादिहाप्य् **अनु-अव√चर्** इति भ्रमः स्यात्। इह लक्षणार्थस्यैव विवक्षितत्वात्। तस्मिन् शब्दे च हेतुमानिति वाऽऽनुषङ्गिक इति वाऽनोरर्थः। विस्तरस्तु वैश. द्र.।

a) तृतीयार्थे कप्र.।

b) यतः प्राणो न्यृतस्तत एवाऽपानोऽपि **'न्यृच्छेत्'** इत्यस्यार्थस्य विवक्षातो लक्षणे कप्र. इत्येव युक्तम्। अतः K. अत्र वैस्पष्ट्यमर्हेत्।

c) तृतीयार्थे कप्र. द्र.। वाचमनु वाचा तया सहायभूतयेत्यर्थः। **'अनुप्रयन्ति'** इति योगं मन्वानाः K. प्रभृ. तु चिन्त्याः।

d) गतित्व कर्मप्रवचनीयत्वाऽन्यतरसद्भावापेक्षया स्वार्थप्रधानम् अव्य. इत्येव साधीयः द्र.।

e) सप्तम्यर्थे कप्र. द्र.।

f) लक्षणे कप्र.।

g) लक्षणार्थस्यैव प्राकरणिकत्वाद् **अनुर्** अत्र कप्र. भवति। **परा√भू** इत्यस्य चाऽकर्मकं वृत्तं भवति (वैतु. MW. यः **'अनु-परा√भू'** इति कल्पयन् सकर्मकं क्रिप. इच्छति)।

h) हेत्वात्मके तृतीयार्थे कप्र. (तु. भा.; वैतु. PW. प्रभृ. **'अनु···परा (आ वा) भवन्ति'** इति)।

i) तुटि. तै **५**, ७, ९, २।

j) अनुक्रमार्थेऽव्ययमित्यभिप्रैति भा.। अथापि खल्व् **अधि-परि-**वत् (तु. पा १, ४, ९३) अनुप्रयुक्तविभक्त्यर्थोऽनुवादकतामात्रेण सार्थकोऽप्यनर्थक इव स्याद् अन्यथा सिद्धेः।

k) लक्षणे कप्र. द्र.। एनमनुलक्ष्याऽस्य विषय इति यावत्। आनन्तर्यार्थे अव्य. इति भा.।

l) तुटि. तै **१**, ७, ६, ३।

m) तुटि. तै **३**, ४, ८, ३।

n) प्रजापतिकर्तृकस्तुतिप्रयोगाऽभावे देवान्तरकर्तृकतदनुसारित्वप्रयोजितस्तुत्यनुप्रयोगाऽसंभवाच्चाऽपलक्षणाद्वैस्वर्यप्रसङ्गाच्च गतिभावेन **अनुर्** उत्तरां **प्र-**पूर्वां क्रियां नानुप्रवेशयितव्य इति।

o) तृतीयार्थे कप्र.। तत्र सत्रे केशवपनं सशिखं कुर्यादिति विधेरभिप्रेतत्वात्। अतः सशिख-विशिख-वपनविवेकाऽननुदर्शी K. चिन्त्यः।

p) एकतरत्र तृतीयार्थे कप्र.। **'अनुप्राणन्ति'** इत्येवं योगमुशन् MW. चिन्त्यः।

q) तुटि. मा **४**, २८।

r) लक्षणे वा तृतीयार्थे वा कप्र.।

s) पश्चादर्थे अव्य. द्र.।

t) तुटि. मा **११**,१२;१७[४]। अन्यत्र **'यज्ञमनुलक्ष्य दम्पती अन्नाताम्'** इत्येवं प्रकरणसंगत्या कप्र. द्र. (वैतु. MW. **'अनु···अन्नाताम्'** इति)।

u) **'तान् अपिपद्यमानान् अन्वपिपद्यते'** इत्यत्र तावद् **अनुर्** **'गतिर्गतौ'** (पा ८,१,७०) इति गतिलक्षणं निघातमनुभवन्नपि सजातीयप्रयोगान्तरसाम्येन सस्वरः कप्र. स्यादित्यपेक्षा बलवतीव भवति। कदाचिन्मूलतो विद्यमानः स्वरः प्रमादाच्च्युतिं गमित इतीव चोत्प्रेक्ष्यते। तु. अनुपदमेवोपरिष्टात् **'तान् प्रजायमानान् अनु प्रजायते'** यत्र **अनुर्** इति पृथक् कप्र., **'प्रजायते'** इति च पृथक् क्रिप. भवति।

v) तुटि. तै **१**, ७, ४, २।

w) एकतरत्र यत्तु मुपा. **'अनुवर्षति'** इत्येवमुपसृष्टमाख्यातं शिश्रावयिषितं भवति तदसङ्गतत्वाच्चिन्त्यं द्र.।

x) कप्र. यथा भवति तथा **'अनु-सम्-प्र√या>?अनुसम्प्रयात'** इत्यत्रत्ये टि. यद्र.।

y) तुटि. तै **४**, ४, ४, ८।

z) सकृद् **'अनुप्रतितिष्ठति'** इत्यत्र गतिर्भूत्वाऽथ त्रिः कप्र. द्र.। यदा द्वयोः समानभावयोर्लक्ष्यलक्षणसंबन्धो विवक्षितो भवति पौर्वोत्तर्यप्रकारकस्तदा तद्वचनः **अनुः** कप्र. वा स्याद् गतिर्वेत्युभयथाश्रुतेर्विकल्पः। यदा चैकस्मिन् वाक्ये प्रयुक्ताया गतिभूताऽनुविशिष्टायाः क्रियाया अर्थो वाक्यान्तरेऽनुपदिन्यनुवर्त्तयितुमिष्टो भवति तदा तदर्थं प्रकारद्वयमुपयुज्यमानं द्र.। तद् यथा।

२, १^{२}†; ५¶[a]; ६^{२};†¶[b]; १०; ¶३, ५; ६[c]; ८; ४, ५[d]; ६^{३}¶; ¶६, ४; ८; ७, १[e]; ६^{३}; ७; ८, ४¶; ९, ७[f]; १०, १^{२}[g]; २[h]; ७¶[h]; ११, १०[h]; १६, ३†; **४**, १, ७[i]; १०¶[j]; २, १¶[k]; ३, १¶[l]; ३[m]; ४, ५¶; ¶५, १; ३^{२}[i]; ४^{६}[n]; ७; ८[o]; ६, २¶; ३^{४}[i]; ५[i]; ६¶[p]; ७, ४^{२}[i]; ८, ९†; ९, १०^{३}¶[i]; १०, २†; ६†; ११, २?[q]; ३†; ४^{२}†; ५^{२}†; १२, ४^{२}†; १४, १२†; १४†; १६^{२}†; १८†; काठ **१**, ६; **२**, ६^{२}[r]; १२†; १५†; **३**, ४^{३}; ६[l]; **४**, ११†; १३[s]; १६[q]; **६**, २[t]; ८[i]; ९†; ११^{२}†; **७**, ४†; ५†; १३[i]; १४^{२}[t]; **८**, ५; ७^{२}; ८^{२}; १५; १७†; **९**, १^{२}[i]; ३; ४; ६^{४}[u]; †; ११^{४}[i]; १४^{२}[i]; १८†; **१०**, ४^{२}; १०^{२}[v]; **११**, २; ३^{२}; ४^{२}; ८; ९†; १०; **१२**, ५^{३}; **१३**, ८^{२}; ९^{४}†; १४^{२}†; १६†; **१५**, ७[i]; **१६**, १; २^{४}[w]; ८^{५}[x]; ९†; १५^{५}†; **१७**, ८†;

अनुः पश्चादर्थकः कप्र. एव पुनः श्राव्येत तस्य चाऽऽक्षेपेणाऽनुवर्तनीयया मूलक्रियया क्रिवि. संबन्धः स्यादिति प्रथमः प्रकारः यथेह । अथ लक्ष्यलक्षणभूतसमानभावाभ्यां कर्तृत्वसंबन्धविशिष्ट-पूर्ववाक्यगतपदद्वयसकक्षतया समर्प्यमाणे स्वं स्वं भावं प्रति कर्तृभूते पदान्तरे एवोत्तरे वाक्ये श्राव्येयाताम् । पश्चादर्थकगतिभूताऽनुसहिता समग्रैव च क्रियाऽऽक्षेप्या स्यादिति द्वितीयः प्रकारो भवति यथा मै **३**, ३, १०; काठ **२२**, २ इत्यत्र ।

---

[a] 'हीने' (पा **१**, ४, ८६) इति कप्र. । **अधिकशक्ति**-हीनशक्तिभ्रातृव्ययोः प्रणोदनस्य सममभीष्टत्वात् तयोस्तत्ताऽति-अनुभ्यां द्योतिता भवति ।

[b] तु. नापूटि. । न चेह **'स्यात्'** इत्याख्यातस्य विद्यमानत्वात् तेन गतित्वेन योगः स्यादित्युच्येत । प्रतिवाक्यं क्रियान्तराभावे भ्वस्तिरूपस्य क्रियासामान्यस्य विद्यमानत्वदर्शनान् नेह किमपि विवेकविनिगमकं विशेषान्तरमुत्पश्यामः । पूर्ववदेव च सदृक्-पदस्य **'अति'** इति कप्र. साम्निध्याद् विषयविवेकार्थं हीनार्थवचनोऽयं कप्र. एव द्र. ।

[c] तृतीयार्थवचनः कप्र. । तादृक्-सकक्षपदसाहचर्यात् ।

[d] प्रायिकसामान्यवत्सु सत्स्वपि बहुषु **स्थ.** एष तावत् परस्परं विशेषो भवति यथा कश्चिद् निपातोऽन्यत्र गतिर् भवत्यन्यत्र च कप्र. इति (प्रकृते तु. **अनु-प्रति √स्था>अनुप्रतितिष्ठति** मै **३**, ३, १०; ४, ४ यत्र **अनुर्** गतिर्भवति) । एस्थि. यथोपलब्धि सौवरी स्थितिरेवाऽत्र नियामिका स्यादिति दिक् ।

[e] तुटि. तै **६**, १, ५, ३ ।

[f] तुटि. मै **१**, २, १५ ।

[g] एकतरत्र तुटि. तै **३**, ३, ११, १ । अन्यत्र लक्षणे कप्र. ।

[h] लक्षणार्थस्य प्राधान्येन विवक्षितत्वाद् **'अनु''' प्रजायन्ते'** इत्येवं योगं पश्यन् तदन्तर्धापकः MW. चिन्त्यः । कप्र. इत्येव साम्प्रतम् ।

[i] लक्षणे कप्र. द्र. ।

[j] **'मूलम्'** इत्यनेन सम्बद्धो लक्षणार्थे तृतीयार्थे वा कप्र. द्र. ।

[k] हेत्वर्थपर्यवसानके लक्षणे कप्र. । वितथदर्शी MW. चिन्त्यः । अकर्मकस्य जागरणस्य कर्माभिसंबन्धनैरपेक्ष्यात् ।

[l] तृतीयार्थे कप्र. ।

[m] तुटि. मै **२**, ५, ७ ।

[n] चतुर् हीने वारद्वयं तु लक्षणे कप्र. ।

[o] हीने कप्र. द्र. ।

[p] आनन्तर्यार्थे अव्य. वा लक्षणे वा कप्र. द्र. ।

[q] **'नु'** इति मुपा. ? (तु. पपा. संटि. नाउ. काठ **४**, १६ च) । लक्षणे कप्र. (तु. प्रति तै **१**, ८, २२, १; **२**, ५, १२, १; मै **४**, १०, १; शौ **७**, २९, १; वैतु. SIM. **'अन्व् आचरण्यात्'** इति) ।

[r] एकतरत्र तुटि. मा **४**, २८, अन्यतरत्र लक्षणे कप्र. द्र. ।

[s] गतिर् इति ब्रुवाणः SIM. द्वैस्वर्यं प्रति चोद्यो भवति । स्वार्थप्रधानम् अव्य. द्र. ।

[t] सप्तम्यर्थे कप्र. द्र. ।

[u] तृतीयार्थे वा लक्षणे वा कप्र. द्र. ।

[v] तुटि. तै **२**, ४, २, १^{२} ।

[w] तुटि. मा. **११**, १७^{४} ।

[x] कप्र. (वैतु. टि. मै **२**,७,८ **अनु-वि √क्रम्>अनुविक्रमस्व** इति स्वराङ्कणाभावादिह काठ. श्रुतिस्तत्र मै. संकेतितं कतरं वर्गमनुबद्धा स्यादित्यध्यवसातुमशक्यमित्येवं सत्यपि यदेषैव मौलिकी वाक्-प्रवृत्तिः स्यादितीव कृत्वाऽत्र गतीतरपक्ष उरीकृतस्तत्र सदसद्विविचः प्रमाणम् ।

१९^{४}[a]; **१८**, ४; ५^{२}†; १९^{३}¶[b]; **१९**, ३[c]; ५¶[d]; ९¶[e]; **२०**, १; ३[f]; ६[g];७;९^{२}; १०^{६}[h]; १२^{२}[i]; **२१**, १; ३;७; ८†[j]; ९; १४†; **२२**,१[k]; २[b]; १०; **२३**, ८^{२}[b];९; **२४**, ६[l]; **२५**,४[m]; ५; **२६**, ७[b]; ८[b]; **२७**, २; ८^{३}[n]; **२८**,१^{३}[o]; ९^{२}[p]; **२९**, ८[q];१०[b]; **३०**, १[b];२;३^{२}[b]; ७^{३}; ८[r]; ९[r]; **३१**,५[b];८^{२}¶[s]; **३२**, ५[b]; **३३**, ३^{४}[t];**३४**,७¶;१३^{५}[u]; **३५**,८^{४}†; १६^{२}¶[v];१७^{२}[w];१८; **३७**,११^{२};

---

a) तुटि. काठ **७**, १४^{३} ।

b) लक्षणे कप्र. द्र. ।

c) तुटि. मा **११**, १७^{४} ।

d) स्वार्थप्रधानम् अव्य. वा स्याल्लक्षणवचनः कप्र. वा योग्यक्रियाऽध्याहारो वेति भूयोऽपि विमृश्यं द्र. ।

e) सयोनेरग्नेश्चयनं कर्त्तव्यं तद्-द्वारा वेदिं प्रविशेद् नेद् यजमानस्य योन्या द्वारेति कृत्वा तृतीयार्थे कप्र. द्र. ।

f) तुटि. सस्थ. मै **२**,७,८; तुटि. तै **५**, ३,४,७ ।

g) तुटि. तै **६**, ५, ११, १ ।

h) आनन्तर्यार्थे कप्र. (वैतु. मै **३**,२,९ यत्र पश्चादर्थेनाऽऽख्यातार्थो नेदीय इवाऽनुरञ्जितो भवति । तेनाऽकर्मकस्याप्याऽऽख्यातस्य सकर्मकत्वाऽभिनिर्वृत्तौ सत्यां तस्य च तदीयस्य कर्मपदस्य चाऽन्तरा तदीयं कर्तृपदं श्रूयते [वैतु. प्रकृतेऽस्य कप्र. सतो व्यवधापनीव श्रुतिः]) ।

i) लक्षणे कप्र. (तु. मै **३**, २, १० यत्रत्या समानप्रकरणिका सौवरी स्थितिरिहापि विनिगमनी भवति ।

j) तु. ऋ **१०**, १४५, ६; शौ **३**, १८, ६ यदन्विहापि **'माम् अनु'** इतीव लक्षणाऽभिप्रायः संबन्धो भवति ।

k) प्रेत्य समारोह्यस्य स्वर्गस्य मानं सम्प्रति क्रियमाणस्य यज्ञस्य मानमन्वित्यर्थविवक्षाप्रामुख्यात् कप्र. द्र. (तु. तैब्रा **२**, १, २, १०, यत्रत्यः स्वरसंकेतोऽप्येतत्समर्थकतां भजति [तु. वैप२ यस्था. टि.]) । एस्थि. PW. प्रभृ. **'अनुसमारोहति'** इति त्र्युपसृष्टौ बम्भ्रम्यमाणाश्चिन्त्याः स्युः ।

l) तु. सस्थ. टि. तै **५**, ७, ९, २ ।

m) लक्षणे कप्र. । **अनु√खन्>अनुखनेत्** इत्येवं योजुकः SIM चिन्त्यः ।

n) तुटि. मै **४**, ६, ३^{३} ।

o) तुटि. मै **३**, १०, २ ।

p) तुटि. मै **४**, ७, ४^{२} ।

q) सप्तम्यर्थे कप्र. द्र. ।

r) तुटि. मै **१**, २, १५; शौ **२**, ३४, ३ ।

s) एकतरत्र तुटि. काठ **१६**, ८ । अथेह विशेषोऽप्यस्ति । तथा हि । असुरस्य लोहितं पृथिवीं साकल्येनाऽपूरयदित्येवं श्रुतिर्नाभिप्रैति येन गतिभावमनुप्रविश्य **अनोर् अर्थौ विधावनार्थमनुरञ्जयेदिति** गतिपक्षानादरः द्र. (वैतु. PW. MW.) । अन्यतरत्र तु. सस्थ. टि. मै **४**, १, १० ।

t) तुटि. तै **७**, ४, ११, ४^{३} ।

u) सप्तम्यर्थे कप्र. भवति (तु. तत्रैव श्रूयमाणं **'पूर्वपक्षेषु'** इति) ।

v) भावलक्षणस्य विषयस्य प्रामुख्येन श्रावयितुमिष्टत्वात् तस्य च यथा कप्र. न तथा ग. गमयितुं शक्यत्वात् कप्र. एव द्र. । अथ कप्र. एतदपरं लक्षणम् । तद् यथा । यत्र लक्ष्यभूतो भावश्चाऽन्यतः पृथक् क्रियापदेनोच्यते लक्षकभूतो भावश्चाऽन्यतः पृथक् क्रियापदान्तरेणोच्यते तत्र सामान्येन कप्र. अनुर् द्र. इति । तस्माद् यथा **'डिम्भस्य मरणमनु मरणं खिम्भस्य'** इत्यत्र कप्र. अनुर् भवति तथैव **'डिम्भं म्रियमाणमनु म्रियते खिम्भः'** इत्यत्राऽप्ययं कप्र. इति । यत्र तु लक्ष्यलक्षकयोर्भावयोः समानत्वे वा सजातीयत्वे वा सति लक्षकभूते भावे गम्ये सति लक्ष्यभूतो भावोऽनुपूर्वेण सकर्मकेण सता क्रियापदेनोच्यते तत्र ग. **अनुर्** भवतीति । यथा **'डिम्भमनुम्रियते खिम्भः'** इति । एवं तावत् प्रकृते कलशस्योपवानं पृथक् **शत्रन्तेन** क्रियाप्रधानेन पदेनोच्यते तदनुलक्ष्य प्रवर्त्तमानश्च प्राणोपदसनभावः पृथक् क्रियापदेनोच्यत इति कृत्वा कप्र. **अनुर्** अत्र भवतीति निर्विवादं सद् अन्यत्र च सकक्षासु वाचोयुक्तिषु निदर्शयितव्यमिति दिक् (तु. **प्राण->-णेन** इत्यत्र क **४८**,१४ टि., गपू. पृ१८० टि. D च) ।

w) प्रयास्यद्-यजमानकर्तृकाऽग्न्यन्वाधानादिक्रियाविशेषाधीनप्रीतभावाः कामास्तेन तस्यां क्रियायां कृतायामेव तं प्रति कामप्रीताः सन्तस्तेन प्रयाता सह प्रयायुर्नान्यथेत्येवं लक्षणार्थस्य प्राधान्येन विवक्षितत्वात् कप्र. **अनुर्** न गतिरितीव कृत्वा पृथक् स्वरो भवति (वैतु. काठ **९**, १७ यत्र समानकल्पया श्रुत्या तत्-सजातकर्तृकं प्रयातोऽनुप्रयाणं सूचितं भवति । अयं तु तत्र विशेषो भवति यथा प्रयाता क्रियमाणायाः क्रियाया इन्द्राग्नीदेवताकत्वं न तु प्रयात आत्मीयं कमपि विशेषमुपजीव्याऽकामानामपि सतां सजातानां तदनुप्रयाणे प्रवृत्तिः संजायत इति कृत्वा प्रयात्रनुप्रयातृमध्ये लक्ष्यलक्षकसंबन्धाभावे सति लक्षणार्थस्य वाच्यत्वेनाऽप्राप्तत्वाद् न कप्र. **अनुरिति**) ।

३८, २; १२^{२}[a]; **३९**, १०^{५}; **४०**, ८†; ९; १३; †**४६**, १; ३^{४}; क **१**, ६; १९[b]; **२**, ११^{३}[c]; १३^{२}; **३**, ३†; ९†; ११[d]; **४**, ७¶; ८†; †**५**, ३; ४; **६**, ३^{४}[e]; **७**, २; ३¶[a]; ४^{२}¶[a]; **८**, ३; ४^{२}; ६; ७[a]; ९^{४};†; **२५**, ६^{२}†; **२८**, ४; ५^{२}†; **२९**, ७^{२}¶[a]; **३०**, १[f]; ३¶; ¶**३१**, ३[f]; ५$; ८$[g]; ९[h]; १०^{२}[i]; ११^{२}[a]; १२^{६}; १४; १६; १८; **३५**, ४; ¶**३६**, ३[a]; ६; **३७**, ५^{२}[a]; ७[j]; ¶**३९**, १[a]; २[a]; **४१**, ५; ६¶[k]; **४२**, २¶[l]; **४४**, १¶[m]; **४६**, ३[a]; ४; ५; ६^{२}; **४७**, ५[j]; ८^{२}[n]; ¶**४८**, १५^{२}[o]; १६; †कौ **१**, ५१; १६५; २२९; ३६७; ४०९; ४१०; ४१२; ४१३; ४३६; ४६५[p]; **२**, ८७; ८८; १०५; २०१; ३३३; ३५५; ३५६; ३५७; ५१७; ७७५; ९१९; ९२७; ९५६; १०४४; ११५५; ११६३[p]; १२०४^{२}; **३**, ४, २; ५, ८; ११; $**४**, १; †जै **१**, ५, ७; १८, १; २४, ५; ३८, ८; ४०, १; २; ४; ५; ४२, १०; ४८, १०[p]; **२**, ३, ३; ७, २; **३**, ९, १; ३; ११, १; १८, ८; २८, ५; २९, १२; १३; १४; ४०, १३; **४**, २, ८; १६, २; २०, २; २१, ५; २२, १०; शौ **१**, २२, १[q]; **२**, ३४, ३[r]; **३**, ७, २[s]; ९, ६[t]; १८, ६†; **४**, १५, ४[u]; ७[u]; ८[v]; ९; १२; २१, ४†; **५**, १, ३; २७, ७; **६**, १७, १–४[w]; २६, २[x]; २९, ३; ३९, १†; ६९, २; ७२, १; ९०, २; ९७, ३^{२}[y]; १०५, १–३; १२१, ४[z];

---

[a]) लक्षणे कप्र. द्र. ।

[b]) तुटि. मा **४**, २८ ।

[c]) तुटि. तै **१**, ३, ७, १^{२} ।

[d]) तुटि. काठ **४**, १३ ।

[e]) तुटि. मा **१७**, ६६; काठ **७**, १४^{३} ।

[f]) तुटि. मा **११**, १७^{४} ।

[g]) तुटि. तै **६**, ५, ११, १ ।

[h]) तुटि. काठ **१९**, ९ ।

[i]) तुटि. तै **५**, २, ९, ५ ।

[j]) तुटि. तै **५**, ७, ९, २ ।

[k]) तुटि. काठ **२६**, ८ ।

[l]) तुटि. मै **३**, १०, २ ।

[m]) तुटि. तै **३**, ४, ८, ३ ।

[n]) तुटि. मै **४**, १, १० ।

[o]) तुटि. काठ **३५**, १७ ।

[p]) तुटि. तै **४**, ४, ४, ८ ।

[q]) तृतीयार्थे वा लक्षणे वा कप्र. । '**अनु**···**उदयताम्**' इति योगं पश्यन्तौ PW. MW. उपेक्ष्यौ ।

[r]) '**अन्वैक्षन्त**' इत्येवं क्रिप. अन्वयाद् '**दीध्यानाः**' इत्यनेन तद्गतस्याऽनु-पदार्थस्य पारम्परिकसंबन्धस्य सिद्धत्वे सत्यपि यदन्यैर् '**अनुदीध्यानाः**' इतीव संबन्धोऽपरम् **अनु** कप्र. सन्तं '**बध्यमानम्**' इत्यनेन शानजन्तेन नापू. अन्वितं व्यर्थं गतीकारमिष्यते (तु. सा. WI. च) तन्नाऽऽद्रियेत । आर्थस्य संबन्धस्योक्तया दिशा सुसंगतत्वे सत्यप्यनुपपन्नद्वैस्वर्यप्रसङ्गादिति दिक् ।

[s]) तृतीयार्थे कप्र. (तु. नापू. मन्त्रे '**स क्षेत्रियं विषाणया**' इति) । एस्थि. '**अनु**···**अक्रमीत्**' इति योगपरः WI. चिन्त्यः ।

[t]) सप्तम्यर्थे कप्र. द्र. ।

[u]) लक्षणे कप्र. (तु. W.; वैतु. सा. यस्य अनुगतम् इति भाष्यमव्ययपरतया नेयमुतोपसर्गतयेति विमर्शमपेक्षेत) ।

[v]) कप्र. अयमिह भवति । अत्र पूर्वार्धीयं प्रत्याशं विद्योतनस्य च प्रतिदिशं वातस्य वानस्य चाऽऽशंसनं ज्ञापकं स्यात् ।

[w]) लक्षणे कप्र. । आनन्तर्य इति W. । '**अनुसूतुम्**' ('**-त्रम्**' इति पाण्डु.) इत्याकारकमेकं पदं सा. पपाठ ।

[x]) सा. '**अनुव्यावर्तने**' इत्येकं पदं पठंश्चिन्त्यः । तृतीयार्थे कप्र. । अन्येन पथा पाप्माऽनुपद्यतामिति यावत् । अथवाऽनर्थिका गतेर्द्विरुक्तिः । '**अनुपद्यताम्**' इति क्रियायामेव विवक्षापर्यवसानात् ।

[y]) कप्र. भवति (तु. ऋ **१०**, १०३, ६ इत्यत्रत्यं टि., सस्थ. च टि., '**वीरयध्वम्**', '**संरभध्वम्**', '**हर्षध्वम्**' इत्यत्र च यस्था. टि.) ।

[z]) नापूटिदि. निवासक्रियाया अपेक्षया प्रकृतद्वितीयाऽन्तपदवाच्यस्य तदभिव्याप्य तदधिकरणतया समर्पणे श्रुतिस्वारस्यप्रतीतिस्तत्साधनभूतः कप्र. द्र. । गपूदि. गतिपद्यः MW. मिथ्याप्रत्ययं प्रति चोद्यः ।

१२२, १[a]; २[b]; **७**, ४४, १; ५९, १; ८७, ४^{४}[c]; १०२, ४[d]; **८**[e], ९, ८; १२; १३^{२}; १५^{२}; १६; १७; ९, १, १९; २४^{३}; ४, २४; **१०**, २, २२; २३[f]; ४, ६[g]; ५, २५–३५[h]; ३७[i]; ४५[j]; १०, ७$^{?}$[k]; **११**, २, १०[j]; ७, १२; १०, ११[l]; १९–२२; २४; २७[h]; **१२**, २, २१†; ३, १७[m]; **१३**, १, १०[n]; २, १४[o]; १८†: २१†; ४०[n]; ३, १[p]; २०[m]; ६, ५[g]; **१४**, १, ६०[g]; २, १०†; ७४; **१५**[n], २, १; ९; १५; २१; ६, १; ४; ७; १०; १३; १६; १९; २२^{२}; २४; ९, १; १४, १; ३; ५; ६; ९; ११; १३; १५; १७; १९; २१; २३; **१८**, १, २०†; २७^{४}[c]; ५०†; २, ९; १३†; ४, २८^{४}†; ७५[n]; ७६[n]; ८६[n]; ८७[n]; **१९**, ६, २†; १३, ६^{२}†; २६, ३[n]; ४९, २[q]; ६[n]; ५८, ३^{२}[n]; †**२०**, ४, २[r]; १५, २[s]; ४०, ३; ४२, २; ४७, १५; १८; ६९, १२; ९२, १५: १०९, १–३; ११६, २; १३१, २$; १३९, २; पै **१**, २८, १; ५९, ४[t]; ६३, १[j]; ९२, १[u]; १०७, २†; **२**, ३३, २[v]; ६०, २[w]; ८६, १–६; **३**, २, २[x]; ७, १; १५, ५[y]; २८, ४; २९, १; ३२, ४[z];

---

[a]) तृतीयार्थे कप्र. (वैतु. सा. PW. प्रभृ. '**अ॒नु-सं॒तरेम**' इति योगं वदन्तः । इह तु. नाउ. मन्त्रे कप्र. श्रूयमाणस्तथैव सा. व्याख्यायमानश्च) ।

[b]) तृतीयार्थे कप्र. (तु. शौ **६**, १२२, १ सौवरी स्थितिस्तत्र चेह च यनि. विनिगमिका स्यात् । एस्थि. तत्र ग. इतीह च कप्र. [सोऽपि च लक्षणार्थीयः] इति सा. तद्व्यत्यासेन तत्र कप्र. इतीह च ग. इति W. च व्याहतवाचाविव स्यातामिति दिक् [तु. तैआ. **२**,७,२ यत्रत्ये पाभे. स्वरो भूयोऽपीह यनि. एव पुष्टिं विदध्यात्]) ।

[c]) तुटि. मा **११**, १७^{४} ।

[d]) तु. सस्थ. टि. तै **१**, ४, ४४, ३ ।

[e]) तै **४**, ३, ११, १–२ सस्थ. टि. द्र. ।

[f]) द्वितीयान्तं स्वविषयीभूतमधिकरणार्थकतयाऽऽपादयन् कप्र. द्र. । **पुरुष-**कर्तृकस्य निवासस्य देवाधिकरणकतायां तन्मध्यगतत्वपर्यवसानरूपायां प्रकृतस्य प्रश्नस्योत्तरस्य च स्वारस्यप्रतीतेः । एस्थि. उत्तरेण √**२क्षि** इत्यस्य तिङ्वृत्तेन यद् MW. गतित्वानुसंबन्धमाह तच्चिन्त्यम् । द्वितीयान्तपदवाच्यकर्तृकनिवासस्याऽपेक्षया तदनुगतस्य वा तत्पश्चाद्भवस्य वा पुरुषकर्तृकस्य निवासस्य समर्पणे प्रकृतप्रश्नोत्तरयोः स्वारस्याऽभावादिति दिक् ।

[g]) पश्चादर्थे कप्र. द्र. ।

[h]) तु. सस्थ. टि. मा **१२**, ५ ।

[i]) 'दक्षिणां दिशमनुलक्ष्य या सूर्यस्याऽऽवृत् तामहमन्वावर्त्ते' इत्यन्वयाल्लक्षणे कप्र. द्र. ।

[j]) सप्तम्यर्थे कप्र. द्र. ।

[k]) प्रवेशनक्रियायाः कर्मणोऽनिर्देशात् साकाङ्क्षाऽन्वयं रचयन् W. चिन्त्यः । वशायाः प्राधान्येन प्रतिष्ठापनेऽभिप्रायवत्यां श्रुत्यामभ्युपगतायां संभवे सत्यपि गतित्वे क्रियायाः प्राधान्यविशेषाऽऽधानेन कर्मणो भूयस्तरां गौणीभावापत्तेस्तत्प्राधान्यविशिष्टप्रतीत्यर्थं तदधिकरणताऽऽपत्तौ विवक्षितायां सत्यां सप्तम्यर्थे ऽनुः कप्र. द्र. ।

[l]) गतिरिति सा. अभिप्रयन् प्रतीयते । तथा तु सति द्वैस्वर्यापत्तिः स्यादित्यसौ चोद्यो भवेत् । शरीरस्य प्राधान्येनोपस्थापनेन श्रुतिसफलतायामभ्युपगतायां लक्षणे कप्र. (न तु पश्चादर्थे तु. W., नापूटि. च) ।

[m]) तृतीयार्थे कप्र. ।

[n]) लक्षणे कप्र. द्र. ।

[o]) मा ८, ४० सस्थ. टि. द्र. ।

[p]) '**अ॒नु-वि-चा॒कशीति**' इति योगं द्व्युपसृष्टं पश्यन्तौ PW. MW. उपेक्ष्यौ । **अनो**र्लक्षणे कप्र. सतः संगतत्वात् ।

[q]) तु. पाण्डु. टि. W. टि. च । वैकृतभूयिष्ठे पाठेऽनुः कप्र. (**अ॒नु मा**) इति सम्भाव्यते ।

[r]) आधारलक्षणः कप्र. । एवं किल सा. इहाभिप्रयन् संभाव्यते । बाह्वृचे तु (तु. ऋ ८, १७, ५) गतितामेवाऽस्यासाविच्छति ।

[s]) द्वितीयायां प्राप्तायां '**ते**' इति ष. छान्दसी वक्तव्या भवति ।

[t]) वातस्य प्लु(प्र)वानम् **अनु** प्रवानमनुलक्ष्येत्यर्थं इति लक्षणे कप्र. । एवं द्वितीयोऽप्य् **अनुः** स्यात् तथैव मध्ये च '**अथ**' इति **शोधः** संभाव्यते ।

[u]) पूर्वमनु, आनुपूर्व्येणेत्यर्थः ।

[v]) लक्षणार्थे कप्र. ।

[w]) शौ **६**, १२२, १ सस्थ. टि. द्र. ।

[x]) शौ **३**, ७, २ सस्थ. टि. द्र. ।

[y]) सप्तम्यर्थे कप्र. (तु.सस्थ.टि. **मध्यामध्यम->मे**) ।

[z]) शौ **२**, ३४, ३ टि. द्र.

४, १७, ५†; २०, ७[a]; २४, २[b]; ५, ६, २; ७, ६[c]; ९; ११; २१, ६; ४०, २^{२}[d]; **६**, १६, ४†; २२, १९; **७**, ४, ६^{२};†; ८, १, ४[e]; १४, ३†; **९**, १, ६; ५, २[f]‡; **११**, ७, ९; **१३**, ६, १†; **१४**, ४, ६[g]; **१५**, १०, ६†; १२, १०[h]; २३, ८; **१६**, १५, ६[i]; १८, ८[j]; १९, २[j]; ३^{२}[j]; ५^{२}[j]; ६[j]; ७[j]; ३३, ९; ३४, ९; १०^{२}; ५१, ५[k]; ६१, १[l]; ७२, ४^{२}?[m]; १०७, ७^{२}[n]; १३१, १^{२}–१०^{२}[o]; १४७, ७[p]; ८[p]; १४८, ३; १४९, १[p]; १५४, २[q].

अनु√- मा **५**, ९[r]; **३७**, १८[r]; का **५**, ३, २[r]; **३७**, ३, ५; शौ **१८**, ३, ४०[s].

¶**अनु-क,का**[t]– -कम् मै **४**, ३, ८; –काः मै **४**, ३, ७^{२}; ७, ८; –कान् तै **२**, २, ८, १; ५, १०, १; मै **४**, ३, ७; –काम् मै **२**, १, ९; ५, ८; **३**, ३, १०; **४**, ७, ८.

अनु√कम् > कामि

१**अनु-कामु**[u]– -मः मा **१८**, ८; का **१९**, ३, ४; तै **४**, ७, ३, १; मै **२**, ११, ३; काठ **१८**, ८; क **२८**, ८.

†**अनुकाम-कृत्**[v]– -कृत् ऋ **९**, ११, ७; कौ **२**, ७९७.

२**अनु-कामु**[w]– -मम् ऋ **१**, १७, ३; **८**, ४८, ८; **९**, ११३, ९.

३**अनु-कामु**[x]– -मा ऋ **८**, ९२, १३.

अनु-कामि(न्→)नी[y]– -नी तै **३**, ५, ६, १.

अनु√काश्

अनु,>नू-काशु[z]– -शम् तै **५**, ४, १, ३; ७, १२, १; काठ **५३**, २; –शेन मा **२५**, २; का **२७**, २, १; मै **३**, १५, २. [°श- श्वेत°]

अनु√कि, अनु···**चिकिते** काठ **३७**, ९; **अनु**···**चिकिताम्** शौ **६**, ५३, १.

---

[a]) तुटि. काठ **२१**, ८।

[b]) पाठस्य व्यवस्थाऽभावाद् अविस्पष्टान्वयोऽनुः।

[c]) तुटि. शौ **४**, १५, ७; ८।

[d]) लक्षणे कप्र. (तु. 'मदम् इष्यमाणः' इति पूर्वस्यामृचि सकृत्ता श्रुतिः)।

[e]) संदिग्धः पाठः। 'नु' इत्यस्य स्थाने 'अनु' इत्युपात्ताऽकारः संभाव्यते।

[f]) पश्चात् पूरितः पाठः (तु. ऋ **१०**, ९०, ४)। किमित्यभि-स्थानेऽनुरनुपूरित इति चिन्त्यम्।

[g]) लक्षणार्थे कप्र.।

[h]) सन्दिग्धान्वयः पाठः।

[i]) पश्चादर्थे कप्र. द्र.।

[j]) तै **४**, ३, ११, १ इत्यत्र सस्थ. टि. द्र.।

[k]) शौ **६**, १२२, १ सस्थ. टि. द्र.।

[l]) तुटि. शौ **१०**, २, २२; २३।

[m]) '**सूर्यस्याऽग्नेश्चन्द्रमसोऽनु भूतिं वातस्याऽऽभूतिम्** (?अत्वाभ>) **अनु त्वम् आऽभवः**' इत्येवं शोधसुपठमिदं बहुविकृतं त्रैष्टुभमर्धर्चं द्र.। एस्थि. कोष्ठगोऽत्यन्तदुष्पठः सुपा. सं. शोध-व्यृद्धिमेव विज्ञापयत्।

[n]) तुटि. शौ **१०**, १०, ७^{२}।

[o]) तृतीयार्थे कप्र.। ष. अभिसंबद्धः द्र.। मूको. शोधसापेक्षो भवति (तु. सस्थ. टि. अप√क्रम्>अपक्राम)।

[p]) तु. सस्थ. टि. शौ **११**, ७, १२।

[q]) सप्तम्यर्थे कप्र. द्र.।

[r]) तु. उ. म. च यावनु √हृ इहाऽऽक्षेप्यो भवति। वस्तुतस्तु 'त्वया (=अग्निना द्वार्भूतेन)' इति तृ. कप्र. एव स्यात्।

[s]) 'अनु√इ>अन्वैत्' इतीवेह संभाव्यते। सा. तु √रुह् इतीममेव पूर्ववद् आचिक्षिप्सति (तु. पाण्डु. टि., w. टि. च)।

[t]) 'अनुक-' (पा **५**, २, ७४) इति कन् प्र.। नित्-स्वरः (पा **६**, १, १९७)।

[u]) गस. उप. भावे घञि थाथादि-स्वरः (पा **६**, २, १४४)।

[v]) कारकोपपदे √कृ+कर्तरि क्विप्। कृद्-उपप्रस्व. (पा **६**, २, १३९)।

[w]) अस. सामान्यः समास-स्वरः (विस्तरार्थं तु. सा. ऋ **१**, १७, ३)। अदन्तस्य अस. रूपतो '**नाव्ययीभावात्**' (पा **२**, ४, ८३) इति कृत्वा विभक्त्यर्हतया निर्देशः।

[x]) प्रास. '**अनोः**'(पा **६**, २, १८९) इत्य् अन्यप्राधान्ये सत्युपसर्जनतां गतस्य उप. अन्तोदात्तः द्र.। यत्तु PW. प्रभृ. नापू. अस्मात् प्राति. समासतो न विविञ्च्युस्तदसत्। अर्थतोऽन्वये सूक्ष्मभेदोपगमादिति दिक् (तु. वैश.)।

[y]) गस. उप. णिनिः प्र.। कृद्-उपप्रस्व. (पा **६**, २, १३९)। ततो ङीपः पित्त्वान् निघाते स्वरेऽविशेषः।

[z]) भावे घञि थाथादि-स्वरः (पा **६**, २, १४४)। मै. विरहय्य सर्वत्रोपसर्गस्य दीर्घः (पा **६**, ३, १२२)।

अनु-कूल[a]– -लम् शौ ५, १४, १३; पै २,७१,५. [°ल- विश्वमनस्°, विष्णुमनस्°]

अनु√कृ

अनु-कर[b]– -रेण शौ १२, २, २.

¶अनु-कृति[c]– -तिम् काठ १९, १२; २७, १; क ३१, २; ४२, १. [°ति- एतद्°]

अनु-कृत्य- अन्°

अनु√१कृप्>क्लप्, अनुकल्पयाति पै ५, १५, ४.

अनु√२कृप्, अनु···कृपते[d] ऋ १, ११३, १०; अनु···अकृपेताम् ऋ ८, ७६, ११.

अनु√कॄ, अनुकिरामि शौ १८, ३, ६९; ४, २६; ४३.

?अनुक्चूता[e] पै १६, ७३, ४.

अनु(न्-उ)क्थ[f]– -क्थः काठ ३०,७¶; –क्थाः ऋ ५, २, ३.

†अनु√क्रन्द्, अनुचक्रदे ऋ ८, ३, १०; शौ २०, ९, ४; ४९, ७.

अनु√क्रम्→क्राम्, अनुक्रामाम मा ३८, १९; का ३८, ५, २; अनुक्रामेम ऋ ५, ५३, ११.

अनु···अक्रमीत् ऋ ९, ११४, १; †अनु···अक्रमुः ऋ ९,२३, २; कौ १, ५०२; जै १, ५२, ६.

अनु√क्रुश्, अनुक्रोशन्ति ऋ ४, ३८, ५.

अनु√क्शा[g]

¶१अनु-क्शाति[c]– -क्शात्यै मै ३, १,१;३; ९,४; ४,८,३; काठ ७, ७; ८; १०; १९, २; ३; २०, ६; ११; २१, ३; २२,७. [°ति- अन्°]

¶२अनु-क्शाति[h]– -क्शात्यै मै ३, १, ४.

अनु-क्शातृ[i]– -क्शात्रे काठ २६, १२.

¶अनु-क्शाय[j] मै १, ८, ९.

अनु√क्षद्

अनु-क्षत्तृ[i]– -त्तारम् मा ३०, ११; १३; का ३४, २, ३; ५.

[m]) दृष्टिपथादवभ्रंशादिव सा. अनोर्मोष्यमिह नाह।

?**अनुरत्त**[a] पै ४, २७, १.

अनु√रभ्, अ॒नु···रभस्व शौ ९, ५, २.

अनु√रम्, अनुरमन्तु पै ८, १८, ३.

†**अनु√राज्**, अ॒नुराजति ऋ २, ४३, १; ९, ९६, १८; कौ २, ५२६; जै ३, ४१, २.

अनु√राध्, अ॒नुराध्यास्म शौ १९, १५, २; पै ३, ३५, २.

१अनु,>नू-राध॒, धा॒[b]- -धा शौ १९, ७, ३; -धाः तै ४, ४, १०, २; मै २, १३, २०[c]; काठ ८, १५¶; ३९, १३; क ८, ३¶; -¶धासु मै १, ७, २[d]; क ८, ३; -¶धेषु काठ ८, १५.

२अ(नु>)नू-राध॒[e]- -धम् शौ १९, १५, २; पै ३, ३५, २.

अनु√री, अ॒नुरीयते ऋ १, ८५, ३.

अनु√रुध्, †अ॒नुरुध्यसे ऋ ८, ४३, ९; मा १२, ३६; का १३, ३, ७; तै ४, २, ३, ३; ११, ३; मै २, ७, १०; काठ १६, १०; क २५, १.

अनु,>नू-रु॒ध्[f]- -रुत् ऋ ३, ५५, ५; -रुधम् मा ३०, ९; का ३४, २, १.

अनु-रो॒धन[g]- -नम् शौ ६, १०२, ३.

अनु√रुह्, अ॒नुरोहते ऋ [२, ५, ४; ८, १३, ६]; अनुरोहति काठ ३८, १३‡[h]; अ॒न्वरोहत् शौ १८, ३, ४०; ¶अन्वरोहन् काठ ३७, १४; अ॒न्वरोहम् ऋ १०, १३, ३.

अ॒नु··· अ॒रुहत् ऋ १, १४१, ५.

ϕअनु-रू(ढ>)ढा- -ढाः पै ८, १६, १.

अनु,>नू-रोह॒[i]- -हः तै ४, ४, १, ३; काठ १७, ७; ३७, १७; क २६, ६; -हम्, -हाय, -हेण मै २, ८, ८.

अ॒नु-रूप[j]- -पः मा १९, २४; का २१, २, १३; -¶पम् मै ३, १, ४^{२}; काठ १९, ३; क ३०, १; -¶पाः तै ५, १, २, ६; ३, १; काठ १९, ३^{२}; क ३०, १^{२}; -¶पाभ्याम् तै ५, १, २, ६; ३, १; काठ १९, ३; क ३०, १; -पाय तै ७, ३, १८, १; काठ ४३, ८; -¶पेण मै ३, १, ६; ४, १; ७.

¶अनुरूप-त्व॒[k]- -त्वाय तै ५, ५, १, २; मै ३, ४, ७.

?**अनुरोतिः**[l] पै ९, ३, १३.

¶**अनु√लम्ब्**, अ॒न्वलम्बत मै ३, ६, ७.

अनु-लोम॒[m]- -¶मम् तै ३, ५, १, ३^{२}; ४; ६, १, १, ५; -मौ खि २, १२, १.

अनु(न्-उ)त्वण॒[n]- -णम् ऋ १०, ५३, ६; तै ३, ४, २, २†; ३, ६¶; काठ १३, ११†; १२^{२}¶; -णेन ऋ ८, २५, ९; खि ५, ७, ४, ७.

अनु√वच्, ¶अ॒नूच्यते मै ३, १०, १; ¶अनूच्यु॒ते तै २, ५, ८, ४; काठ १०, ५; ११; ¶अ॒नूच्येते तै २, ५, २, ५; ¶अनूच्यन्ते काठ ९, १; १२, ४; क ८, ४.

¶अनु-वक्ष्य॒त्[o]- -क्ष्यन् तै १, ६, १०, ४.

---

[a]) अ॒नु । र॒न्+ते॒(>*रंस्त इति वा रँन्त इति वा) इत्यस्य यनि. वर्णाश्लेषमात्रम् । एवं तावत् त्रिपदात्मकः **शोधः** द्र. (यतु. र॒न्-) ।

[b]) 'अनु(गत-) राधाम्' इति कृत्वा प्रास. । '**अनोः**' (पा ६, २, १८९) इत्यन्तोदात्तः । इहापि नाउ. सरूपे इव उप. धात्वर्थ एव प्रधानः स्यादित्यपि श्रुत्या संकेत्यते (तु. मै १, ७, २; काठ ८, १५)। नक्षत्रीयं वैसं. स्त्री. च न. च (तु. **वि॒शाखं न॒क्षत्रम्** मै २, १३, २०; काठ ३९, १३) भवति । शौ. एकवच्च पूप. अदीर्घवच्च । अन्यत्र सर्वत्र (यनि. याजुषीषु शाखासु) बहुवच्च पूप. दीर्घवच्च इत्येवं निगमा भवन्तीति विवेकः ।

[c]) तु. संटि. यदनु पपा. एकवदिव श्रावयितुमिष्टं भवति ।

[d]) अ॒नु° इति यद् मुपा. पूप. दीर्घान्तं न प्रादर्शि, तच् चिन्त्यम् । मूको. दीर्घान्तसाद्यस्यापि सद्भावात् सकत्त-श्रुत्यन्तर-संवादार्थं दीर्घान्तत्वस्याऽपेक्षितत्वाच्च ।

[e]) भावे घञ् प्र. । **थाथादि-स्वरः** (पा ६, २, १४४)। पूप. दीर्घत्वम् (पा ६, ३, १२२)। वा. क्रिवि. (वैतु. सा. य इन्द्रस्य वि. इति कृत्वा कर्मणि प्र. इति भाषते)।

[f]) गस. क्विपि कृत्-प्रस्व. (पा ६, २, १३९)। दाशतय्यां पूप. दीर्घत्वम् उसं. (पा ६, ३, ११६)।

[g]) सस्व. नापू. द्र. । उप. भावे **ल्युट्** ।

[h]) नापू. रू. बाह्वृचः पाभे. द्र. ।

[i]) सस्व. कृते तुटि. १अनु,>**नू-राध॒-**। मै. काठ. च पूप. दीर्घत्वम् **उसं.** (पा ६, ३, १२२)।

[j]) प्रास. अव्यय-पूपप्रस्व. (पा ६, २, २)। उप. यद्र.। '**-पम्**' इति द्वि१ सद् वा. क्रिवि. द्र. ।

[k]) भावे त्वः प्रत्ययस्तत्स्वरश्च ।

[l]) **=अनराति-** (तु. नापूपू. मन्त्रेषु) इति **शोधः**। मुपा. प्रामादिकः द्र. ।

[m]) प्रास. समासान्तः अच् । चित्-स्वरः (पा ५, ४, ७५; ६, १, १६३) । सामान्येन वि. सद् यत्र सामर्थ्यात् क्रिवि. भवति तत्र रू. द्वि१ भवतीति यथायथं द्र. ।

[n]) बस. अन्तोदात्तः (पा ६, २, १७२)। उप. यद्र. ।

[o]) गस. कृत्-प्रस्व. (पा ६, २, १३९)। उप. लृटः **शतृ-** प्र. (पा ३, ३, १४)।

अनु-वाक[a]- -के पै २, २०, ३; -कैः शौ १९, २२, १. [°वाक- प्रथम°, प्रातर्°, याज्या°]

¶अनु-वा (क्य>) क्या[b]- -क्या मै २, १, ८; काठ १०, १०; ११^{२}; १२, ५^{२}; -क्याः मै २, २, ८; ३, ७, २^{२}; ८, १^{२}; काठ १०, १०^{२}; ११, १०; २३, ९^{२}; क ३६, ६^{२}; -क्याम् काठ ८, १०; क ७, ६; -क्यायाः मै २, ३, ७; काठ १२, ५; -क्यायै मै १, ४, ११; काठ १८, १९; क २९, ७; -क्ये काठ ३६, १३. [°क्य,क्या- अरण्ये°, पुरस्°, याज्या°]

¶अनु-वाच्[c]- -वाचः मै ४, ५, ३.

अनू(नु-उ)क्त[d]- -क्तम् खि ४,८,४; -¶क्ते काठ २८, ३; क ४४, ३. [°क्त- अभि°]

अनू(नु-ऊ)चान[e]- -नः ऋ ८, ५८, १; खि ३, १८, २; -नम् मै १, ९, ७¶.

¶१अनू(नु-उ)च्य[f] तै २, १, २, ८; ५, ७, ४; ११, ३; ६, २, २^{२}; १०, ४; ३, ४, १०, ४; ५, ३, ३, १^{२}; ६, ३, ७, १; मै १, ८, ३; २, १, ९^{२}; २, ८^{२}; ३, ७^{६}; ३, ६, ८^{४}; ९, २; काठ ९, १६; १०, १०^{३}; ११^{२}; १२, ५^{६}; २०, १३; क ३१, १५.

¶२अनू(नु-उ)च्य,च्या[g]- -च्यम् तै २, ५, ११, १; -च्या मै ३, ९, ५[h]; -च्यानि तै २, ४, ११, १.

¶अनू(नु-उ)च्यमान,ना[i]- -नासु मै ३, ८, ७; काठ ९, १४; -ने तै २, २, ५, ७; ११, १; काठ १०, ११.

अनु√वञ्च्

अनु-वञ्चत्[j]- -ञ्चते तै ७, ४, २२, १; काठ ४५, १.

अनु-वत्सर[k]- -रः काठ ४०, ६; -राय काठ १३, १५; -रे काठ ३९, ६.

अनुवत्सरी(य>)या[l]- -या काठ १३, १५.

अनु√वद्, अनुवदति ऋ २, १३, ३; ¶मै १, ११, ६; ¶काठ १४, ६; १९, ३; ४; ¶क ३०, १; २; अनु…वदन्तु पै ५, ७, ११.

अनु-वन[m]- -नम् खि ३, १५, १०.

अनु√वन्द्, अनु…ववन्द मै २, ७, १०‡[n].

अनु√वप्, अनुवपते शौ १२, २, ५०.

अनूप्यन्ते पै १६, १११, १४.

अनु-वर्तयत्-, अनु-वर्ति-, अनु-वर्त्मन्- अनु√वृत् द्र.

अनु-वर्षत्- अनु√वृष् द्र.

†अनु√वश्, अनुवष्टि° ऋ १,१२७, १; मा १५, ४७; का १६, ५, २९; काठ २६, ११; ३९, १५; शौ २०, ६७, ३.

¶अनु-वषट्√कृ, अनुवषट्करोति[p], अनुवषट्कुर्यात् तै ६, ५, ६, ५; ७,१; ८, ५^{२}; काठ २७, ५; क ४२, ५.

अनु√२वस्, अनुवस्ते शौ ११, ६, १०; १३,३,११; †अनुवस्ताम् ऋ ६, ७५, १८; खि ३, ११,१;

---

[a]) सस्व. 'अनु,>नू-राध' इत्यत्र द्र. । पुंस्त्वं कुत्वं च (पा २,४,२९; ७, ३, ५२) । चिन्त्यत्वेनाऽङ्कितः '?अगु-वाक-' इति मुपा. यनि. शोधमपेक्षते। तुटि. '?अगुवाक-'।

[b]) गस. कृत्-प्रस्व. (पा ६, २, १३९) । उप. ण्यति तित्-स्वरः (पा ६,१,१८५) ।

[c]) गस. क्विबन्त-कृत्-प्रस्व. (पावा ३, २, १७८; पा ६, २, १३९) ।

[d]) कर्मणि क्तेऽनन्तरगतिस्वरः (पा ६, २, ४९) ।

[e]) गस. कानजन्त-कृत्-प्रस्व. (पा ३,२,१०६; ६,१, १६३; २,१३९)। यत्तु उप. <√उच् इतीवापि MW. आह तन्मृग्यनिगमतया सम्भावनामात्रत्वं भजेत् ।

[f]) गस.ल्यबन्त-कृत् प्रस्व. (पा ६,१,१९३;२,१३९)।

[g]) गस. क्यबन्त-कृत्-प्रस्व. (पा ६, २, १३९) ।

[h]) मुपा. स्वरभ्रंशः स्यादिति कृत्वा 'नानूच्या' इति स्वरद्वयवत्तया शोधः द्र. ।

[i]) कर्मणि शानचो निघाते यक्-स्वरः नाउटिदि. द्र.।

[j]) गस शत्रन्त-कृत्-प्रस्व. (पा ६,१,१८६;२,१३९)।

[k]) प्रास.'अनोः'(पा६,२,१८९)इत्यन्तोदात्तः। उप.यद्र.।

[l]) छ→ईयः प्रत्ययः (पा ५,१,९१) ।

[m]) प्रास.पूपप्रस्व. (पा ६,२,२)। तु.उद्-वन-,सु-वन-।

[n]) 'अनु…गृणाति' इति ऋ (१, १४७, २) पाभे. ।

[o]) √वश् इत्यस्याऽकर्मकमिव वृत्तं श्रावयितुमिच्छू PW. MW. च कप्र. अनुऽ इति प्रतिपेदानौ विमृश्यौ द्र.।

[p]) अत्र यत् पपा. 'नानु°' इत्यत्र न इति च अनु° इति चोदात्तयोरेकादेश इव प्रादर्शि । तन्न । उदात्तानुदात्तयो-रेकादेशेऽपि परिणामेऽविशेषात् । अन्यथैकपद्ये स्वरद्वय-मापद्येत । उक्तप्रकारेण च स्वरलक्षणस्य संगतिसंभवे-ऽप्यैकपद्ये मुपा. अलक्षितमपि स्वरद्वयमभ्युपेयम्, एत-ज्जातीयेभ्यो निदर्शनेभ्यश्च तत् समर्थनीयमित्याग्रहश्चेत्-र्ह्यसावन्याय्यः साध्यसमाव्यभिचरितश्च (तु. पपा. तै ६,५,८,५ यत्र 'यन्नानुवषट्कुर्यात्' इत्यस्य 'यत् । न । अनु°' इत्येवमनोरनुदात्तत्वविशिष्टः पदविभागो भवति) ।

मा १७, ४९; का १८, ४, १७; कौ २, १२२०; शौ ७, ११८, १.

अनु√वह्, †अनूहिरे ऋ १०,१५,८; मा १९, ५१.

¶अनु-वाह[a]– -हः मै १, ५, १३.

अनु√वा, †अनुवाति ऋ [१, १४८, ४[b]; ७, ३, २]; ४, ४०, ३; मा ९,१५; १५, ६२[c]; का १०, ३, ८; १६, ७, ५; तै १, ७, ८, ३; ४, ४, ३, ३; मै १, ११, २; २,८, १४; काठ १२,१३^{२}¶; १३, १४; १७, १०; क २६, ९; कौ २, ५७०, जै ३, ४६, ५; शौ १२, १, ५१$; पै १२, ६, १$; अनुवाति ऋ ४, ७, १०; १०, १४२,४; ¶अनुवातु तै ५, ५, ७, ३^{३}; ४^{२}.

?अनु-वृ[d]– -वाय मै २, ८, ८.

अनु-वा[e]– -वा तै ३, ५, २, ३; ४, ४, १, १; ५, ३, ६, १¶; काठ १७, ७; ३७, १७[f]; क २६, ६;

अनु-वाक्-, अनु-वाक्य॑-, अनु-वाच्- अनु√वच् द्र.

अनु-वि√क्रम्, अनुविक्रमते शौ ९, ७, १२; अनुविक्रमस्व[g] मै २, ७, ८^{४}.

अनु-वि√चल्, अनुव्य॑(वि-अ)चलत् शौ १५, १४, १; ३; ५; ७; ९; ११; १३; १५; १७; १९; २१; २३; अनुव्य॑चलन् शौ १५, २, २; १०; १६; २२; ६, २; ५; ८; ११; १४; १७; २०; २५; ९, २.

अनु√१विद्, †अनुवेद ऋ १०, १७, ५; मै ४, १४, १६; काठ २९, १; क ४५, २; शौ ७, १०, २; पै १६, ६७, ८; अनुवेद ऋ १, १६४, १८; अनुविदुः ऋ ७, ३३,७; अनु····विदुः ऋ १,३४, २; अनु····अवेदम् ऋ ४,२७,१. अन्ववैत् ऋ १०, १३९, ४.

अनु-विद्वस्[h]– -द्वान् काठ ७, १४; ८, ३; १८, ४; ३४, १९; क ६, ८; शौ १२, २, ३८; ५२.

अनु-वेद– दुर्°

अनु√२विद्, अनु···विदे ऋ १, १३२, ३.

¶अनुविन्दति तै २, ५, ३, ६; अन्वविन्दत् ऋ १०, १०९, ५; ¶तै १, ५, ९, ७; ५, १, २, २; ७, १, ६,१; ¶मै १, ८, २; ¶काठ २५, ७; २८, ४; ३१, १४; ¶क ३९, ५;

---

[a]) सस्व. कृते 'अनु,>नू-राध' इत्यत्र टि. द्र.।

[b]) कप्र. **अनुर्** इति सा.। अथाऽर्थे कियान् भेदः ? उच्यते। **शोचिषो**ऽनुलक्षकतया वा तदनुगततया वा वातस्य वानमेकं भवति, यत्र **शोचिषः** कर्मणः क्रियया साक्षात् संबन्धाभावः। तस्य कप्र. द्वारा वातस्य वानक्रियायां लक्षणसाहचर्यानुकूल्यादि-विशेषणाऽऽधाननिमित्तभावेन चारितार्थ्यं भवति। गतित्वे तु गर्भीकृतलक्षणाद्युक्तार्थ-विशेषणाया अनुवानक्रियायाः साक्षादिव तत् कर्म प्राधान्येन निर्देशवत् सदीप्सिततमत्वेन विषयो भवति। अत एव कप्र. योगे कर्मणा विप्रकृष्टसंबन्धाद् याऽकर्मिका क्रिया भवति सैव सगतिकतायां कर्मणोऽतीव संनिकृष्टत्वात् सकर्मिका गवति। उभयथा संभवे काऽत्र गतिरिति उच्यते। अत्र हि वातः कस्यां दिशि किं कुर्वन् वा वातीत्यत्राऽनभिप्रायवती सती श्रुतिः प्रस्तुतमन्त्रदेवताया अग्नेस्तच्छोचिरनुवानेन (स्ववानेन तत्समर्थीकरणेन तत्प्रोद्वलनेनेत्यर्थाद्) वातेऽपि तत्सायुज्यं वितनोतीति संकेतेन तत्स्तुतिपरैव भवति। अस्य प्रतिपिपादयिषितस्य चाऽर्थस्य गतितयैवाऽनोः साधीयसो निर्वाहात् तथात्वमेव तस्य भवतु। यथा चैतदेवमेव साध्विति तच्छिरस्काऽपरा बाह्वृच्येव श्रुतिः स्वयमुपदर्शयति(तु.ऋ.४,७,१०)।

[c]) **अनु√वा** इत्यस्य सकर्मकत्वे स्थिते (तु. ऋ १, १४८, ४) 'अस्याग्नेः वातः **अनुवाति**' इति यद् उ. आह तदसुवचम्। यच्च तस्योपरि म. 'वातो वायुरस्याग्नेरनुवाति अग्निमनुलक्ष्य प्रसरति' इत्याह तदपि तथैव निःसारम्। प्रधानकर्माऽभावे तत्कर्मसंबन्धिनोऽग्नेरन्वादेशमात्रेण षष्ठीस्थेन सकर्मिकायाः क्रियायाः कर्माऽऽकाङ्क्षापूर्त्यसंभवात्। तस्य '**शोचिः**' इति प्रधानकर्मणश्चाऽग्निसमानाधिकरणतद्विशेषणतया व्याख्यानकौशलादाभ्यामहो महती खल्वात्मीया वैदुषी प्रदर्शिता। यच्च चित्ताव्यवस्थयेव म. अनुपदं कप्र. **अनुर्** इति तदन्वितं '**शोचिः**' इत्येतच्च कर्मपदमिति पक्षान्तरमवतारयति, तस्याऽऽलोचनमुक्तं बाह्वृचे नापूटि. वृत्तमिति नेह पुनरुच्यते।

[d]) गस. उप. के प्र. थाथादि-स्वरः (पा ६,२,१४४)। मुपा.तु.विकृत इवाऽऽभाति (तु. मा १५, ६, यदन्व् इहापि नाउ. तृ१ '*अनुवया' इति **शोधः** स्यात [तु. प्र√वा >प्र-व-])।

[e]) गस.विजन्त-कृत्-प्रस्व. (पा ६,१,१६२;२,१३९)।

[f]) 'अनु-वा-। असि' इति पदद्वयमजानानः'अनुवासि' इति चैकं पदं संकेतयमानः SIM. नितरां भ्रान्त इव।

[g]) तुटि. **२अनु** मा १२, ५; का १३,१,६; तै १,६, ५, २ यदनु शाखाभेदप्रवर्त्तकानामृषीणां विवक्षा-भेद-प्रतीतेः शब्दतः समानास्वपि श्रुतिषु भिन्नाः पदविभागा अनुकल्प्येरन्।

[h]) गस.उप. **शतृ>वसुः**। कृत्-प्रस्व.(पा ६,२,१३९)।

४४, ४; शौ **२**, २७, २; **५**, १४, १; १७, ५; पै **२**, १६, २; **७**, १, १; **९**, १५, ५†; **१०**, ७, ९; अन्व॒विन्दत् ऋ **२**, १२, ११; शौ **१९**, २७, ९; **२०**, ३४, ११†; पै **१३**, ७, ११†; अ॒न्वविन्दन् ऋ **४**, ५८, ४; **५**, ११, ६; ४०, ९; **७**, ७६, ४; **१०**, ७१, ३; †मा **१५**, २८; **१७**, ९२; †का **१६**, ५, ९; **१९**, १, ६; ¶तै **२**, ५, ३, ६; ६, ६, २; ९, ४; **४**, ४, ४, ३†; **६**, २, ८, ४; ११, १; मै **२**,१३, ७†; **३**,८,८[२]¶; काठ **२५**, ९; **२६**, १; **३१**, १२; **३२**, ६; **३९**, १४; **४०**, ७†; ¶क **४०**, २; ४; **४७**, ११; †कौ **२**, २५८; †जै **३**, २२, ५; शौ **१३**, १, ४; ७; पै **४**, ३३, ६; **७**, ६, १; **८**, १३, ४†; १५, ७; अन्व॒विन्दन् शौ **४**, २३, ६; ३५, २; अ॒नु····अविन्दन् ऋ **३**, ९, ४; †अ॒न्वविन्दः ऋ **८**, ९६, १६; कौ **१**, ३२६; जै **१**, ३४, ४; शौ **२०**, १३७, १०; अ॒नु····अ॒विन्दः ऋ **१**, ६, ५; कौ **२**, २०२, जै **३**, १८, ९; शौ **२०**, ७०, १.

अ॒न्वविदाम शौ **१०**, १, १९; पै **१६**, ३६, ९.

अनुवि॒द्यते शौ **१९**, ५०, ४; पै **९**, ३, ५; **१४**, ४, १४.

अ॒नु-वित्त[a]– -त्तः ऋ **४**, १८, १.

¶**अ॒नु-वित्ति**[b]– -वित्त्यै तै **५**, १, २, २; काठ **२५**, २; ६; ९; **३१**, १२; **३२**, ६[२]; क **३८**, ५; **३९**, ३; **४०**, २; **४७**, ११.

¶**अनु-विद्य**[c] काठ **२५**, ७; ९; **२६**, १; क **३९**, ५; **४०**, २; ४.

¶**अनु-वि√धा**, अनुवि॒धीयते मै **३**, २, ४; १०.

अनु-वि√२नश्>नाशि, अ॒नु····वि॒नश्य[d] शौ **६**, ११३, २; अनुव्य॑नश्यन् मै **१**, ६, ६¶.

अनुविनाशयति[e] काठ **११**, ४.

अनु-वि√मृज्, अ॒नु····वि॒मृड्ढि[f] शौ **११**, १, ३१; पै **१६**, ९२, १.

अनु-वि√विश्, अनुविविशन्तु काठ **११**, ९; अनुवि॒विशत[g] मै **२**, ४, ७; ८.

अनु-वि√वृत्>वात, अनुव्यु॒वर्तयन्त शौ **१५**, ७, २.

?**अनु√विश्**, अनुविश्यताम्[h] पै **१६**, ९, १०.

अनु-वि√षि(<सि)च्, अनुवि॒षिच्यते शौ ८, १५, ४.

¶**अनु-वि√ष्ठा(←स्था)>तिष्ठ**, अनुवि॒तिष्ठते मै **२**, ५, २.

¶**अनु-वि√सृज्**, अनुविसृजति काठ **२१**, २; क **३१**, १७.

अनु-विसृज्य[c] काठ **३०**, १; **३४**, ३; क **४६**, ४.

¶**अनु-वि√हृ**, अनुवि॒हरति मै **२**, ५, २.

अनु√१वी, अनुवे॒ति मै **३**, ८, ९¶; अनुवेतु[i] पै **९**, १८, ४; ?अ॒नु····वे॒ः[j] ऋ **१०**, १०५, २.

अनु-२वी(वि√इ), अनुव्या॑यन् मा **१४**, ३०; का **१५**, ९, ४; मै **२**, ८, ६; काठ **१७**, ५; क **२६**, ४.

अनु-वी(वि√ई)क्ष्, अनुवी॒क्षस्व मा **१३**, ३०; का **१४**, ३, ४; मै **२**, ७, १६.

¶**अनु√वीध्र॒**, अनुवी॒ध्रति[k] मै **४**, ६, ३.

---

[a] कर्मणि क्तेऽनन्तरगतिस्वरः (पा ६,२,४९) ।

[b] गस. क्तिनि 'तादौ' (पा ६,२,५०) इति पूपप्रस्व. ।

[c] गस. । उप. ल्यबन्तं द्र. ।

[d] वैतु. WI. यत्र कप्र. 'अनुः' इत्युक्तं भवति । तदपि विमृश्यम् । नदीफेनानां विनाशक्रिययाऽधिकरण-संबन्धस्य विवक्षितत्वादसौ संबन्धः प्रधानभावेन समर्पयितुमिष्ट उत वा गुणभावेनेत्येतद्विवेकाधीनत्वादत्रापेक्षितस्य निर्णयस्य । इहाऽनवस्थाय यत्र कुत्राऽपि विनाशोऽभिप्रेत इत्याशयेन यनि. द्र. (तु. MW). । सा. इह 'अनु (?नि॒) वि॒विक्ष्व' इतीव श्रावयन् यद् व्याचष्टे तदाऽऽकरादेव यथावदनुसंधाय तस्य प्रथमस्य गतेः स्वरूपतः परिच्छेदः कर्त्तव्यः ।

[e] अत्राऽनुः सप्तम्यर्थानुवादी गतिर्वा यनि. साकल्याद्यर्थ इति भूयोपि विमर्शपदवीमारोप्यम् । उभयथा संभवात् सौवरमात्रविनिगमकान्तरस्य चाऽनुपलब्धेरिति दिक् ।

[f] W. अनुर् इतीव कप्र. मन्यते यदनु वि√मृज् इत्यस्याऽकर्मकवृत्तस्य मृग्यत्वं द्र. ।

[g] तुटि. २अ॒नु तै २, ४, ८, २ ।

[h] कैयादिको विप्रयोगार्थीयो √विष् अभिप्रेतः स्यादिति कृत्वा तदनुसारी शोधः द्र. (तु. नि॒····हीयताम् इति [ऋ ७, १०४, १०; शौ ८, ४, १०]) पामे. ।

[i] सुपा. प्रश्नचिह्नमपार्थं द्र. । यस्थि. संगतिसंभवात् ।

[j] एवं किल सा. योगमाह । PW. प्रभृ. तु कप्र. पृथग्, वि॒- >वे॒ः इति प१ च पृथगित्याहुः । भूयोविमृश्यान्वयोऽयं मन्त्रः द्र. ।

[k] तु. संटि. लिपिप्रमादमात्राः मूको. पामे. । अर्थतः (यद्र.) वीध्र॒- >√वीध्र॒ इति नाधा. (यद्र.) सिद्धेन सताऽनोर्योगः कर्मानुलक्षणाद्यर्थानुरञ्जितः पश्चात्तनः द्र. । अथ स्वरतः वीध्र॒-(=वि-इध्र॒[<√इन्ध्]) इत्यस्य 'वि' इत्यंशः नाधा. अवशिष्टांऽशात् पार्थक्यं भजन्नात्मीयां

अनु√वृज्

अनु, >नू-वृज्[a]– -वृग्भ्याम् तै ५, ७, २३, १; काठ ५३, १३; –वृजौ शौ ९, ४, १२; पै १६, २५, २.

अनु√वृत्→वर्ति, अनुवर्तते ऋ ५, ६२, ४; १०, ३७, ३; अनुवर्तते शौ १२, २, ३७, ¶अनुवर्तताम् शौ ११, ११,२१; अन्ववर्तत^{२}, अन्ववर्तत मै ४, ३, ४¶.

अनुवावृते कौ १, ३७२; जै १, ३९, ३; शौ ७, २२, १; अनु····वावृतुः ऋ ४, ३०, २; †अनु····अवृत्सत ऋ [५, ५५, १–९]; तै २, ४, ८, २; मै २, ४, ७[b]; काठ ११, ९; ३०, ४; क ४६, ७[c].

अनुवर्तयामसि खि ३, १५, १९.

अनु-वर्तयत्[d]– -यन् शौ ११, १०, १८.

अनु-वर्ति[e]– -र्तयः पै २, ७५, ४^{३}; ५^{३}; –र्तिः पै २, ७५, १^{३}–३^{३}; –र्तिम् पै २, ७५, १–५.

¶अनु-वर्त्मन्[f]– -र्त्म मै ३, ३,१०; काठ ११, १; २१, १०^{२}; –र्त्मनः काठ ११, १; –र्त्मना काठ २१, १०; –§र्त्मानः मा १७,८६^{३}; का १८,७,७^{४}; तै ४, ६,५,६^{३}; मै २, ११, १^{२}; ३, ३, १०; काठ १८, ६^{२}; २१, १०; क २८, ६^{३}; शौ ३, ८, ६; ६, ९४, २; –र्त्मानम् तै २ २, ५, ७; ११, २; ५, ४, ७, ७; –र्त्मानौ मै ३, ३, १०.

अ(नु>)नू-वृत्[g]– -वृत् मै २,८,८; काठ १७,७; ३७,१७; क २६, ६; –वृता मै २, ८, ८; –वृते मै २, ८, ८; काठ १७,७; ३७, १७; क २६, ६.

अनु√वृध्

ϕअनु-वर्धत्[d]– -र्धत् ऋ ५,६२,५.

अनु√वृष्

अनु-वर्षत्[d]– -र्षते तै ७, ५, ११, २; काठ ४५, २.

†**अनु√वेन्**, अनुवेनति ऋ १०, १३५,१; अन्ववेनत् ऋ ४,१८, ११; तै ३, २, ११, ३; मै ४, १२, ५.

अनु-वेनत्[d]– -नन्तम् ऋ १०, १३५, २.

¶**अनु√वेष्ट्**, अन्ववेष्टत काठ १२, ४; २३, ३; क ३५, ९.

अनु√व्यध्

?अनु-व्याध[h]– -धात् पै २, ८५,३; ७, १५, १.

¶अनु-व्यु(वि√उ)च्, अनुव्यौक्षत[i] मै २, ५, ७.

अनु-व्रत,ता[j]– -तः ऋ ८, १३, १९; शौ ३, ३०, २; पै ५, १९, २; –ता तै १, १, १०, १; ६, ३,१; काठ १, १०; शौ ३, २५, ४; १३, १, २२; १४, १, ४२; –ताम् ऋ १०, ३४, २; –ताय ऋ १, ५१, ९; –ते ऋ १, ३४, ४.

अनु√शंस्, ¶अनुशंसति तै ५, ६, ८, ६; मै १, ९, ७; काठ ३४, ५.

अनुशंसिषः खि ५, ४, १; कौ ४, १; जै २, ७, १.

अनु-शंस- दुःशंस°

अनु-शसे[k] ऋ ५, ५०, २.

अनु-शस्त- अन्°

†**अनु√शक्**, अनु····शकत्[l] ऋ १०, ४३, ५; शौ २०, १७, ५.

अनु√,शिक्ष्, अनुशिक्ष पै ५, २७, ६.

अनु√शास्, अनुशासति ऋ ६, ५४,१; अन्वशासत् खि १,९,४.

मौलिकीमिव सतीमौपसर्गिकीं स्थितिं लभते। तेनैवं गतिद्वये संपन्ने प्रथमो गतिर्निहन्यतेऽपरश्च स्वरभाग् भवति (पा ८, १, ७०)।

[a]) गस. क्विबन्त-कृद्-उपप्रस्व. (पा ६,२,१३९)। पूप. काठ. ह्रस्वः, अन्यत्र च दीर्घत्वम् उसं. (पा ६,३,११६)।

[b]) शुभम् >शुभे इति पाभे. सत्य् अनन्वित इवाऽर्थतः द्र. अनुः ।

[c]) 'अनु····अवृत्सत्' इति मुपा. चिन्त्यः, तु. यनि.रू.।

[d]) गस. शत्रन्त-कृत्-प्रस्व. (पा ६,१,१८६;२,१३९)।

[e]) गस. । उप. कर्तर्य् इन् प्र. (पाउ ४,११९)।

[f]) प्रास. बस. च भवति । यत्र न. श्रुतिर्भवति तत्र पूर्वः, यत्र चाऽन्यथा तत्रोत्तर इति विवेकः । उभयत्रापि पूपप्रस्व. भवति (पा ६,२,१;२)। यस्तु 'अनोरप्रधान-' (पा ६, २, १८९) इत्यन्तोदात्तोऽनुशिष्टो भवतीह तत्प्रवृत्त्यभावः सर्वशाखासाधारणः उसं.।

[g]) उस. क्विबन्त-कृत्-प्रस्व. (पा ६,२,१३९)। पूप. दीर्घत्वम् (पा ६, ३, ११६)।

[h]) भावे घञ् प्र.। '?अनव्याधात्' इत्यत्रत्यं टि. द्र.।

[i]) 'तिङि चोदात्तवति' (पा ८,१,७१) इति पूर्वगतिद्वयस्य निघातः।

[j]) बस. (पावा २,२,२४)। स्वरः त्रिपूटि. द्र.।

[k]) गस.केनन्त-कृत्-प्रस्व. (पा ६,१,१९७;२,१३६)।

[l]) वाक्यपूर्त्यर्थम् 'अनुकर्तुम्' इति क्रियाक्षेपं वें. सा. चाऽऽहतुः। तन्न। √शक् इत्यस्य स्वशक्त्यैव सकर्मकप्रयोगार्हत्वात् (तु.ऋ १, १०, ६; ७३, १०; ९४, ३ प्रमृ.)।

अनु-शासत्[a]– -सता ऋ १,१३९,४.

अनु-शासन[b]– -नस्य ऋ १०, ३२, ७.

अनु-शिष्ट[c]– -ष्टः ऋ [५, २, ८; १०, ३२, ६; ७]; –ष्टाः शौ १९, ५६, ४; पै ३, ८, ४.

अनु√शिक्ष्, अनु√शक् द्र.

अनु√शी, अनुशेरते शौ ८, ६, १९; पै १६, ८०, १०.

अनु√शुच्, अनुशोचतु शौ ६,१३०, १–४; १३१, १; २.

अनु√शुष्, अनुशुष्यति खि ४, ५, ३८; अनुशुष्यतु खि ४, ५, १७; शौ ७, ६१, १.

अनु√श्रथ्, श्रन्थ्>श्नथ्[d], अनुश्नथति तै ६, १, ९, ७.

अनुशिश्रथः[e] ऋ ४, ३२, २२.

अनु√श्रु>श्रृ, अनुशृण्वन्ति ऋ २, २४, १३.

अनुशुश्राव शौ ११, ६, २५; पै १६, २३, ५.

¶अनु-श्लोक[f]– -केन तै ७,५,८,२.

अनु√ष(←स)ञ्ज्

¶अनु-षक्त[f]– -क्तः मै ३,८,४; काठ २५, ३; क ३८, ६; –क्ताः मै १, १०, १९; काठ ३६, १३.

*अनु-षज्(>क्)[g]-

†आनुषक्[h]– -षक् ऋ १, [१३, ५; ३, ४१,२; ८,४५,१]; ५२, १४; ५८,३; ७२,७; २,६,८; ३, ११, १; ४, ४, १०; ७, २; ५; १२, ३; ५, ६, ६; १०; ९, १; १६, २; १८, २; २१, २; [२२, २; २६, ८]; ६, ५, ३; ४८, ४; ८, ९, १७; [१२, ११; ५३, ६]; १३, ३०; २३, ६; २६, ६; २७, ७; ४४, ८; ९, १०२, ७; १०, ४९, ५; ६; ८३, १; १७६, २; खि ३, ५, ६; मा ७, ३२; का ७, १४, १; १६, ५, १२; तै १, २, १४, ४; ३, ५, ११, १; मै ४, १०, ४; ११, ५; १२, ६; काठ २, १५; ६, ११; १३, १५; १५, १२; ३९, १४; कौ १,८२§; १३३; २, ४२१‡[i]; ६८८; जै १, ९, २§; १४, ९; ३, ३२, ११‡[i]; ४, १७, ४; शौ ४, ३२, १; २०, २३, २; १४२, २; पै ४, ३२, १.

अनु-ष(<स)त्य[j]– -त्यम् ऋ ३,२६,१.

अनु√षि(←सि)च्, अनुषिच्यते मै ३, २, १¶; शौ ६, ११, २.

अनु-षिक्त- घृत°

¶अनु-षिञ्चत्[k]– -ञ्चन् मै १, १०, ९.

अनु√षि(<सि)ध्, ?अनुषिष्यध्यते[l] पै ९, २५, २.

अनु-सेषिधत्[a]– -धत् ऋ १, २३, १५.

अनु√२षू(<सू)

*अनु-षू-

*अनुषू-क-

¶आनुषूक[m]– -कः तै २,३, ४, ४^{२}; –कम् तै २, ३, ४, ३; ४; –काः, –कानाम् काठ ११, ४.

---

[a] गस.शत्रन्त-कृत्-प्रस्व. (पा ६,१,१८९;२,१३९)।

[b] गस.ल्युडन्त-कृत्-प्रस्व. (पा ६,१,१९३;२,१३९)।

[c] कर्मणि क्तेऽनन्तरगतिस्वरः (पा ६, २, ४९)।

[d] छान्दसं संप्रसारणम् (तु. भा.)।

[e] अनुः कप्र. नोपसर्ग इत्यपि विमृश्यताम् (तु. सा. यद्यप्यसौ विहतान्वयो भवति)। अस्मिन् पक्षेऽकर्मकमाख्यातं न सकर्मकमिति विवेकः (तु. ऋ ५,५४,१०; ८५,४; ९,६८,२ प्रभृ.)। एवं तावदेतच् शुद्धायाः प्रकृतेश्चौरादिकं कर्त्तरि रू. न तु ण्यन्तात् प्रयोजककर्त्तरीति (वैतु. GW.)।

[f] प्रास. अव्यय-पूपप्रस्व. (पा ६,२,२)। उप. यद्र.।

[g] उस. क्विबन्त-कृत्-प्रस्व. (पा ६,१,१६२;२,१३९)।

[h] सस्व. नापू. द्र. वा. क्रिवि.। अत्र मूलतः पादान्त उच्चारणसौकर्य्यप्रयोजितः पूर्वपदादौ छान्दसो दीर्घः (तु. दे., PW. प्रभृ.)। शब्दानुशासनतस्तस्य न्याय्येतरत्वात् पपा. अवग्रहाऽभावः समाधेयः स्यात्। दीर्घो न भवति प्रत्युत 'आ अनु' इत्येतद् गतिद्वयं भवतीत्यपि मतं भवति (तु. सा. ऋ १, १३, ५। उप. अपि <√सच् स्यादित्येवं भूयोविमर्शसहोऽयं विषयः द्र.।

[i] 'विश्व-मानुषः' इति (ऋ ८,४५,४२) विशिष्टः पाभे.।

[j] प्रास.वा (पा २, २,१८) बस. वा (पावा २,२,२४)। प्रथमे कल्पेऽप्य् उप.द्वि.वा स्यात् तृ.वा (तु.सा.)। सर्वथाप्य् उप. अप्रधानत्वाद् 'अनोः' (पा ६, २,१८९) इत्यन्तोदात्तः। यत्तु सा.निरुदकादित्वम् (पा ६,२,१८४) उपचर्य्य स्वरं समाधित्सति तच् चिन्त्यम्। समाविष्टपञ्चम्यर्थानां प्रास. वा बस. वा तस्मिन् गणेऽन्तःप्रवेशस्य न्याय्यत्वात्। इह तदप्रसङ्गाद् अनुर्यत्र पूप. भवति तत्कृते पृथगनुशासनसद्भावे तदपेक्षाऽभावाच्च। मूर्धन्यादेशे सुषामादित्वं द्र. (पा ८, ३, ९८)।

[k] गस. शत्रन्त-कृत-प्रस्व. (पा ६,१,१८६;२,१३९)।

[l] 'अनुषेषिध्यते' इति मूलतः सतो विकारः खलु सुपा. स्यात्। एवं तावत् 'स्थादिषु' (पा ८, ३,६४) इति 'उपसर्गात्' (पा नाउ.) इति चानुशासनद्वयोक्तं मूर्धन्यद्वयं द्र.।

[m] क्विपा (पा ३,२,६१) निष्पन्नात् कृतः प्रागिवीयेन क-प्रत्ययेन (पा ५,३,७०) साधितात् ताद्धितात् विकारार्थे अण् उसं. (पा ४, ३, १५२)। प्रत्यय-स्वरः।

†**अनु√ष्टु(<स्तु)**[a], अ॒नुष्टुवन्ति ऋ [८,३,८;१५,६]; मा **३३**, ९७; कौ **२**, २३२; ९२४; जै **३**,२०, १६; शौ **२०**, ६१, ३; ९९, २.

अ॒नु-ष्टुति[b]- -तिः ऋ ८, ६३, ८; -तिम् ऋ ८, ६८, ७.

अनु√ष्टु(<स्तु)भ[a]

अनु-ष्टु॒भ्[c]- -¶ष्टुक्[d], ग् तै **२**, ५, १०, ३; ५, २, ११, १; ४, १२, १^{२}; **६**, १, २, ५^{२}; ४, २, ५; **७**, ४, ४, १^{२}; -ष्टुप् मा **८**, ४७; **१०**, १३; **१३**, ५७; **१४**, १०; १८; **१५**, ५; **२१**, १४; **२३**, ३३; का **२**, ३, २; **८**, २२, १; **११**, ५, ४; **१४**, ७, ७; **१५**, ३, ५; ५, ३; **१६**, १, ७; **२३**, २, ३; **२५**, ७, १; तै **१**, ८, १३, १; **२**, ५, १०, ३¶; **३**, १, ६, २; ¶४, ९, ६; ७; **४**, ३, १, १; २, २; ५, १; १२, २; ¶**५**, १, ३, ५^{३}; ५, २; ९, १; ३, ८, २; ५, ६, २; ¶**६**, १, २, ५; ६, ११, ६; ¶**७**, १, १, ५; ४, ३; ४, ४, २^{२}; मै **१**, ४, ११¶; ९, २; १०, १८¶; **२**, ३, ७¶; ६, १०; ७, १९; २०; ८, २; ३; ७; १३, १४; ¶**३**, १, २; ४; ९; २, ८^{२}; ३, २; ८; ६, ५^{३}; ९, ५; ११, ११$; १२, २$; ¶**४**, ३, ५; १०^{२}; ४, ९; १०^{४}; ५, १; ३; ७, ५^{२}; ६; काठ ¶**७**, ४; **९**, १०; ¶**१२**, ५^{४}; ८; **१५**, ७; **१६**, १९; **१७**, २; ३; ६; ¶**१९**, १; ३^{३}; ५; १०^{२}; ¶**२१**, ३^{३}; ८; ¶**२३**, २^{३}; ¶**२६**, ९; ¶**३२**, ४; ¶**३४**, १२^{२}; ¶**३६**, १२^{२}; **३८**, १०; **३९**, ४; ७; **५०**, ५; ¶क **५**, ३; **२५**, ९$; $**२६**, १; २; ५; **२९**, ८; **३०**, १^{४}; ३; ८^{२}; **३१**, १८^{३}; **३५**, ८^{३}; **४१**, ७; शौ **८**, ९, २०; **१९**, २१, १; -¶ष्टुप्सु मै **४**, ४, ९^{२}; काठ **३३**, ६^{२}; -¶ष्टुब्भिः मै **३**, ३, २; काठ **२१**, ४; क **३१**, १९; -ष्टुभः मा **१३**, ५७; का **१४**, ७, ८; तै **४**, ३, २, २; ¶**५**, ३, ८, २; ४, १२, १^{२}; **७**, १, ४, ३¶; ५, ५, १; मै **२**, ७, १९; **३**, ६, ५¶; **४**,४,१०¶; काठ **१६**, १९; **३३**, ६¶; **३७**, १३; क **२५**, ९; -ष्टुभम् ऋ **१०**, १२४, ९; मा **२८**,२६; का **३०**, ३, ३; तै **४**, ३, ११, २; **५**, ७, ९, ४¶; **६**, ६, ११, ६¶; मै **१**, १०,१८^{२}¶; ११,१०; **२**, ३, ७¶; **३**, ७, ९¶; **४**,५, ३; ७, ५¶; ९, २; ¶काठ **१४**, ४; **१९**, ११; **३३**, ६; **३६**, १२; **३८**, १४$; क **३१**, १¶; शौ **८**, ९, १४; पै **१६**, १९, ४; -ष्टुभा ऋ **१०**, १३०, ४; मा **१३**, ३४; **२८**, ३७; का **१४**, ३, ८; **३०**, ४, ३; तै **४**, ४, १२, ३; ¶**५**, १, ३, ५^{३}; ५, २; ९, १; ५, ६, २; ७, १, १; ¶**६**, १, २, ५; ४,२, ५; ३, २; मै **१**, ५,५¶; ६,१; ८,८; ¶**३**, १, ४^{२}; ९; ३, ८^{२}; ६, ५; १६, ४$; ¶**४**, ५,१; ¶काठ **३**, ४$; **७**,४; १३$; **१९**,३^{२};१०;**२१**, ८; **२२**, ८$; १४; **२३**, २; **२४**, ८; ¶क **५**, ३; **३०**, १^{२}; ३; ८; **३५**, २; ८; **३८**, १; पै **१५**, १, ८; **१६**, १०३, १०; -ष्टुभे मा **२४**, १२; का **२**, ३, २; **२६**, ३, २; तै **६**, २, १, ३¶; मै **३**, १३, १७; काठ **३४**, ४¶; **३५**, १०; **५१**, ४; क **४८**, १२; -ष्टुभौ मै **१**, ६, ८¶.

आ॒नुष्टुभ[e]- -¶भः तै **७**,४, ४, १^{२}; मै **४**, ४, १०; ७, ५^{२}; ६; -भम् मा **१२**, ५; का **१३**, १, ६; तै **४**, २, १, २; मै **२**, ७, ८; **४**, ७, ५¶; काठ **१६**,८; -भस्य ऋ **१०**, १८१, १; मै **२**, ८, ११; कौ **३**, २, ५; जै **२**, ५, ७; -भाभ्याम् मा **२९**, ६०; का **३१**, ५, १; तै **७**, ५, १४, १; मै **३**, १५, १०; काठ **४५**, १०; -भेन मा **११**, ११; ५८, ६०; ६५; **१३**,५३; का **१२**, १, ११;५,९;११;६,५; **१४**, ६,१; तै **१**, ६, ५, २; **४**, १, १, ४; ५, २; ४; ६, १; ३; ¶**५**,५,८; ३; **७**, १, १८, १; मै **२**, ७, १; ६^{२}; १८; ८, ११; **४**, २, ११; काठ **२**, ११; **५**, ५; **१६**, १; ५^{२}; ६; १८; **२२**, ५^{२}; **३६**, १५; **३८**, १२; **४१**, ९; क **२**, ५; **२५**, ९.

¶**आ॒नुष्टुभी**[f]- -भी मै **३**,८,९;९,५; काठ **६**,८; क **४**, ७; -भीः तै **१**, ७, ५, ४; ५, २, १, १.

अनुष्टु॒प्-छन्दस्[g]- -न्दाः मै **२**, ३, ३; काठ **१२**, ६; **१७**, १९.

---

[a]) मूर्द्धन्यादेशः (पा ८, ३, ६५)।

[b]) गस. क्तिनि 'तादौ' (पा ६,२,५०) इति पूपप्रस्व.।

[c]) गस.क्विबन्त-कृत्-प्रस्व. (पा ६,१,१६२;२,१३९)।

[d]) तै. प्र१ कुत्वमप्यामनन्ति । तेनैतद् <*अनु-ष्टुच्- <अनु√ष्टु(<स्तु)च् इत्येवं सुवचं स्यात्।

[e]) तद्धिते अञि तत्स्वरः (पा ४,१,८६;६,१,१९७)।

[f]) स्त्रियां ङीपः(पा४,१,१५)पित्त्वान्निघाते स्वरेऽभेदः।

[g]) बस. पूपप्रस्व. (पा ६, २, १)। उप. यद्र.।

¶अनुष्टुप्-प्रतिपत्क[a]– -त्कानि मै ४, ५, ३.

अ॒नुष्ठन अन्व(नु√१अ)स् द्र.

अनु√ष्ठा(<स्था)>तिष्ठ[b], अनुति॒ष्ठते शौ ९, ११, ६; अ॒नु…तिष्ठते[c] शौ १९, ४९, २; अ॒नुतिष्ठति शौ १५, ५, २; ५; ७; ९; ११; १३; १५; पै १६, ११६, १०; अ॒नुतिष्ठतः शौ १५, ४, ३; ६; ९; १२; १५; १८; अनुति॒ष्ठन्ति शौ ११, १२, २७; १९, ४८, ५; पै ६, २१, ५; ८, ९, ८; अ॒नुतिष्ठसे शौ १७, १, १६; अ॒नु…ति॒ष्ठथः[d] ऋ १, १८३, २; अनुतिष्ठथ काठ ३७, १०; अ॒नु…ति॒ष्ठाति ऋ ४, २०, २; अ॒नुतिष्ठतु शौ ११, ६, २४; अ॒नु…तिष्ठतु ऋ १, १३४, १; अनुतिष्ठन्तु काठ ४०, १०‡[e]; अनुतिष्ठ पै १०, १५, १-१०; १६, १-१०; ¶अ॒न्वतिष्ठत तै ६, ५, १, २; मै १, १०, ५; ¶अन्व॒तिष्ठत तै २, ४, १२, ७; ६, ५, १, ३; काठ १२, ३; ३५, २०; ३७, ११^{३}; क ४८, १८; ¶अ॒नु…अतिष्ठत मै ३, १, ५.

अ॒नु…स्थाति ऋ २, ३१, ३. अ॒नुतस्थुः ऋ १, ५२, ४; अ॒नु…तस्थुः ऋ ३, ३०, ४[f]; अ॒नु…तस्थिम ऋ ९, ११२, ३; ¶अ॒नु…अस्थित मै ३, १, ५.

अनु-तिष्ठत्– -ष्ठन् पै ८, १५, ४.

?**अनुष्टा**[g]– पै १६, १११, १.

अनु-ष्ठा॒[h]– -ष्ठाः ऋ १, ५४, १०.

अनु-ष्ठातृ॒[i]– -०तः पै १०, १५, १–१०; १६, १; ६–१०; –ता शौ १५, ५, २; ५; ७; ९; ११; १३; १५; –तारम् शौ १५, ५, १; ४; ६; ८; १०; १२; १४; –तारौ शौ १५, ४, २; ५; ८; ११; १४; १७.

अनुष्ठात्री– -०त्रि पै १०, १६, २–५.

अ॒नु-ष्ठित[j]– -तम् ऋ १०, ६१, ५. [°त- विष्णु°]

अनु-ष्ठु॒[k]– -ष्ठु ऋ १, ९५, ३; शौ १२, ४, ४५; पै ८, १४, ३†.

†अनुष्ठु॒या[l] ऋ ४, ४, १४; तै १, २, १४, ६; मै ४, ११, ५; १३, ४; काठ ६, ११; १६, २१.

अनु√ष्य(←स्य)न्द्[m]

अनु-ष्यु॒दे[n] ऋ २, १३, २.

†**अनु-ष्व(<स्व)ध॒**[o]– -धम् ऋ १, ८१, ४; २, ३, ११; ३, ६, ९; ४७, १; ५, ५२, १; ९, ७२, ५; मा ७, ३८; १७, ८८; का १९, १, २; २८, ८, १; तै १, ४, १९, १; मै १, ३, २२; काठ ४, ८; क ३, ६; कौ १, ४२३; जै १, ४१, ५[p]; शौ २०, १३, ४.

अनु√ष्व(←स्व)प्[q]

अनु-ष्वा॒पम्[r] ऋ ८, ९७, ३.

अनु-सं√रभ्, अनुसं॒रभेथाम् शौ ६, १२२, ३; पै १६, ५१, ७.

अनु-सं√वह्, अनुसं॒वहन्ति शौ १०, ८, ८; पै १६, १०१, ३.

अनु-सं√१विद्, अनुसं॒विदुः शौ १०, ७, १७; २६.

अनु-सं√विश्, अनुसं॒विशस्व शौ १८, ३, ९.

अनु-सं√क्रम्, अनुसं॒क्राम शौ १८, २, ५७.

अनु√सच्,सश्च्, अ॒नु[s]…सचते ऋ

---

[a]) बस. पूपप्रस्व. (पा ६, २, १)। उप. समासान्तः कप् (पा ५, ४, १५४)। मूको. पाभे. यद्र.।

[b]) सस्य षत्वे थस्य ठः (पा ८, ३, ६५; ४, ४१)।

[c]) पपा. शोधः द्र.। 'अ॒धि(?अ॒ति)। वि॒श्वानि। अरुहत्। गम्भीरा॒। उ(?गम्भीर॒ः)। व॒र्षिष्ठम्। अरुहन्त। श्र॒विष्ठाः। उशती॒। रा॒त्री। अ॒नु। सा॒। भद्रा॒भिः(?भद्रा॒। ?अभि॒)। तिष्ठते। मित्रः॒-इव। स्वधा॒भिः' इति।

[d]) कप्र. इति वें. वष्टि, तन्न। तथा सत्य् अस्पष्टार्थत्वात्।

[e]) 'अ॒धिवोचत>ता' इति ऋ.(१०,१२८,४) पाभे.।

[f]) पञ्चमोऽयं मन्त्र इति PW. आह, तद् भ्रान्तम्।

[g]) 'अनु-ष्ठु' इति वा 'अनु-ष्ठ्वा (=-ष्ठु। आ)' इति वा शोधः (तु. शौ १२, ४, ४५)।

[h]) गस.विजन्त-कृत्-प्रस्व. (पा ६,१,१६२;२,१३९)।

[i]) गस.तृजन्त-कृत्-प्रस्व. (पा ६,१,१६३;२,१३९)।

[j]) कर्मणि क्तेऽनन्तरगतिस्वरः (पा ६,२,४९)।

[k]) गस. कृत्-प्रस्व. (पा ६,२,१३६)। उप. कुः प्र. उसं. (पाउ १, २५)। आकारलोपः (पा ६, ४, ६४)। वा. क्रिवि.।

[l]) तृ१ याजादेशे चित्-स्वरः(पा७,१,३९;६,१,१६३)।

[m]) 'अनुवि-' (पा ८, ३, ७२) इति षत्वम्।

[n]) गस.केनन्त-कृत्-प्रस्व. (पा ६,१,१९७;२,१३९)।

[o]) अस. सासस्व. (पा ६, १, २२३)। उप. ह्रस्वत्वं षत्वं च (पा १,२,४८; ८,३,१०६)। वा. क्रिवि. द्र.।

[p]) 'अनुष्वधः' इति सुपा. प्रमादजन्यः द्र.।

[q]) 'उपसर्गात्' (पा ८, ३, ६५) इत्यत्र √स्वप् इत्यस्याप्य् उसं. षत्वम्।

[r]) गस.णमुलन्त-कृत्-प्रस्व. (पा ६,१,१९३;२,१३९)।

[s]) सा. अनुक्रमेणेत्यर्थे अव्य. इति मेने। तद् विमृश्यम्।

१, १४०, ९; ¶अनुसचन्ते तै ६, ३, १०, ३; अनु···सचन्ते ऋ ९, ८२, ५; अनु···सचताम् मा १३, ३०; का १४, ३, ४; मै २, ७, १६; काठ ३९, ३; अनु··· सचन्ताम् मा २९, २; का ३१, १, २; तै ५, १, ११, १; मै ३, १६, २; काठ ४६, २; अनु··· सश्चत[a] ऋ [(३, १६, २); ७, १८, २५].

अनुसेचिरे शौ ८, ९, २३; पै १६, २०, २; अनु···सश्चिम[a] ऋ ८, २५, १७.

अनु-सं√चर्, ¶अनुसंचरति मै ३, २, ८^{२}; काठ २१, ३; क ३१, १८; अनुसंचरेते मै २, १३, १०; अनुसंचरन्ति शौ ३, २१, ७; ४, ३८, ५[b]; पै २, ५७, ४; ३, १२, ७; अनु···संचरन्ति[c] शौ ४, ३८, ५; अनु(संचरन्ति) शौ ३, २१, ७; पै ३, १२, ७; अनुसंचरेम[d] शौ १९, ५८, ३^{२}; पै १, ११०, ३^{३}.

अनुसं-चर(त् >)न्ती[e]– -न्ती शौ १८, ३, ४.

अनु-सं√तन्, ¶अनुसंतनोति मै ३, ९, ४; ४, ५, २^{३}; काठ ७, ९; १३, ५; ३१, ११; ३२, ५; ३७, १७^{३}; क ५, ८; ४७, ११; अनुसंतनोतु का २, ६, १०; अनुसंतनु मै २, १३, ३; ¶अनुसंतनुयात् मै ३, ९, ४.

¶अनुसं-तत[f]– -तः मै ४, ६, ५.

¶अनुसं-तति[g]– -तत्यै मै १, ८, ७; १०, १३; १५; १८; २, २, ८; ३, ७, २; ४, ४, ९; १०; काठ ७, ९; १२, ३; ४; २२, २; ३६, ७; १३; क ५, ८.

¶**अनु-सं√तॄ**, अनुसंतरति मै ३, ६, ९.

अनु-सं√दह्, अनुसंदह शौ १२, ११, २; पै १६, १४६, १२.

अनु-सं√दिश्, अनुसंदिशामि शौ ४, १६, ९.

अनु-समि(म्√इ), अनुसंयन्ति[h] खि ४, ११, १०; अनुसंयन्ति शौ ११, ७, २; अनुसंयन्तु कौ २, १२.१४; पै १६, १५३, ३[i].

¶**अनु-सं√पश्**, अनुसमपश्यताम् काठ २३, ८; अनु···समपश्यन् मै ३, ७, १.

अनु-सं-प्र√या, अनुसंप्रयाहि शौ ११, १, ३६; पै १६, ९२, ६; ?अनुसंप्रयात[j] तै ४, ७, १३, ४; ५, ७, ७, २.

अनु-सं√भिद्, अनुसंभिन्दन्ति[k] काठ ३६, ७.

अनु-सर्प*- अनु√सृप् द्र.

¶**अनु-सवन**[l]– -नम् तै ६, ५, ११, ४^{३}; ७, ५, ६, ४; मै १, ९, ५^{२}; ३, १०, ५^{२}; काठ ९, १४; २३, ७; २९, १^{३}; ३७, ७; क ३६, ४; ४५, २^{३}.

¶**अनु-सीत**[m]– -तम् तै ५, २, ५, ५;

---

[a]) अभ्यस्तीभूतायाः प्रकृतेः रू. (वैतु. दे २, १४ यत्र छान्दसः शकारोपजन इत्युक्तं भवति)।

[b]) लक्षणाऽर्थे कप्र. अनुर् इतीव व्याचक्षाणः सा. चिन्त्यः। तथा हि सति पृथक् स्वरवान् अयं स्यात्।

[c]) तु. नापू. सस्थ. द्युपसृष्टं रू. तत्रत्यं टि. च, यदनु सम्यग् व्याख्यातुमशक्नुवन् सा. इहाप्युपेक्ष्यः। उभयत्राऽर्थतः प्रयोगसाम्यात्।

[d]) पाण्डु. पपा. च 'अनुसंचरेम' इति पठतः। तत्र अनुः सप्तम्यर्थे कप्र. द्र.।

[e]) गस. शत्रन्त-कृत्-प्रस्व. (पा ६, १, १८६; २, १३९)। स्त्रियां ङीपः (पा ४, १, ६) पित्त्वान्निघाते स्वरेऽभेदः।

[f]) कर्मणि क्तेऽनन्तरगतिस्वरः (पा ६, २, ४९)।

[g]) भावे क्तिनि 'तादौ' (पा ६, २, ५०) इति पूपप्रस्व.।

[h]) 'अनुसंयन्ति' इति त्रिस्वरः मुपा. नितरामशुद्धः।

[i]) तु. 'अनुसंयन्ति' इति शौ (११, ७, २) सस्थ. पाभे.।

[j]) यथोपलम्भं द्युपसृष्टिश्च त्रैस्वर्य्यं च श्रूयते। तद् भवत्येव मौलिकतां प्रति मुपा. सन्देहः। अनन्तरार्थेऽनोः पृथक्-काराभ्युपायेऽपि (तु. भा.; वैतु. सा., गाशब्रा ८, ६, ३, २२ यतः ऽपसंप्रयात [मा १५, ५३ इत्यस्य द्युपसृष्टस्यैव पा. प्रामाण्यं भवति]) 'सम्' इत्यस्य निघातप्राप्तेर्दुर्वारत्वात् (पा ८, १, ७० [तु. मा १५, ५३ यतः 'सम्' इत्यस्य मूलतो निघात एवानुमीयेत])। तत् का गतिरिति ? शाखान्तरीयमेवाऽपरमपि साक्ष्यं मौलिकस्थितिपरिच्छित्त्यर्थमुपयुज्यतामिति (तु. शौ ११, १, ३६ यदाधारेण 'अनु' इत्यस्यापि 'सम्' इत्येतद्वदिह निघातोऽनुमातुं सुलभः)। यत्तु शौ. एकवच्छ्रुतिर्यजुःषु च बहुवदिति तत्र कतरा मौलिकतरा स्यादिति भूयो विमृशां विमर्शमर्हेत्। स्यादेतद् गतित्रयमपि सस्वरं मूलतो यजुःष्विति प्रतिगति विरामो दातुमिष्टः। एवमपि त्रिस्वरं त्रिगति क्रिप. न सिद्ध्येत्। प्रतिगति 'यात' इत्याख्यातस्य पृथगन्वयस्याऽभ्युपेयत्वादेकैकगतियुक्ताऽऽख्यातत्रितयस्य लाभादिति।

[k]) पश्चादर्थे वर्त्तमानोऽनुः (तु. मै १, १०, १३) अन्य. भवत्युत गतिरिति स्वराङ्कणाऽनुपलम्भाद् विवेक्तुं दुर्लभं द्र.।

[l]) अस. सासस्व. (पा ६, १, २२३)। उप. यद्र.। वा. क्रिवि. इति द्र.।

[m]) समास-स्वराद्यर्थं तुटि. 'अनु-ष्वध-'।

६, २, ५; काठ २०, ३; क ३१, ५.

?अनुसूया[a]- -या खि ३, १७^{२}, ५.

?अनु-सूर्य[b]- -र्यम् शौ १९, ४९, ५.

अनु√सृ, अनु···असरन् ऋ ९, ६, ४.

अनु···सस्रुः ऋ ५, ५३, २[c]; ७, ९०, ४[d].

अनु√सृज्, ¶अनुसृजति काठ १३, ६; अनुसृजन्तु पै ५, ७, ५; अनु···असृजन् ऋ १०, ६६, ८. ¶अन्वसृज्यत तै ७, १, १, ४^{२}[e]; ६^{२}[e]; काठ ८, ११; ३४, ७; क ७, ८; ¶अन्वसृज्यन्त मै १, ६, ११; ¶अन्वसृज्यन्त मै २, ५, ५.

अनु-सर्ग- अन्°

?१अनु-सृष्ट[f]- -ष्टः मै २, ५, ५¶.

२अनु-सृष्ट[g]- -¶ष्टः मै २, ५, ५; काठ १३, ५^{२}; -¶ष्टम् मै २, ५, ५; काठ १३, ५; -¶ष्टस्य मै ४, २, १४; -ष्टान् मा २४, १६; का २६, ४, १; मै ३, १३, १४.

¶अनु-सृष्टि[h]- -ष्टिः मै ४, २, १४.

अनु√सृप्, अनुसर्पति शौ ९, १३, ७; अनुसर्पन्ति शौ ९, १३, १७; पै १६, ७५, ७; ८; अनुसपतु, अनु(सर्पन्ति) पै १६, ७४, ७.

अनु-सर्प*[i]- -०र्प शौ २, २४, ४; पै २, ४२, ३.

अनु-सृप्ता- ?अनसृप्ता- द्र.

अनु-सृप्य[j] पै १६, ९१, ५.

अनु-सेषिधत्- अनु√षिध् द्र.

अनु√स्तृ>स्तृ, ¶अनुस्तृणाति काठ २५, ५; क ३९, २.

¶अनु-स्तर(ण→)णी[k]- -णी तै ६, १, ६, ७; ७, ५; मै ३, ७, ४^{२}; ४, ७, २^{२}; काठ २९, २; क ४५, ३; -णीम् तै ६, ६, ७, १; ७, १, ६, ४^{२}.

अनु√स्पश्

अनु-पस्पशान[l]- -नः शौ ६, २८, ३; -नम् ऋ १०, १४, १; मै ४, १४, १६; शौ १८, १, ४९.

---

[a]) सुपा. अष्ट इति कृत्वा 'अनू-असूया' इति शोधः द्र.।

[b]) पाठ-याथार्थ्यं प्रति भवति सन्देहः । यनि. स्वर-विरोधाद् मूको. व्यवस्थाऽभावाच्च । स्वरविरोधस्तावत् । अत्र प्रास. वा स्याद् अस. वा बस. वा । प्रथमोत्तमयोः कल्पयोः पूपप्रस्व. स्याद् मध्यमे च सासस्व., न तु कथञ्चिदपि परादिस्वर इति । अथ मूको. अपि द्वैविध्यमुपलभ्यते । भूयश्च 'अहिसूर्यम्' इति पठ्यतेऽल्पीयश्च 'अनुसूर्यम्' इति । प्रथमे प्रकारे 'अहि । सूर्यम्' इति पदद्वयी संभाव्येत (तु. पै १४, ४, ५; वैतु. सा. पाण्डु. च) । द्वितीये प्रकारे 'अनु । सूर्यम्' इति पदद्वयी संभाव्येत (वैतु. W. 'अनूत्सूर्यम्' इति [तु. ओत्सूर्यम् शौ ४,५,७]) । प्रकारद्वयेऽपि यनि. स्वरः 'सूर्यम्' इत्यस्य पृथक्-पदतां सूचयंस्ततः पूर्वम् 'अन्वहम्' इत्यस्य मौलिकं श्रवणमुपस्थापयेत् ।

[c]) 'मरुतः' (द्वि३) इत्येतदाक्षेपेण प्रकरणसुलभेन कर्माकाङ्क्षा पूरणीया (वैतु. सा. यस्य वृष्टि- इत्येतत् कर्तृप्रत्ययान्ततया मरुत्परतया च विब्रुवाणस्य कर्म-नैराकाङ्क्ष्यं दुर्लभं [तु. सस्थ. टि. वृष्टि-]) ।

[d]) 'यज्ञकर्मानुराधितेन्द्रवायुकृतवृत्रविनाशम्' इति शेषः । अनोर् गतित्वाभावमिच्छतः GW. अन्वयश्चिन्त्यः ।

[e]) एतदादिषु स्थलेषु अनुर्न कप्र. (तु. मै १, ६, ११; वैतु. भा. यस्तृतीयार्थे कप्र. अनुर् इत्याह) ।

[f]) अनन्तरगतिस्वरे (पा ६, २, ४९) सुलभेऽप्यन्तोदात्तनिगमान्तरसर्वस्वविरोधात् प्रामाण्येऽस्य सन्देहो भवति (तु. संटि.) ।

[g]) अनन्तरगतिस्वरे प्राप्ते (तु. नापूटि.) प्रवृद्धादित्वम् उसं. (पा ६, २, १४७) ।

[h]) गस. क्तिन्नन्त-कृत्-प्रस्व. (पा ६, २,१३९) । ननु नित्-प्रत्ययान्तत्वादाद्युदात्तेन उप. भाव्यमिति । सत्यमेतत् । सामान्येन तथैव भवति । एवं सत्य् अपि कानिचिदुक्तप्रत्ययनिष्पन्नानि सन्त्यपि प्राति. अन्तोदात्तानि श्रूयन्ते (तु. वृष्टि-, साति- प्रमृ. [पा ३, ३,९६;९७]) । प्रकृतस्य तु प्राति. अयमपरो विशेषो भवति । यथेदं सामान्येनाऽऽद्युदात्तत्वेनैव श्रूयमाणं सत् क्वचिदिवाऽन्तोदात्तत्वेन श्रूयते (तु. माशब्रा. ११, २, १, ३) । ननु गस. 'तादौ' (पा ६, २, ५०) इति पूपप्रस्व. स्यादिति । नेति । 'निति' इति विशेषणादाद्युदात्तनिगमपरतयैव तस्याऽनुशासनस्य चरितार्थयितुमौचित्यादिह च प्र. नित्त्वस्य वस्तुतोऽतन्त्रत्वात् ।

[i]) पचादित्वाद् अचि थाथादि-स्वरः (पा ६,२,१४४)।

[j]) गस. ल्यबन्तं रू. । 'निःसृप्य' इति शौ (११, १, २५) पाभे. ।

[k]) गस. कर्मणि ल्युट् । कृत्-प्रस्व. (पा ३,३,११३; ६, १, १९३; २,१३९) । स्त्रियां ङीपः (पा ४, १, १५) पित्त्वान्निघाते स्वराऽपरिवर्तकत्वम् ।

[l]) गस. कानजन्त- कृत्-प्रस्व.(पा६,१,१६३;२,१३९)।

†अनु-स्पष्ट[a]- -ष्टः ऋ १०, १६०, ४; शौ २०, ९६, ४.

†**अनु√स्पृश्**, अनुस्पृश ऋ ४, ४, २; मा १३, १०; का १४, १, १०; तै १, २, १४, १; मै २, ७, १५; काठ १६, १५; क २५, ६.

अनु√स्फुर्, अनु···स्फुरान् ऋ ६, ६७, ११.

अनु-स्फुर्[b]- -रम् शौ १, २, ३.

अनु√स्फूर्ज्>स्फूर्जि[c], अनुस्फूर्जयति पै १६, १४२, ८.

अनु√स्मृ, अनु···स्मराथः ऋ १०, १०६, ९.

?अनु-स्मरम्[d] खि २, १४, ९.

¶**अनु√स्रु**, अनुस्रवति मै ३, ४, ५.

अनु(न्-उ)स्रयामन्[e]- -याम्णे ऋ ४, ३२, २४.

अनु√हन्, अनुहताम् पै १०, १२, ४.

?अनुजिघांसि[f] पै ५, २७, ७.

अनु-घन्[g]- -घ्नेन मै ४, १४, १७.

अनु√२हा, अनु···जिहाते ऋ [३, ३१, १७; (४, ४८, ३)]; †अनु···जिहते ऋ ६, १८, १५; मै ४, १२, ३; काठ ८, १६; अनु[३]···जिहाताम् ऋ ७, ३४, २४; †अनु[६]···अजिहत ऋ १०, ८९, १३; तै १, ७, १३, १.

?अनूजहिरे शौ १८, ३, ४६‡[h].

अनु-हाय[i] तै ३, २, २, २; ७, १, १, २¶; ¶मै २, ५, ६; ¶काठ ११, ४; २३, ४; शौ ५, १८, ९; पै ९, १८, २.

¶**अनु√हु**, अनुहूयन्ते काठ २१, १०[२]; २७, १०.

¶**अनु√हूर्छ्**, अनुहूर्छन्ति मै १, १०, ७; काठ ३६, १.

अनु√हृ, *अनुजहिरे शौ १८, ३, ४६‡[j].

अनु√ह्वे(>हु), †अनु···हुवे ऋ [१, ३०, ९; (८, ६९, १८)]; कौ २, ९४; जै ३, ९, ९; शौ २०, २६, ३; अनुह्वयामसि शौ ५, ३०, १७; ८, १, १५; पै ९, १४, ७; अनुह्वय ऋ ५, ५३, १६. अनु···जोहवीतु शौ ६, ७३, ३.

अनु-हव[k]- -वम् शौ १९, ८, ४.

अनु-हूत[a]- -तः शौ ५, ३०, ७; पै ९, १३, ७.

अनू(नु+उ)-

अनू-क[l]- -कम् शौ ४, १४, ८; पै १६, ९९, २; -कात् शौ ९, १३, २१; पै १६, ७५, ११.

अनूक्य[m]- -क्यम् शौ ९, ६, १; पै १६, ५३, १६; १११, १; -†क्यात् ऋ १०, १६३, २; शौ २, ३३, २; २०, ९६, १८; पै ४, ७, २; ९, ३, १०; -क्ये शौ ११, ३, ९; पै १६, १४७, ५.

आनूक[n]- -कम् ऋ ५, ३३, ९.

---

[a]) कर्मणि क्तेऽनन्तरगतिस्वरः (पा ६, २, ४९)।

[b]) वीप्सायां वा (तु. सा.) तृतीयार्थे वा अस. सासस्व. (पा ६, १, २२३)। उप. भावे कः प्र. उसं. (तु. सा.)। वा. क्रिवि.। यद्वा गस. थाथादि-स्वरः (पा ६, २, १४४)। अस्मिन् कल्पे उप. इगुपधलक्षणः कः। शर्- इत्यत्र विशेषणत्वेन चाऽन्वयः (तु. MW.)।

[c]) तु. अभि√स्फूर्ज् (शौ १२, ५, २०)।

[d]) 'अनु-स्मरत्->-रन्' इति स्वर-शोधपूर्वकं शत्रन्ततया पठ्येत (तु. संटि.)।

[e]) तस. नञ्-स्वरः (पा ६, २, २)। उप. यद्र.।

[f]) संस्कारसापेक्षे सुपा. '-घांसति' इति शोधः स्यात्।

[g]) गस. पचाद्य्-अचि थाथादि-स्वरः (पा ६, २, १४४)। उक्ते च प्र. वर्णविकाराद्य् अन्यद् यद् वैयुत्पत्तिकं वैशेष्यं भवति तद् घन्- इत्यत्र द्र.।

[h]) 'अनूहिरे' इति ऋ (१०, १५, ८) पाभे.। मन्त्रस्य पूर्वार्धीयं पादद्वयम् ऋ. त्रैष्टुभं भवति। तदेव शौ. जागतं श्रूयते। तेन शौ. प्रतिपादमेकमक्षरमधिकं भवति। एस्थि. जकारमध्यत्वेन शौ. मूलतः, प्रामाण्यं भजद् एतत् पदं '(ह्रि>)हि[अनु√हृ यद्र.])' इत्यस्मिन्नंशे विकृतमिति संभाव्यते (तु सा.; वैतु. पाण्डु.)। गत्यंशे दीर्घस्य प्रामाण्यं तु संदिग्धं भवति मूको. उभयथोपलब्धेः।

[i]) गस. ल्यबन्त-कृत्-प्रस्व. (पा ६, १, १९३; २, १३९)।

[j]) तुटि. ?अनूजहिरे (<अनु√२हा)।

[k]) गस. भावे अप् प्र. उस.। थाथादि- स्वरः (पा ३, ३, ७२; ६, २, १४४)।

[l]) बस. अनू- (<अनु+उ* [<अव्-<√अव्]) +स्वार्थे कप् (तुटि. अभीक-)। यत्तु अनु+अकु*- (<√अञ्च्) इति कृद्वृत्ते गस. इति MW., तत्र स्वरो दुर्घटः (तु. पा ६, १, २२२)। यदप्य् उप. <√उच् इतिमात्रं ततो विशिष्टमाह सा. (तु. शौ २, ३३, २), तत्रापि पूर्ववच्चोद्यं (तु. पा ६, २, १३९)।

[m]) स्वार्थे यत् प्र. उसं. तित्-स्वरितश्च (पा ५, ४, २५; ६, १, १८५)। पं. स्थाने द्वि. सुश्रवतरा स्यात् (तु. दोषण्यम् इत्युत्तरार्धे)। यत्तु सा. अनु√उच्+ण्यत् इत्याह (तु. शौ २, ३३, २) तत्र लघूपधगुणाऽभावो दुर्घटः (पा ७, ३, ८६)।

[n]) तस्येदमित्यर्थे अण् (पा ४, ३, १२०) तत्स्वरश्च। वा. क्रिवि. इति BW. यदाह, तच्चिन्त्यम्। प्रकरणतोऽस्य वि. असतः संप. च सतस्तथात्वावृत्तेः (तु. सा. [वा. एव नार्थे?])।

अनू-काश- अनु√काश् द्र.

अनूक्त- अनूचान-, १अनूच्य, २अनूच्य-

अनूच्यमान- अनु√वच् द्र.

अनूचीन- ३अनूच्य- अन्व(नु√अ)ञ्च् द्र.

¶**अनूच्छ्रि** (नु-उद्√श्रि), अनूदश्रयत म २, २, ८; काठ १०,१०.

¶**अनू(नु-उद्)ज्√जि,** अनूदजयत् मै ४, ३, २; काठ १२, ७^{२}.

अनू(न-ऊ)ति[a]– -ती[b] ऋ ६, २९, ६.

अनूत्था (नु-उद्√स्था), अनु··· उत्तिष्ठतु खि ६, १, २; ¶अनूदतिष्ठन् मै ४, ८, ५.

¶अनूत्-स्थाय[c] तै ३, ४, १०, ३; ६, २, ५, ५; मै १, ९, ८; काठ ९,१५:२२,११; क ३५,५.

¶**अनू(नु-उद्)त्√सृज्,** अनूत्सृजति मै ३, २, ७; काठ २०, ८; क ३१, १०; अनूत्सृजन्ति मै ३,२,४; अनूत्सृजेत् काठ १३,३.

¶**अनू(न-ऊ)दक**[d]– -कम् मै ३,१०,७.

¶**अनू(नु-उ)द्√अय्** (<√इ)

अनुद(द्-अ)यय[c] काठ २४, ४; क ३७, ५.

¶**अनू(नु-उ)द्√इ,** अनूदयाथ मै ३, ७, १.

अनूदेति काठ ८, ५; क ७, १; अनूद्यन्ति मै १, १०, १८; ३, ७, १^{२}; काठ ३६, १३; अनूदैत् मै १, ६, १२; २, ५, ३; काठ १३, ३.

अनूद्-यत्– -द्यन्तम् काठ १३, ४.

¶**अनूदे** (नु-उद्-आ√इ)

अनूदेत्य काठ २२, ११; क ३५,५.

¶**अनू(नु-उ)द्√द्रु,** अनूद्द्रवन्ति काठ ८, ११; क ७, ८; अनूद्द्रवेत् काठ ६, ६.

अनूद्-द्रुत्य काठ ६, ४; ९, १६^{८}; १०, ५; २१, ८; १०.

¶**अनू(नु-उ)द्√घृ** (<ह्व)

अनूद्-घृत्य[e]– -त्यः तै २, २, ४, ७.

†?**अनू(न-ऊ)घस्**[f]– -घाः ऋ १०, ११५,१; कौ १,६४; जै १,७,२.

अनू(न-ऊ)न,ना[a]– नः खि २,१०, २; शौ ७, ८६, ३; पै ११, १, ८; –नम् ऋ १, १४६, १; २, १०, ६; ४, २, १९; ६, १७, ४; खि ३,७,५; मै ४,१३,४†; काठ १६,२१†; शौ ७, ८६, ३; १२, ३,४८;–नस्य ऋ ८,५५,५;–ना ऋ ७, २७, ४; –नाः ऋ ३, १, ५; ८,१६,४; –नेन ऋ ४,५,१.

†**अनून-वर्चस्**[g]– -र्चाः ऋ १०, १४०, २; मा १२,१०७; का १३, ७, ६; तै ४, २, ७, ३; मै २, ७, १४; काठ १६, १४; क २५, ५; कौ २, ११६७.

¶**अनू(नु√उ)न्द्,** अन्वौन्दन् काठ २७, ५; क ४२, ५.

†**अनूप**[h]– -पाः ऋ १०, २७, २३; –पे ऋ ९, १०७, ९; कौ २, ३४८; जै ३, २९, ५.

---

[a]) तस. नञ्-स्वरः (पा ६, २, २) । उप. यद्र. ।

[b]) स१ द्र. (वैतु. सा. तृ१ इति; GW. प्रभृ. च१ इति [कथं बत रक्षाया अभावमप्युद्दिश्य देवतायाः सुहवत्वं काम्येतेति त्वत्राऽर्वाञ्चः प्रष्टव्याः स्युः]) । सा. व्यु.? (तु. सस्थ. टि. ऊती) ।

[c]) गस.ल्यबन्त-कृत्-प्रस्व. (पा ६,१,१९३;२,१३९)।

[d]) सस्व.कृते तु.अनुदका-। उप. नैरुक्तिकं दीर्घादित्वं द्र.।

[e])गस. क्यबन्त- कृत्- प्रस्व. (पा ६, २, १३९) ।

[f]) बस. अन्तोदात्तः (पा ६, २, १७२) । सकारान्तं प्राति. नकारान्तमुतेत्यत्र पूर्वमिति पपा. । तेन च तन्मतेऽस्त्रीपरमेतद् भवति (तु. पावा ५, ४, १३१)। एतदभ्युपायेऽपि यत् सा. लोकशब्दयोजनेन द्यावापृथिव्योरस्त्रीत्वं सिषाधयिषति, तन्मन्दम् । पूर्वार्धे तयोर्मातृत्वेनोपचारस्य तेन स्वयमभ्युपेतत्वात् । एस्थि. अस्याऽस्त्रीविषयत्वे सति कैम्पर्यस्य व्यवस्थेयत्वमवधेयम् । अथवा कृतसमासान्तत्वं द्र. । संहितायां तथापि निर्विशेषं संभवान्निगमान्तराऽभावे विनिगमनस्य दुःसाधत्वाच्च । एवं तावदस्त्रीविषयत्वे सत्ययं समासान्तो भवतीत्यस्य लोकमात्रपरत्वमुक्त्वा यथाश्रुत्येव वेदेऽनुशिष्यम् । तत्राऽत्र समासान्तस्य सावसरत्वं भवतीत्येव तथ्यम् । सकारान्तनकारान्तयोः प्राति.अन्योन्यनिरपेक्षं श्रुत्युपलम्भात् पूर्वोक्तदिशा विनिगमनाऽभावे यतरस्य कतरस्यापि प्राति. इह रू. स्यादित्यस्य सुवचत्वात् ।

[g]) बस पूपप्रस्व. (पा ६, २, १) ।यद्वा तस. नञ्-स्वरः (पा ६, २, २)। उप. ऊन-वर्चस्- इति बस. द्र. ।

[h]) बस. पाप्र. अनु-ऊ(<२अ)प्- +अः (समासान्तः)। इत्येवं व्याकृतौ सत्याम् उप. आदि-विकारः (पा ५,४,७४; ६,३,९८) प्रत्ययस्वरश्च । यत्तु सूत्रे 'ऊद्' इत्यस्य स्थाने 'उद्' इत्यनेनापि पठितेन सता पूर्वसवर्णदीर्घत्वेनाऽभीष्टरूपसिद्धिप्रस्तावे प्रत्युपस्थाप्यमानेऽवग्रहदोषः पाम. अचोदि, तद् यावदुपलब्धि पपा. अवग्रहस्यैवानुपलम्भाद् उप. ह्रस्वदीर्घान्यतरादित्वस्य विनिर्णेतुं दुःशकत्वात् तद्विषयस्योट्टङ्कनस्य नितरामनवसरत्वाद् भग्नभित्तिकत्वं द्र. । पामउ. च दीर्घोच्चारणस्याऽत्यावश्यकत्वाभावस्याऽवग्रहाभावे हेतुत्वमिव प्रदर्श्यमानमपि नादरणीयम् । यथाकामह्रस्वदीर्घान्यतरोच्चारणसद्भावस्याभीष्यमाणस्य सतो नितान्ताऽवग्रहाभावं प्रति कारणतानुपपत्तेरिति यावत् । वस्तुतस्त्वत्र वैयाकरणे प्रकरणे पूर्वसवर्ण-

अनूप्य[a]– -प्याः काठ २,१; क १,१३; शौ १,६,४; १९,२,२; पै ८,८,८.

¶अनू(नु-उ)प√जीव्, अनूपजीवन्ति मै ३, १०, ४.

¶अनू (नु-उ) प√धा>दधा, अनूपदधाति काठ २१, ४; अनूपदध्यात् तै ५,२,७,२; क ३१,१९. अनूपधीयन्ते मै ३, २, ९^{३}.

¶अनू(नु-उ)प√नम्, ?अनुपनमति[b] मै ४, २, ९.

¶अनू(नु-उ)प√स्था>तिष्ठ, अनूपतिष्ठन्ते[c] मै ३,२,७; ४,७,९; अनूपतिष्ठन्ते मै ३, २, ३; ९, २; काठ २९, ८; क ४, १.

अनूपा(नु-उप√आ)स्, ?अनूपास्ते[d] पै १६, २१, १०.

¶अनूपे(नु-उप√इ), अनूपयन्ति[e] तै १, ७, ५, ४.

अनू-राध- अनु√राध् द्र.

अनू-रोह- अनु√रुह् द्र.

अनू(न-ऊ)र्ध्वभास्[f]– -भासः ऋ ५, ७७, ४.

¶अनू(न-ऊ)र्ध्वंभावुक[g]– कम् तै २, ६, ५, ३.

†अनू(न-ऊ)र्मि[h]– -र्मिम् ऋ ८, २४, २२; शौ २०, ६६, १.

अनू-वृज्- अनु√वृज् द्र.

अनू-वृत्- अनु√वृत् द्र.

¶अनू(न-ऊ)षरिह्[i]– -रिहः मै १,६,३.

†अनृ(न-ऋ)क्षर, रा[j]– -रः ऋ. १, ४१, ४; २, २७, ६; –रा ऋ १, २२, १५; मा ३५, २१; ३६, १३; का ३५, ४, २०; ३६, १, १३; मै ४, १२, २; काठ ३८, १३; शौ १८, २, १९; –राः ऋ १०,८५,२३; शौ १४,१,३४.

अनृ(न-ऋ)च्[k]– -चः ऋ १०,१०५,८.

¶१अनृ(न-ऋ)च[l]– -चम् मै ३, ३, ५; काठ २१, ५; क ३१, २०. [°च- एक°]

२?अनृ(न-ऋ)च[m]– -चाय पै ८,११,७.

अनृ(न-ऋ)च्छ(त्→)न्ती– -न्तीः पै १, ३६, १–३.

अनृ(न-ऋ)जु[h]– -जोः ऋ ४, ३, १३.

अनृ(न-ऋ)ण[n]– -णः मा १९, ११; का २१, १, १०: तै ३, ३, ८, २; ४¶; ६, ३, १०, ५¶; मै ३, ७, ८¶; ४, १४, १७; ¶काठ १३,२; २६,२; क ४०, ५¶; शौ ६,११७,१;२; पै १६, ४९,१०; –णम् पै १६,५०,१; ८; –णाः मै १, १०, २०^{२}¶; काठ ३६, १४^{२}¶; शौ ६, ११७, ३^{४}; पै १६, ५०, २^{४}[o];

दीर्घात्मिकैव मौलिकी शाब्दी प्रवृत्तिः । तन्मूलश्चाप्यवग्रहाभावः । पूर्वोत्तरयोरुभयोर्वर्णयोः स्थान एकस्य समानस्य सत आदेशस्य विभागानर्हत्वात् । एवं च **अनूप-**, **अभीपॅ-**, **द्वीप-**, **नीपॅ-**, **प्रतीपॅ-**, इत्येतान्येव प्राति. मौलिकानि सन्तीतरेषां सजातीयनिष्पत्तीनां वृत्तिसामान्योपजनितप्रवृत्तीनां सताम् **अन्तरीप-**, **समीप-** प्रभृ. आदर्शस्थानीयानि द्र. । **अनूप-** इत्यस्माच् च देशात्मकवृत्तिविशेषवतः सतो विवेककरणीव **'अन्वीप-'** इत्यस्य साम्यप्रवृत्तितो द्वितीयवर्गानुपातिनी प्रवृत्तिर् द्र. । इह च सर्वत्र उप. विषये **२अप्-** इति स्याद् √आप् इति वेत्यस्य विनिर्णयः **२अप्-** इत्येतत्-प्रसङ्गेन यद्र. । अन्ततः, **'द्व्यन्तर्'** इत्यादिविषयोपनिबन्धः **'द्व्यनवर्णनिपातेभ्योऽपः पूर्वसवर्णदीर्घः'**, **'समन्तभ्र्यामीत्'**, **'अनोरदेशे'** इत्याकारकः स्याद् इति विमृशां विमर्शाय कल्पताम् (तु. पा ६, ३,९७;९८) ।

[a]) तात्रभविको **यत्** प्र. स्वरितश्च (पा ४,४,११०; ६,१,१८५) ।

[b]) विकृता इव मूको. भवन्ति (तु. संटि.) । यमु. तु स्वरोऽलक्षणो योगश्च विपरीतार्थकर इति कृत्वा **'६अ-सू-(सु-उ)पनमति'** इत्याकारकः **शोधः** विचारकोटौ द्र. ।

[c]) वैतु. टि.**२अनु** (तै ५,७,९,२) । यदनु तत्राऽसौ नि. कप्र. इष्टो भवति गतिश्च नेष्ट इति ।

[d]) 'अनुवस्ते' इति शौ (११,६,१०) पाभे. । '(अ)नूपस्ते' इति पै. मूको. ज्ञापयति यथा मूलतस्तत्रापि शौ. अभिन्नैव सती श्रुतिः प्रामादिकम् (**अनूवस्ते>°नूॅपस्ते** >°**नूप**°) इत्याकारं वर्णविकारमुपगतेति । एस्थि. मुपा. चिन्त्यकोटिमनुप्रविष्टः सन् **शोधार्हः** स्यान्न तु वास्तविकस्य कस्यचित् पाभे. सूचक इति ।

[e]) वैतु. टि. **२अनु** (तै १,७,५,३) यत्रासौ नि. कप्र. ।

[f]) पदविभागः सस्व. च **'अजात-शत्रु-'** इत्यत्र द्र. (उप. तु. **ऊर्ध्व-ग्रावन्-**) । यत्तु सा. **'ऊर्ध्व-भास्-'** इत्यस्य उप. अग्निपरत्वमपि विकल्पयति, तच्चिन्त्यम् । नञ्पूर्वत्वे बस. अन्तोदात्तत्वप्रसङ्गात् (पा ६, २, १७२) ।

[g]) **अ-नग्नंभावुक-** इत्यत्र गटि. अत्रापि प्रमाप्येत ।

[h]) तस नञ्-स्वरः (पा ६,२,२) । उप. यद्र. ।

[i]) सस्व. नापूटि. द्र. । उप. **ऊष- + √रि(लि)ह् + क्विप्** ।

[j]) बस. अन्तोदात्तः (पा ६, २,१७२) । उप. √ऋष् **+क्सरन्** (पाउ ३,७५) । नित्स्वरः ।

[k]) सस्व.नापूटि.द्र. । समासान्ते प्र.विकल्पः**उसं.**(तु.नाउ.) ।

[l]) बस. समासान्तः अः प्र. (पा ५,४,७४) । तत्स्वरेणान्तोदात्तः । समासान्ताऽभावपक्षे तु. नापू. रू. ।

[m]) सांशयिकः पदविभागो भवति विमर्शविशेषसापेक्षः ।

[n]) बस. अन्तोदात्तः (पा ६,२,१७२) । उप. यद्र. ।

[o]) **'अनृणः'** इति **शोधः** द्र. (तु. **'?अदीप'** इत्यत्र सस्थ.टि.)

-णेन काठ १३, ३¶.

१अ॒नृ(न्-ऋ)त, ता[a]- -तम् ऋ १, २३, [२२; (२३); १०, ९, ८; (९)]; १०५, ५; १३९, २; १५२, ३; ७, २८, ४; ८, ६२, १२; १०, १०, ४; १२४, ५; †मा ६, १७; †का ६,५,५; ¶तै २, ४, १, २; ५, ५, १; ६; ¶मै १, ९, ३; १०, ११^{३}; २, १, ४^{२}; ४, २^{४}; ४, ७, ५; १४, १७$^{४}\$$; ¶काठ ६, ७^{२}; ८, ७; ९, ११; १०, ७; १२, ५; ११^{४}; १४, ५^{३}; २३, १^{२}; ६; २७, ४; ७^{३}; ८; ३४, ११; ३६, ५^{३}; ३७, १^{२}; ¶क ४, ६^{२}; ७, ४; ३५, ७^{२}; ४२, ४; शौ १, १०, ३; २, १५, ५; ४, ९, ७; १६, ६; ६, ६१, २; ३; ७, ९४, ३†; ९, १५, २३†; १०, २, १४; ५, २२; १२, ३, ५२; १८, १, ४†; १९, ४४, ८; पै १, ९, ३; ३३, ३; २, २६, १; ५, ३२, १; ३६, ४; ५; ८; ६, ५, १२; ८, ३, १३; ९, २२, ४; १२; १६; २३; १५, ३, ८; १६, ६०, ५; ८; ६९, १२†; १३०, १; -तस्य ऋ ५, १२, ४; ७, ६०, ५; ६५, ३; ८६, ६; १०, ६७, ४; १००, ७; मै ३, ७, ३¶; शौ २०, ९१, ४†; -ता ऋ २, २४, ६; ७; ७, ६१, ५; ८४, ४; -ताः पै २, ५५, ३; ४; -तात् मा १, ५; का १, ३, १; ¶मै १, १०, १२^{२}; २, ४, २; ¶काठ १२, ११; ३६, ६^{२}; पै ७, ८, ८; -†तानि ऋ १, १५२, १; २, ३५, ६; मै ४, १४, १०; -ते मा १९, ७७; का २१, ५, ४; मै ३, ११, ६; काठ ११, ३; ३८, १; -तेन ऋ १०, ८७, ११; ¶मै १, ९, ३; ११, ५; २, ४, २; ¶काठ ९, ११; १२, ११; १४, ५; शौ ६, ७१, ३; ७, ७३, २; ८, ३, ११†; पै २, २८, २; ५, ३२, ६; १६, ७, १†; -†तेभिः ऋ ७, १०४, ८; शौ ८, ४, ८; पै १६, ९, ८. [°त- सत्य°]

†**अ॒नृत-दे॒व**[b]- -वः ऋ ७, १०४, १४; शौ ८, ४, १४; पै १६, १०, ४.

अनृत-द्वि॒ष्[c]- -द्विषः ऋ ७, ६६, १३.

¶**अनृत-प॒शु**[d]- -शू मै १, १०, १२; काठ ३६, ६^{२}.

अनृत-वा॒च्[e]- -वाक् काठ ४, १६; शौ ४, १६, ७; पै ५, ३२, ८.

अनृत-वादि॒न्[f]- -नम् पै ९, १९, २.

¶**अनृतवादि॒नी**[g]- -नी मै ४, ५, २.

२अनृ(न्-ऋ)त॒[h]- -ताः ऋ ४, ५, ५.

¶**अनृ(न्-ऋ)तु॒**[h]- -तु^{२i}, -?तुभिः[j] मै ३, ६, ७.

अ॒नृ(न्-ऋ)तुपा[k]- -पाः ऋ ३, ५३, ८.

¶**अ॒नृ(न्-ऋ)त्विज्**[a]- -त्विजे काठ २८, ५^{३}; क ४४, ५^{३}.

अने(न्-एक>)का- -काम्?[l] पै ६, २, ६‡.

अनेक-वत्- -वन्तम् काठ २१, १३.

¶**अने (न्-ए) कादशि (न्→) नी**- -नीम् काठ २२, ७; क ३५, १.

अ॒ने(न्-ए)जत्[a]- -जत् मा ४०, ४; का ४०, १, ४.

अने(न्-ए)जित[m]- -तः पै ९, ६, १२.

---

[a]) तस. नञ्-स्वरः (पा ६,२,२)। उप. यद्र.।

[b]) बस. पूपप्रस्व. (पा ६, २, १)। उप. यद्र.।

[c]) उस. क्विबन्त-कृत्-प्रस्व. (पा ३,२,६१; ६,२,१३९)।

[d]) तस. मध्यमपदलोपः सासस्व. च (पा ६,१,२२३)। तु. अनृतेष्टका- माशब्रा ६, २, १, ३८।

[e]) उस. ताच्छीलिक-क्विबन्त-कृत्-प्रस्व. उप. दीर्घश्च (पावा ३,२,१७८; पा ६, २,१३९)। यद्वा 'अन्-ऋत-वा॒च्-' इति नञि पूप. बस. अन्तोदात्तः (पा ६, २, १७२)। अस्मिन् कल्पे उप. तस. मध्यमपदलोपः (तु. नापूटि.)।

[f]) उस. णिन्यन्त-कृत्-प्रस्व. (पा ६,२,१३९)।

[g]) स्त्रियां ङीपः (पा४,१,५) पित्त्वान्निघाते स्वरेऽविशेषः।

[h]) बस. अन्तोदात्तः (पा ६,२,१७२)। उप. यद्र.।

[i]) द्वि१ अन्वये क्रिवि. द्र.।

[j]) विकृत इव मूको. असंगतश्च सुपा. द्र.। तत्स्थाने °मितं॒ ना॒विष्कृतदताभिक्र॒म्यम् (=न॒। आ॒विष्कृत-दता। अभि-क्र॒म्यम्)' इत्येवं शोध-पूर्वकं पठ्येतेति मतं भवति।

[k]) तस. नञ्-स्वरः (पा ६, २, २)। उप. सप्तम्यन्त उपपदे √१पा + विच्।

[l]) '°मिदेकाम्' (>°मंदे°>°मने°) इत्नाकारो विकारः मूको. प्रत्येतव्यः (तु. ऋ १०, ५, ६; शौ ५, १,६)। अन्यथाऽनभीष्टार्थ-प्रतीतिकरत्वे मर्षितेऽप्यवरतो रू. द्वित्ववद् बहुत्ववद्वा स्यान्न त्वेकत्ववदिति दिक्। एस्थि. शोधः सावसरः द्र.।

[m]) तस. उप. √एज्>एजि+क्तः (कर्मणि)। अथवा बस. उप. √एज्+क्तः (भावे)। अथापि वा तस. एव स्याद् उप. च (√एज्>)एज-+इतच् (पा ५, २, ३६)। एवं मूको. वैविध्येनाऽर्थवति सत्यपि यद् 'अनेजातः' इति नितरां दुरूहो सुपा. धृतो भवति तच्चिन्त्यमिति नेव वचोऽन्तराऽपेक्षि ‡.

†**अ-नेद्य**[a]- -०द्य ऋ [८, ३७,१-६]; -द्यः ऋ १, [८७, ४; (२, २३, ११)]; १६५,१२; ५, ६१,१३; मै ४, ११, ३; काठ ९, १८; -द्याः ऋ ६, १९, ४.

अने(न्-ए)नस्[b]- -नः[c] ऋ ६,६६,७; -नसम् तै १, ८, ५, ३; -नाः ऋ १, १२९, ५; ७, २८, ४; ८६, ४; मै ३, १०, १¶.

अने(न्-२ए)व[d]- -वम् काठ १३, ३; -वा शौ १६, ७, ४?[e].

†**अने(न्-ए)हस्**[b]- -हः ऋ १, १८५, ३; ६, ५०, ३; ८, १८, २१; ३१, १२; ६७, १२; -हसः ऋ ३, ५१, ३; [५, ६५, ५; ८, ४७, १-१८]; ८, [(५,६७,४); १८, ५]; ४५, ११; १०, ६१, २२; मै ४, १२, ३; -हसम् ऋ १, ४०, [४; ३, ९, १; (५, ३४, ७; ८, १०३, ५; ९, ६६, ७)]; ६; [६, ५१, १६; ८,६९, १६]; ८, २२, २; ४९, ४; ५०, ४; १०, ६३, १०; खि ३, १, ४; २, ४; मा ४, २९; २१, ६; का ४, ९, ६; २३, १, ६; तै १, २, ९, १; ५, ११, ५; मै १, २, ५; ४, १०, १; काठ २, ३; ६; क १, १९; कौ १, ६२; जै १, ६, ८; शौ ७, ७, १; २०, ९२, १३; -हसा ऋ १, १२९, ९; ६, ७५,१०; मा २९, ४७; तै ४, ६, ६, ४; काठ ४६, १; पै ४, २४,७; १५, १०,१०.

?**अनेहा** ऋ १०, ६१, १२[f]; शौ ६, ८४, ३[g].

या. (३, २; ११, ४६) अनु =६अ(=अप)+*?१रण- [=ऋण- (तु. पावा ६, १, ८९; ऐब्रा ७, १३; यस्थ. स्क. दु. च) इति वा, =अर्ण- (MW) इति वा, =√रम्> *२रण- इति वा] इति कृत्वा बस. इति वा [यस्मिन् कल्पेऽन्तोदात्तः प्रसज्येत (पा ६, २, १७३)]। नैप्र. *अपार्ण- (प्रास. पूपप्रस्व.) >*अआर्ण- >*आर्ण->यनि. इति वाऽभिसंधीयेत। ६अ + *?२रण- (कर्त्रर्थे ?<√रम्) इति कृत्वा तस. पूपप्रस्व. (पा ६, २, २) इत्यपरा काचित्की व्यु. [तु. वें. (ऋ ६, ७५, १९ प्रभृ.), सा. (ऋ २, २४, ७; ६, ७५, १९; ७,४, ८ प्रभृ.)]। अथ *?१अर्- इति परार्थे सना. इति कृत्वा ततः व्यु. पर्येष्येत्यपि मतं भवति (WW १, ८४)।

[a] पा.? पपा. ह्यु १अरण्य- (यद्र.) इति प्राति. प्रादर्शि (तु. मा २४, ३९)। यनि. तावदुभयी व्यु. संभवति ताद्धिती सामासिकी च [='अरणानाम् अग्राम्यप्रदेशानां राजा इति कृत्वा तद्राजीयः अञ् प्र. उसं. ञित्स्वरश्च (पा ४,१,६८;६,१,१९७)। यद्वा. 'आगतमधिकारेऽरणं यस्य' इति कृत्वा मध्यपदलोपः '२आ-अरण-'(यद्र.)इति बस. स्यात् पूपप्रस्व.(पावा२,२,२४;पा६,२,१(तु. आ-देव-))]।

[b] 'अरणेऽधिकृतः' इति कृत्वा तद्राजीयः ञ्यः प्र. उसं. वृद्ध्यभावश्च [पा ५, ३, ११२ (तु. नापूटि.)]।

[c] व्यु.?। √*३अर्+करणे ल्युट् प्र. लित्-स्वरश्च [पा ३, ३, ११७; ६, १, १९३ (=ज्वलनपरिणामितापजनने करणम्)]। अग्न्युत्पत्तिकारणताविशिष्टे तात्पर्यदर्शने सदृशः सन्तोऽपि √*१अर् इत्यतः व्यु. आहुः या. (५, १०) प्रभृ. (यत्तु या. मतमुदाजिहीर्षुरपि सन् MW. यनि. नापू. सरूपात् प्राति. अभेदमाह, तन्मन्दम्। या. मतमनु मौस्थि. च तयोः प्राति. पार्थक्येन निर्देशार्हत्वात्)।

[d] स्त्री. ङीप् प्र. (पा ४, १, १५) स्वरेऽभेदकरः।

[e] स्वार्थिकः यप् प्र. उसं. [पा ५, २, १२० (तु. या. [९, २९] दे.[५,३] यौ १अरण- इत्येतदीयां व्यु. (यद्र.) एवाऽतिदिशन्तौ तस्मादभेदमिव यनि. तद्धितगम्यं प्रतिपादुकौ भवतः [तु. ऋ ६, ६१, १४ यत्रत्यस्य १अरण- इत्यस्य स्थाने मै ४, ११, २ इत्यत्रत्यः २अरण्य- इत्यात्मकः पाभे. अपि यनि. व्यु. श्रौतं लिङ्गं स्यात्]; वैतु. पाउ [३,१०२] √*१अर्+अन्य[न्] प्र. इति निर्माध्यमा व्यु. इति)]।

[f] द्विरुक्तयोः सरूपयोर्मध्य एकं यनि. द्वि३ एकं च ?अरण्यानी- (तु. टि.) >सं१ [तु. या (९, ३०)] इति वोभे अपि रू. द्वि३ इति वेत्यत्र भूयोऽपि विमृश्यताम्।

[g] 'अरणानि' इति ऋ (६, ६१, १४) पाभे.।

काठ **४६**,३. [°ण्य- अन्यतस्°]

आरण्य[a]– -ण्यः मा **६**, ६; **२४**, ३०; ३२; ३८; का **६**, १, ७; **२६**, ६, ५; ७, २; ८, ३; तै **२**, १, १०, २¶; ५,५,१२, १; मै **२**, ५, ५¶; **३**, १४,११; १३; काठ **४७**, २; पै **१५**, १२, ७; –ण्यम् मा **१३**, ४८–५१; का **१४**, ५, २–५; तै **१**, ६, ७, ४¶; **४**, २, १०, १; २; ३^{२}; ४; ¶५, २, ८, ६; ९, ३; ५$; ४, ५, २; ¶मै **१**, ४,१०; ६,५; ११, ८; **२**, ७, १७^{५}$; **३**, २, ५; ४, ३; १०; **४**, ४, १; काठ **१२**, ७; **१६**, १७^{४}; **२०**, ८; **२१**, ६; **२९**, ८; **३२**, ७; क **२५**, ८^{४}; **३१**, १०; २१¶; –¶ण्यस्य तै **१**, ६, ७, ३^{२}; मै **१**, ४, १०; काठ **३२**,७; –ण्याः मा **१४**, ३०; **१८**, १४; **३१**, ६‡[b]; का **१५**, ९, ४; **१९**, ५, २; **३५**, १,६‡[b]; ¶तै **१**, ६,७, ३; **२**, ४, ६, २; **३**, १, ४, २$; ४, ३, ५; $**४**, ३, १०, २; ७, ५, २; ५, १, ४, ३; २, ५, ५; ९, ५; ४, ९, २; १२, २; **६**, १, ८, १; ३, ७, ५; ५, ११, २; **७**, २, २, १; ३, ४, १; ¶मै **१**, ६, ५; $**२**, ८, ६, ११, ५; **३**, २, ३; ९, ७; **४**, ३, २^{२}; काठ **७**, ८; **१२**, ७; **१३**, १२; **१७**, ५; **१८**, १०; **२०**, ३; **२८**, १०; **२९**, ८^{२}; **३०**, ८; ९^{२}; **३५**, १५; क **२६**, ४¶; **२८**, १०; **३१**, ५¶; **४५**, १¶; शौ **५**, २१, ४; **६**, ५०, ३; **११**, २, २४; ७, २१; ८, ८; **१२**, १, ४९; **१९**, ६,१४‡[b]; पै **३**,३२, ६; **५**, २२, ५; **१५**, १३, ८; **१६**, १०६, ४; १५५, १; –¶ण्यात् काठ **२५**, ५; **३०**, १०; क **३९**, २; **४६**,८; –ण्यान् ऋ **१०**, ९०, ८; ¶तै **१**, ६, ७, ३; **२**, ५, ११, २; **५**, १, ४, २; ३, ९, ५; ६^{२}; ४, ३, २^{३}; ५, ५, २; **६**, ६, ४, ५; **७**, ३,१४,१$; ¶मै **१**,४,१०^{२}; **३**, १, ५; २, ७; ३, ६; **४**, ४, ६; ८, ८^{२}; ¶काठ **१९**,५; **२०**, ५; ८; **२१**, ७; **२८**, १०; **३२**, ७^{२}; **४३**,४$; ¶क **३०**,३; **३१**, ७; १०; **४५**,१; पै **९**,५,१२।; –¶ण्यानाम् तै **५**,४,३,२; काठ **३७**, ४; –¶ण्येन मै **१**, १०, २०^{२}; **३**,३,४; काठ **२१**,६; **३६**, १४; क **३१**, २१; –¶ण्येभ्यः काठ **२६**, २; क **४०**, ५; –ण्येषु तै **५**, ४,४,३¶; –ण्यैः शौ **३**, ३१, ३.

अरण्यानि[c]– -निः ऋ **१०**, १४६, २; ३; ५; –निम् ऋ **१०**, १४६, ६; –न्याः शौ **१२**, २, ५३; –न्याम् ऋ **१०**, १४६ ४.

?**अरण्यानी**[d]– -॒नि ऋ **१०**, १४६, १^{२}?[e].

अरण्ये(ण्ये-अ)नु√वच्

¶**अरण्ये(ण्ये-अ)नुवाक्य**[f]– -क्यः मै **३**, ३, १०^{४}; काठ **२१**, १०^{३}.

१अरणि[g]– -णयः पै **१३**, ३, ३; –णिभिः ऋ **१**, १२७,४; १२९, ५; –¶णिभ्याम् मै **३**, ६, ९;

---

[a]) तात्रभविकः णः प्र. तत्-स्वरश्च (पावा ४,२,१०४)।

[b]) 'आरण्यान्' इति ऋ (१०, ९०, ८) पाभे.।

[c]) व्यु.? । १अरण्य-+(√जन् > जनि- > ज्ञि*- >) *ग्नि- (=ग्ना- यद्र.) इत्येवम् 'अरण्या (=अरण्येऽधिकृता) ग्निर्माता' इति कृत्वा कस. सासस्व. च। एस्थि. उप. गकारस्य नैप्र. नकारसमापत्तौ *अरण्यन्नि- > यनि. इत्यभिसंधिः [तु. या. (९, ३०) यत्र 'अरण्यपत्नी-' इति शब्दः व्यु. 'ग्ना-' इत्यनेन कमपि मौस्थि. संबन्धं संकेतयेत्; वैतु. सा. ऋ. (१०, १४६, २) नाउ. (?अरण्यानी- इत्यस्य) ह्रस्वाऽऽपत्त्या सिषाधयिषुः सन् मौस्थि. व्यु. व्यत्यासुकः (जनि- > *जनी- इति परिणामक्रमो भवति न तु *जनी- > जनि- इत्यभिसंधेः)]।

[d]) ङीष् प्र. तत्स्वरश्च (पावा ४, १, ४५; वैतु. पा ४, १, ४९ आनुगागमपूर्वकम् १अरण्य-(?) इत्यतः प्र. इति)। एस्थि. उप. दीर्घान्तमित्येव नापू. विशेषः। यद्वा मौस्थि. ङीषन्तेन सतैव उप. नापूदि. स्वतन्त्रः कस. द्र.।

[e]) तु. सस्थ. टि. २अरण्य- > -ण्यानि। यदन्वेकं रू. द्वि३ एकश्च सं१ स्यात् (तु.या. वें. सा.च; वैतु. GW.NW. चोभे अपि रू. सं१ इति, ORN. चोभे अपि द्वि३ इति)।

[f]) गतिसमासगर्भितः उस., उप. ण्यत् प्र., कृत्-प्रस्व. च (पा ६,२,१३९); वैतु. भा. तैब्रा. (१,७,७,३) गस. अनुवाकु- इत्यतस्तद्धितः यत् प्र. इति [वैतु. अरण्येऽनूच्य- वैप. (२, १२७) यत्रत्यः कृत्यः क्यप् इहापि ण्यतं कृत्यमेवोद्भावयेत्]।

[g]) व्यु ?। √*३अर् > *३अर्- (=अग्नि-)+जनि- (=प्रादुर्भाव-) इति कृत्वा बस. पूपप्रस्व., नैप्र. वर्णलोपः शकन्ध्वादित्वञ्च द्र. [तु. *?२अरण- (तेजोहिरण्यवैशिष्ट्यञ्च निर्मन्थनक्रियायोगश्चाप्यत्र श्रौतं लिङ्गम् ऋ १, १२७, ४; १२९, ५; १०, १८४, ३); वैतु. या. (५, १०), तदनु पाउ (२, १०२), ते ते प्रागर्वाञ्चो विवृतश्च <√*१अर् इति कृत्वा संभेदुकत्वय इव।

–णी ऋ १०, १८४, ३; मै १, ८, ९¶; ¶काठ ८, १०^{२}; २३, ६; २६, ३; ७; ¶क ७, ६^{२}; ४१, ५; शौ १०, ८, २०; पै १६, १०२, ७; –ण्योः ऋ ३, २९, २; ७, १, १; ¶तै ३, ४, १०, ४–५; †काठ ३४, १९; ३९, १५; †क ४८, १; †कौ १, ७२; ७९; २, ७२३; †जै १, ७, १०; ८, ७; ३, ५९, १५; पै ११, १, ३.

?२अरणी[a]– -णी ऋ ५, ९, ३.

२अ-रणि[b]– -णिम् शौ १, १८, २.

?अरणीयमान[c]– -नः मै ४, ९, ५.

१,२अरण्य-, अरण्यानि- १,२अरण-

१अरति[d]– -तये ऋ ७, ५, १; –†तिः ऋ १, ५९, २; [१२८, ६; (८, १९, १; ३९, ६)]; २, २, २; ४, २; ४, २, १; ६, ३, ५; १२, ३; ६७, ८; १०, ३, १; २; ६; ७; ४५, ७; ६१, २०; मा १२, २४; का १३, २, ७; तै ४, २, २, २; मै २, ७, ९; ४, १४, १५^{२}; काठ १६, ९; कौ २, ८९६; ८९७; जै ४, १३, ९; १०; –†तिम् ऋ १, ५८, ७; [१२८, ८; (५, १, ७; ६, १४, २) ७, १६, १]; २, २, ३; ३, १७, ४; ४, १, १; ३८, ४; ६, ७, १; १५, ४; ४९, २; ७, १०, ३; [(१, १२८, ६) ८, १९, १; (३९, ६)]; २१; १०, ४६, ४; मा ७, २४; १५, ३२; ३३, ८; का ७, १०, १; १६, ५, १४; ३२, १, ८; तै १, ४, १३, १; ४, ४, ४, ४; ६, ५, २, १; मै १, ३, १५; २, १३, ८; ४, १३, ५; १४, ३; काठ ४, ५; १८, २१; २८, १; ३९, १५; क ३, ५; कौ १, ४५; ६७; १०९; २, ९९; ४९०; १०३७; जै १, ५, १; ७, ५; १२, ३; ३, १०, १; ३८, ४; ४, २९, ३; –तीन् मै २, ६, १२; काठ १५, ८.

?२अरति[e]– -तौ ऋ ५, २, १.

१अरत्नि[f]– -त्निः तै २, ५, ७, ५¶;

---

[a]) यनि. सत्तातः संदेहो भवति । कथमिति । स्वरतश्च संबन्धतश्चाऽनुपपत्तेरिति । तथाहि । स्वरतस्तावत् । नापू.+ङीष् प्र. (पावा ४,१,४५) इति कृत्वाऽन्तोदात्त-प्रसङ्ग इति । अथ संबन्धतः । प्र१ इति कृत्वा हि PW. प्रभृ. '**जनिष्ट**' इति क्रिप. अस्य संबन्धमाहुः । तन्नोपपद्येत । **अरण्या** अग्नेः प्रादुर्भावयितृत्वे सति स्वतस् तात्कालिक्याःक्रियाया योगतः प्रादुर्भवितृत्वाऽभावात् । ननु **ण्यर्थे** क्रिप. एतदिष्येतेति । नेति । कथमिति । श्रुतिलिङ्गतः सामर्थ्याऽभावात् । दाशतय्यां हि स्वरभावाऽभावाभ्याञ्चाऽड्भावाऽभावाभ्याञ्च चतुर्धा व्यूढस्य सतोऽस्य क्रिप. २० निगमा भवन्ति । तेषु मध्ये १९ निगमेषु **ण्यर्था**ऽभावे विप्रतिपत्त्यभावात् प्रकृते विंशे निगमेऽपि **ण्यर्थो** नैव संभाव्येतेत्यर्थात् (यनि. रू. नापू. एव प्र२ इत्येवं प्रतिपद्य क्रिप. तत्परतया वचनव्यत्ययं चिकारयिषन्तं सा. प्रत्यपि **ण्यर्थ**विषये समानं चोद्यं द्र.) इति । **अरण्याः** कर्तृत्वे प्रतिहते कथं वा. इति । उच्यते । अत्र '**नवो जनिष्ट अरणी**' इत्येवं मूलतः सतः पादस्य स्थाने वर्तमानः **शोध**-सापेक्षः पा. द्र. (एतदनु **यं**>**यः**, **शिशुं** >**शिशुर्**, **नवं**>**नवो**, **धर्तारं**>**धर्ता अरं**, **अग्निं**> **अग्निः**, **स्वध्वरं**>**स्वध्वरः** इति द्वितीयान्तानां प्रथमान्ततया **शोधः** क्रियेत, '**अरणी**' इति च स२ सद् अग्नि-प्रादुर्भावाऽधिकरणतया योज्येत (तु. ऋ ७, ३, ९; १०, ३१, १० यत्र यक्र. '**मात्रोः**' इति '**पित्रोः**' इति पदे सप्र. श्राव्येते, ऋ ८, ७, ५ यत्रत्ये चरमे पादेऽप्येवं '**जातम्**' इति प्र१ सत् कर्तृत्वेन '**अनु···अष्ट**' इत्यनेन क्रिप. योज्येत '**रोदसी**' इति च स. विषयेऽत्यन्तसंयोग-करणी द्वि. द्र.; वैतु. सा. प्रभृ. '**रोदसी**' इति प्र२ इति कृत्वा वाक्यपार्थक्येन कर्तृतया योजुकाः) ।

[b]) तस. नञ्-स्वरः (पा ६,२,२) । उप.<√२रण् यद्र. (वैतु. सा. विकल्पेन<√*१अर् इति) ।

[c]) पा.?, पपा.? (अहुः । अनी । यमानः) । '**अहरहर्णीयमानः**' इत्यनुष्टुप्पादतया शोधः द्र. (तु. तैआ ६,५,३; वैतु. BC. '**अहृणीयमानः**' इति) ।

[d]) व्यु.? । √*१अर्+**अतिच्** प्र. इति संप्रदायः [तु. पाउ (४, ६०), ते ते प्रागर्वाञ्चो विवृतोऽर्थवैशिष्ट्ये सत्यप्येनां व्यु. अव्यभिचारुकाः; वैतु. VVS १०४ √*३अर् इत्यतो निष्पादुकः, उ.म. (मा. यस्थ.) नैप्र.=***अलंमति**- इति, म. (गपू.) भा. (तैब्रा २,५,४,४) ६अ+(√रम्>) रति- इति कृत्वा बस. अन्तोदात्तः (पा ६, २, १७२) इति] ।

[e]) सा. (तु. यनि. स्थ) अरमणीयप्रदेशाऽरण्यान्यतराऽभिधानं सत् नापू. सरूपात् प्राति. भिन्नमेतत् यनि. इतीव व्यु. भेदमपश्यन्नप्यभिसंदध्यात् । एवं BW. पा. असाधुरिति कृत्वा '**अ-रत्नि**- इति प्राति. शोधतया ध्रियेतेति । न तु पृथक् प्राति. इहाऽपेक्ष्येतेति मतं भवति । नापू. प्राति. एव श्रुतिस्वारस्यस्य सुस्फुटत्वोपगमात् [जना अस्याऽनीकम् (अस्मिन्) अरतौ निहितं सन् न मिनत् (भवत्) पुरः पश्यन्ति (=क्षणमात्रमेव निहितमवतिष्ठते । क्षणेनैव च जनैस्तत् [अस्मिन् न मिनत्=] सर्वत्र संचरमाणं प्रत्यक्षीक्रियते)] ।

[f]) व्यु.? । १अर्- +(√तन्>) ***त्नि**- इति तस.

–¶त्निना तै ५, २, ५, १; –¶त्निम् तै २, ५, ७, ५; –त्नी मा २०, ८; का २१, ७, ७; मै ३, ११, ८; ४, ६, ३^{२}¶; काठ ३८, ४¶; –त्नीन् शौ १९, ५७, ५; पै ३, ३०, ६; –त्नौ ऋ १०, १६०, ४; तै २, ५, ७, ५^{२}¶; शौ २०, ९६, ४†; –त्न्योः पै १६, १४७, ७. [°त्नि- अष्टन्°, एकत्रिंशद्°, एकविंशति°, एकादशन्°, त्रयस्त्रिंशद्°, त्रयोदशन्°, त्रयोविंशति°, दशन्°, द्वादशन्°, नवन्°, पञ्चन्°, पञ्चदशन्°, पञ्चविंशति°, सप्तन्°, सप्तदशन्°, सप्तविंशति°]

¶अरत्नि-मात्र[a]– -त्रम् मै ३, २, ४; काठ २०, ३; क ३१, ५. (*अरत्निमात्रक- *अरत्निमात्रिका-) नाउ. टि. द्र.

¶अरत्नि-मात्री[b]– -त्री मै ३, १, २; ७; काठ ६, १; क ३, १२; –त्रीम् काठ १९, १; ६; क २९, ८; ३०, ४.

?२अरत्नि[c]– -त्नयः ऋ ८, ८०, ८.

¶अ-रत्निन्[d]– -त्निनः मै ४, ३, ८.

अ-रथ[e]– -†थाः ऋ ५, ३१, ५; ९, ९७, २०; १०, ९९, ४; तै १, ६, १२, ६; मै ४, १२, २; काठ ८, १६; शौ ११, १२, २४$; –थेभ्यः मा १६, २६; का १७, ३, ५; तै ४, ५, ४, १.

अ-रथी[d]– -थीः ऋ ६, ६६, ७.

अ-रध्र[d]– -ध्रम् ऋ ६, ६२, ३; –ध्रस्य ऋ ६, १८, ४.

अ-रपस्[e]– -†पः[f] ऋ [१०, १५, ४; ३७, ११]; मा ८, ५$; १९, ५५; का ८, २, १$; २१, ४, ५; तै २, ६, १२, ३; मै ४, १०, ६; काठ २१, १४; शौ १८, १, ५१; –पाः ऋ २, ३३, ६; ८, १८, ९; १०, १३७, ५; तै ३, २, ८, ४; शौ १, २२, २; ४. १३, ४†; पै १, २८, २.

अर-मणस्- २अर- द्र.

†अरमति[g]– -तिः ऋ [(१, ३५, ८) २, ३८, ४]; ७, १, ६; ३४, २१;

उस. वा (=प्राप्त्यर्थं तनने तात्पर्यम्) इति कृत्वा सासस्व. वा उपप्रस्व. वा द्र. [तेन नैप्र. *अर्त्नि- इत्यत्र पूप. अन्तेऽकारोपजन इत्यभिसंधिः (तु. कर्मन्- >कर्म> पंजा. करम- प्रमृ.); वैतु. पाउ. (४, २) √*१अर्+अत्निच् प्र. इति कृत्वा चिदन्तोदात्त इति, WW १, १५७ <√*८अर् इति]।

a) उस. उप. √१मा+कर्मणि त्रः प्र. कृत्-प्रस्व. च (तु. पाउ ४, १६७; पा ६, २, १३९)। पाप्र. उप. तद्धितस्य मात्रचः प्र. सतः मौस्थि. स्वरूपमिति द्र.।

b) उप. मात्र->मात्री- इति परिणामस्य तिस्रो विधाः संभवेयुः। यनि. उप. अनाम्नि सति मात्रच् इति प्र. चित्स्वरकरस्तदन्तात् स्त्री. ङीप् (पा ४, १, १५) इति प्रथमा विधा परिचितचरी। √१मा+त्रिः प्र. इति कृत्वा *मात्रि- इत्यस्य भिन्नस्य प्राति. सतः स्त्री. ङीषन्तत्वं स्यात् (पावा ४,१,४५) इति द्वितीया विधा स्यात्। '–मात्र->*-मात्रक->*-मात्रिका->-मात्रि आ->-मात्री-' इति चरमा विधा नैप्र. द्र.(तु. अम्बाली-)। तद् एस्थि. एतासामुपादेयत्वतारतम्ये विमृशां धीः प्रमाणम्।

c) यनि. सत्तातः संदेहो भवति। अपेक्षाया अदर्शनात्। नन्व् अपा√वृज् इत्यनेन निवारणार्थेन सता कर्मसंबन्धेन युक्ततया श्राव्यमाणं किञ्चिदशुभमेव स्यादिति कृत्वा यनि. १संख्याकात् सरूपाद् भिन्नार्थं सद् भिन्ननिष्पत्तिकतयाऽभ्युपेयमिति [तु. सा. BW. च ६अ+(√रम्>)*रत्नि- इति कृत्वा तस. इति (तथा सति स्वरतश्चोद्यस्याऽपरिहार्यत्वं तु द्र.)। अतोऽस्मिन् पक्षेऽपि उप. भावे इति कृत्वा बस. एव सुवचः स्यात्]। मा त्वेवं मानि। अपा√वृज् इत्यस्य परतः पृथक्कृतिपूर्वकम् आभरणे वृत्त्युपगमात् [अपाऽऽङोरर्थयोर्विषयविभागेन कस्यचिद् वस्तुतः कुतश्चिदपकरणे कस्मैचिदपरस्मै चाऽऽवर्जन इत्यभिसंधेः (तु. अप√मे>मि, अपा√मे>मि इत्येतयोः शौ ६, ११७, १ इत्यत्र मै १, १० २ इत्यत्र च समानप्रकारको विवेक इहोक्तां दिशं परिपुष्णन्निवाऽऽङ्योगवति मै. स्थ. 'संभर' इति क्रिप. निदर्श्यमानः)]।

d) तस. नञ्-स्वरः (पा ६, २, २)। उप. यद्र.।

e) बस. अन्तोदात्तः (पा ६, २, १७२)। उप. यद्र.।

f) अदन्तं प्राति. इति परमतमनभिमतमिव भवति (तु. भा. K. च; वैतु. सा. उ. म. PW. MW. NW. च)। कथमिति चेत्। उच्यते। उ. म. च स्वपक्षपुष्ट्या उदाहृतस्य यास्कीयवचनस्य तन्मतविनाशकत्वाद् अरपः इत्यस्य न. द्वि१ सतः क्रिवि. इति कृत्वा वा. सुवचतरत्वाच्च। यच्च सा. (तै.) 'विश्वे' इत्यनेन सामानाधिकरण्यमिच्छन् 'अरपाः' इति प्र३ रू. आह, तदप्यसत्। 'एधते' इत्यैकवचनिक्या क्रियया 'अरपाः' इत्यस्य संबन्धस्य निगदस्पष्टत्वादिति [तु. 'जायते विन्दते' इति सांनिध्येन श्रूयमाणे ऐकवचनिके क्रिप. ('विश्वे' इत्यत्र तै. स्थ. संभाव्यमानो श्लेषः यद्र.)]।

g) अरम्→ अरम्→ अर-मति- इत्याकारिका मतिरर्वाचामभियुक्तानामत्र यद् भवति (तु. PW. प्रमृ.), तद् असद् इवाऽऽभाति। पपा॰ अवग्रहाऽभावात्

८, ३१, १२; १०, ६४, १५; ९२, ४; तै ४, ३, १३, ६; –तिम् ऋ ५, ४३, ६; ५४, ६; ७, ३६, ८; ४२, ३; १०, ९२, ५.

अ॒-रममाण[a]– -णः ऋ ९, ७२, ३.

?अ॒रमि(मृ-इ)ष्[b]– -मिषे ऋ ८, ४६, १७.

*१अररि॒-, *२अररि॒- नाउ. टि. द्र.

अररि॒न्द[c]– -न्दानि ऋ १, १३९, १०.

†अ॒-ररिवस्[a]– -रिवान् ऋ १, १४७, ४; –रुषः ऋ [१, १८, ३; ७, ९४, ८]; १५०, २; ३, १८, २; ५, ७७, १; [(१, ३३,१५) ७, १,१३]; ९४,८; ९,२९,५; मा ३,३०; का ३, ३.२२; मै ४, १२,६; काठ ७,२; ३५,१४; क ५, २; ४८, १३; –रुषे ऋ ७, ५६, १९; मै ४, १४, १८.

अ॒ररुषी– -षीः शौ १९, १५, २; पै ३, ३५, २.

अर॒रु[d]– -रुः तै १, १, ९, १-३; मै ४, १, १०^{२}; काठ १, ९; २५, ४^{३}¶; ३१, ८^{५}; ¶^{३}; क १, ९; ३९, १^{३}¶; ४७, ८^{५}; ¶^{३}; शौ ६, ४६, १°; –रुम् ऋ १, १२९, ३; १०, ९९, १०; मा १, २६; का १, ९, ४; मै १, १, १०; ४, १, १०; काठ १, ९; २५, ४; ३१, ८; क १, ९; ३९, १; ४७, ८; -०॒रो मा १ २६; का १, ९, ४; पै २, ३७, ४.

कामं नञ्-समास इह भवतु, न तु पराभिमतः बस.। रमति- इत्येतत् प्राति. हि निद्-अनिद्-अन्यतर-अति-प्रत्ययान्ततया (तु. पाउ ४, ६५) मनोबन्ध-तद्वद्- अन्यतर-वाचकतया च श्रुत्यन्तरप्रसिद्धं (तु. शौ ६, ७३, २; ३; ७, ७९, २)। अत्र चैतत् प्राति. उप. भवति नञ् च पूप. भवतीत्यत्र बाह्वृचश्रुत्यन्तरसाधारण्येन विशेषणमात्रतया 'अनर्व॒न्-' इत्येतेन 'अनेहु॒-' इत्येतेन च साहचर्येण च श्रूयमाणं (तु. ऋ ८, ३१, १२) ज्ञापकं भवेत्। उत्तरपदाद्युदात्तस्तावत् उसं. (पा ६,२,११६)।

[a]) तस. नञ्-स्वरः (पा ६, २, २)। उप. यद्र.।

[b]) 'अरम् इषे' इति प्रास. पूपप्रस्व. (पा ६, २, २); वैतु. पपा. ARV. च द्वे पदे इति, वें. सा. च तथेति कृत्वा उप. √२इष्>इषे (लटि उपु१) इति पूप. च तत्संबद्धं सत् (१अ॒र->) कर्मणि द्वि१ इति च, PW. प्रभृ. च यनि. प्राति. गस. (=*अ॒रम्+√१इष् इत्यस्य कृद्वृत्तम्) इति च वदन्तः स्वरतः पर्यनुयोज्याः। तथात्वे हि कृत्-प्रस्व.स्यादित्यभिसंधेः। 'महु॒ः' (द्वि३) वः (द्वि३) [अरमिषादिविशेषणयुताय (इन्द्राय=तदीया यूयमिति कृत्वा युष्मत्प्रीत्या तत्प्राप्तये)] 'स्तु॒वामहे' इति पूर्वार्धे वा. द्र. (वैतु. सा. वाक्यद्वयं प्रकुर्वाणः प्रथमे वाक्ये 'महु॒ः' (ष१) इत्यस्य वः (>ष१=तव?) इत्यस्य च समानाधिकरणतां द्वितीये वाक्ये च 'स्तु॒वामहे' इति क्रिप. योगं वदन्, GW. सा. द्वितीयं वाक्यमनुवदन्)। एस्थि. ननु 'स्तु॒वामहे' इत्यत्र निघाताऽभावः किंहेतुक इति। छन्दोहेतुक इति। कथमिति। पादादित्वादिति। न हीति। कथमिति। जागतेन मानेनाऽपादादित्वादिति। सत्यमेतत्। आनुष्टुभं तु मानमत्र द्र.। तेन 'स्तु॒वामहे' इत्येतद् द्वितीयपादस्याऽऽदौ भवतीति (तु.ORN.)।

[c]) व्यु. ?। *१अररि॒- [=६अ॒+(√२रा>कर्तरि वा भावे वा) ररि॒- इति बस.वा (=अदातृक-) तस.वा(=अदत्त-यस्मिन् कल्पेऽन्तोदात्तस्तु दुरुपपदः द्र.)] इति कृत्वा तत्पूर्वः(√१दा>कर्तरि) दु॒- इति उस. इति दे. (१, १२) यस्थ. सा. च; पूर्वस्मिन्नेव कल्पे पूप. <√*१अर् इति वेति सा.; *२अररि॒- [=कपाटपर्यायः(व्यु.?)]+(√३दा>कर्तरि)दु॒- इति कृत्वा उस. इति PW. अनु GW. L ४४१। सर्वथापि त्वेवं पूपप्रस्व. अनुपपन्न इति कृत्वा कोऽपि भूयोविमृश्यस्वरूपः बस. एव शरणीयः।

[d]) व्यु. ?। (√*२अर्+भावे विच् प्र.=)*२अ॒र्-+*१अ॒रु- [=√*२अर्+कर्तरि उन् प्र. उसं. (पाउ १, ९)] इत्येवम् उस. उपप्रस्व. स्यात् (=बाधया बाधमान-) इति प्रथमः कल्पः। यद्वा (√*२अर्+कर्तरि विच् प्र.=)२अ॒र्-+६अ॒+र॒- (<√२रा) इत्येवं कस. [=अः (बाधमानः) चासाव् अरः (अदाता) च इति कृत्वा निन्दाऽर्थे उल् प्र. तद्धितः उसं. (पा ५, ३, ७४) लित्त्वाच्च स्व. तदवस्थ इति द्वितीयः कल्पः। अथाऽपि वा *२अ॒र्- इत्यस्यैवाऽतिशयितेऽर्थेऽभ्यासः स्यात्, नापूदि. प्र. स्व. चेति तृतीयः कल्पः। अपि वाऽऽद्युदात्तः क्वाचित्कः पाभे. (तु. पाण्डु. शौ. यस्थ.) ज्ञापकः स्याद् यथा पुराकाले प्रवृत्तिमान् सन्नपि सामासिकः स्वरः कालेनेहाऽऽख्याताऽभ्यस्तविधया (पा ६, १, १८९) आद्युदात्ततया पर्यणंसीदिति। स्याद्वा द्वितीये कल्प एव पक्षे उन् प्र. तद्धितः उसं.(पा ५, ३,७४)। एस्थि. √*२अर् इत्येतदर्थप्राधान्येन व्यु. द्र. इत्यभिसंधिः [तु. GW. शत्रुपर्यायवाचिना अरि॒- इत्येतेन पक्षे संजिगमयिषुः; वैतु.पाउ. (४,८४) √*१अर्+अरुः प्र. इति, PW. प्रभृ. ६अ॒+(√२रा>)ररु- (स्वरः?) इति तस.इति (तथा सत्युत्तरादि-स्वर उपपत्तिसाकाङ्क्षः द्र.)]

[e]) आद्युदात्तोऽपि पाभे. (तु. पाण्डु. मुपा. च टि.च)।

√*अरर्ण् २अर्णव- टि. द्र.

¶अ-रशन्[a]- -नम् काठ २६, ६; क ४१, ४; -नान् मै ३, ९, ४.

अ-रश्मन्[a]- -श्मानः ऋ ९, ९७,२०.

अ-रस,सा[a]- ०स शौ ६. १३८, ३; -०स शौ ४, ६, ६; पै १, ६८, ४; ४, १७, ४; ५, ८, ५; -सः शौ ४, ६, ६; ५, १६, १-१०; २२, २; पै १, ६८, ४; ३, १६, ५; ५, ८, ५; ८, २, ६; ४, १-११; -सम् ऋ १, १९१, १६^{२}; शौ ४, ६, १; ६^{२}; ७,२^{२}; ५, ४, ९; ८, ६; १३, ८; १०; ११; ६, २९, ३; १००, ३; १३८, ३; ७, ५८, ३; ७; १०, ४, ३; ४; ११, १२, १७; १९, ३४, ३; पै १, ४४, ४; ४८, ४; ६८, ४; ९३, ४; १११, ३; २, १, १^{२}; २, १; ५; ३, ९, १^{२}-६^{२}; ७; ४, १७,३[b]; ४; ७; १९, ४; ५; ७; ५, ८, ५^{२}; ८; ७, १८, ७; ८, २, ९-११; ७, १-४; ११; ९, १०, ५-८; १२^{३}; ११, १२; ११, ३, ३; १०; १६, १५, २-४; -सस्य शौ ४, ६, ६; ७, ५८, ५; पै १, ४८, १; ५, ८, ५; -सा शौ १०, ४, ८; पै १६, १५, ८; -साः शौ २, ३१, ३; ४, १८, १; ९, २, १०; १९, ३४, ३; पै २, १५, ३; ५, २४, १; ७, ८, ५; ११, ३, ३; १५, १९, ३; १६, ७६, ९; -०साः शौ ५, १३, ७; -सान् शौ २, २७, १-६; १९, ३४, २; १०; ३५,५; पै २,१६,१;८,२,७; ७, ७;११,३,२;४,५;७,३;-सासः शौ १०,४, ९; पै १६, १५,९.

अरस-तम- -मम् शौ ५, १३, ९; पै ७, ३, ५; ८, २, ८.

अरस-तर,रा- -राः शौ ७, ८०,१; पै १, २१, १.

?अरसावधी[c] पै ३, १६, ४.

*?अराज- अराजिन्- टि. द्र.

अ-राजन्- -जानः पै १, ९२, २.

¶अ-राजन्य[d]- -न्यः मै १, ५,८.

अराजिन्[e]- -जिनः ऋ ८, ७, २३.

*अराटकि- नाउ. टि. द्र.

अराटकी[f]- -की शौ ४, ३७, ६; पै १३, ४, १०; ११.

¶अराड[g]- -डः मै २, ५, ९.

अराड्य[h]- -ड्यौ तै ५, ६, २१, १.

*अराढ- अराड- टि. द्र.

*अराढकी- अराटकी- टि. द्र.

अराण- सम्°

अ-राति[i],*ती[j]- -तयः ऋ १;२९,४; ४३, ८; २, २३,५; ९;३५,६;

---

[a]) बस. अन्तोदात्तः (पा ६, २, १७२) । उप. यद्र. ।

[b]) 'त्ववारसम्'(मूको.)>'त्व् अवारसम्'(सुपा.?)।अत्र 'तव । अरसम्'इति द्विपदःशोधःद्र.(तु.टि.नपात्->-पात्)।

[c]) 'अरसः । अवधीत्' इति शोधः द्र. ।

[d]) तस. नञ्-स्वरः (पा ६, २, २) । उप. यद्र. ।

[e]) व्यु.? । √*२अर् > २अर्- +आजिन्-[=आ √अज्+ताच्छीलिकः इनिः प्र. (तु.पा ३,२,१५६) इति उस. उपप्रस्व. [पा ६, २, १३९ (=प्रतिबन्धकान् विद्रावयितृ-)]; वैतु. वें. W. GW. MW. च पर्वतविषयतया ६अ+(√राज्>)*१राजिन्- इति तस. इति (तथा सत्यन्तोदात्त उपपत्तिसाकाङ्क्षः सन् कथमपि पा ६, २, १५५ उउ. उसं. स्यात्); सा. मरुद्विषयतया ६अ+*२राजिन् (=राजन्- +मत्वर्थे तद्धितः इनिः प्र.) इति तस. इति वा, ?*अराज- (=६अ+राजन्- इति बस.)+तद्धितः इनिः प्र. इति बस. इति वेति; पपा. अप्यवग्रहाऽभावो नञ्-पूर्वत्वस्य संकेतः स्यात्] ।

[f]) मूको. दीर्घाऽऽदिरपि पा. द्र. । व्यु.? । √*६अर् [मौस्थि. <√*२हर्(=√*२हॄ)<√*शर्(=√*शॄ) <>√*कर् (=√*कॄ)] >*५अर्- [=शृङ्ग-; तु. ३हरिण-; WW (१, ४०३उ)] + १अर्ध- (=प्रकर्षः <√ऋध्) इति षतस. सासस्व. इति कृत्वा *१अरार्ध- इत्यस्मिन् प्राति. उपपदे सति [√*कॄ+डिः प्र. उसं. (पाउ ४, १३९)=] *कि- इति उप. योगे *अरार्धकि->[स्त्री. ङीष् (पावा ४, १, ४५)]-की- इति त्रिप्रस्थानस्य प्राति. मौस्थि. अभ्युपेयमानस्य सतः नैप्र. *अरार्धकी->*अराढ(>ड>*ट)की- इति परिणामः अनुसंधेयः (तु. सह श्रूयमाणं शृङ्गपदप्रधानं वि.; नाउ. ?सनि. प्राति. च, वर्धकि- प्राति. च लोके) ।

[g]) व्यु. ? । (√*६अर्>) *५अर्- +१अर्ध- (तु. नापू. टि.) इति कृत्वा बस. पूपप्रस्व. (पा ६, २, १) द्र. (=शृङ्गप्रकर्षवत्) । स्वरूपतस्तु नैप्र. *१अरार्ध- >*अराढ-> यनि. इति सुलभः क्रमः ।

[h]) व्यु.? । नापू. स्वार्थे यत् प्र. (पा ५, ३, १०३) यद्वा *३अर्- +१अर्ध- इति षतस. सतस्तत्रसाधवीयः यत् प्र. (पा ४,४,९८) । उभयथाऽपि तित्स्वरः (पा ६, १, १८५) । दीर्घादि प्राति. अपि यद्र. ।

[i]) द्विप्रकृतीनां ना.स्थानं द्र.। तद् यथा । यत्र भावपरोऽर्थस्तत्र ६अ+(√१रा>)*१राति- (=प्राप्तिप्रतिबन्ध-) इति । यत्र च तद्विशिष्टपरं सद् वा. वि. भवति, तत्र उप. कर्तरि क्तिजन्तः *२राति- इति विशेषः द्र. । उभयत्राऽपि तस. नञ्-स्वरः (पा ६, २,२) ।

[j]) तु. टि. इहैव '-तिम्' (पै ५,२६,३-६) ।

३८, ९; ५, २, ६; [**६**, ४८, १६; ५९, ८]; **७**, ८३, ३; ५; ८, ९, १; ७१, ४; **९**, ७९, १; **१०**, ५७, १; ८५, ३२; १३३, ३; १७४, २; मा **१**, $७^{२}$; १४; १६; १९; $२९^{४}$; का **१**, ३, $३^{२}$; ५, १; ६; ७, १; ८, ३; १०, $१^{४}$; तै **१**, १, २, १; ४, १; ५, १; २; ६, १; ७, १; ८, १; १०, १; २, ५, १; ३, १, १; **६**, १, ८, ३; २, १०, १; †कौ **१**, ५५५; **२**, ११५३; †जै **१**, ५७, २; **४**, १, ६; शौ **१**, २९, २†; **५**, २३, २; **६**, १२९, १–३; **११**, १०, २१; **१३**, १, ५९†; **१४**, २, ११†; **१९**, ५०, ३; †**२०**, ७४, ४; ९५, ४; १३९, १; पै **१**, ११, २; **७**, २, २; ९; ७, ८; **१४**, ४, १३; **१६**, ८७, १; –तये मा **१**, ११; का **१**, ३, ७; मै **१**, १, ५; **४**, १, $५^{२}$; शौ **५**, ७, १; ३; पै **७**, ९, ४; १९, ३; ४; –तिः ऋ **२**, ७, २; **८**, ४८, ३; **१०**, ३४, १४; खि **४**, ५, १४; तै **३**, २, ५, ४†; मै **१**, १, २; ४; ६; $७^{२}$; ८; ११; २, १६; **३**, १०, १; **४**, १, ७; काठ **१**, २; ४; $५^{३}$; ६–८; १०; **३**, ६; **३१**, $४^{३}$; ५; ६; क **१**, $५^{३}$; ६; **४७**, $४^{३}$; ५; शौ **२**, ७, ४; **६**, १२४, ३; **१२**, ३, १७; पै **८**, ३, ४; **१३**, ३, १४; –तिम् ऋ **४**, ४, ४; **१०**, ६३, १२; मा **१३**, १२†; **२७**, ६; का **१४**, १, १२†; **२९**, १, ६; तै **१**, २, १४, २†; ८, १०, २; **४**, १, ७, ३; मै **१**, १, ११; २, ११; १४; ४, $३^{२}$; ५, १[a]; **२**, ७, १५†; १६; काठ **१**, १०; **२**, १२; **३**, ३; **५**, ४; **१६**, १५†; १६; **३१**, १४; क **१**, १०; **२**, ६; १०; **२५**, ६†; ‡[b]कौ **१**, ५४०; **२**, ३६९; ‡[b]जै **१**, ५५, ७; **३**, ३०, १२; शौ **१**, १८, $१^{२}$; **२**, १०, ७; **३**, १, १; २, १; १५, १; **५**, ७, ३; ६; **८**, २, १२; **१२**, २, ३; ४५; **१९**, ३१, ११; पै **१**, ६९, २; ८६, २; **३**, ५, १; ६, १; **४**, ८, १–१३; १८, ५; **५**, २६, ३–६[c]; ९; **७**, ९, ४; ८; **१०**, ५, ११; **१६**, ४, २; २५, ७; –*तियम्[d] पै **५**, २६, ४; ६; ८; –तीः ऋ **१**, ११६, २१; **३**, १८, १; २४, १; **४**, [२६, ७; २७, २]; [५०, ११; (**७**, ६४, ५; ६५, ५; ९७, ७)]; **५**, ५३, १४; **६**, ४, ५[e]; १६, $२७^{२}$; ४४, ९; **७**, १, ७; ९७, ९; **८**, ११, ३; ३९, $२^{२}$; **९**, ९६, १५; ९७, १०; खि **३**, १६, ३[f]; **४**, ५, ५; १३; मा **५**, २६; **६**, १; **९**, ३७; **१०**, १; **१२**, ९९; **१३**, २६; का **५**, ७, १; **६**, १, १; **११**, १, ३; २, १; **१४**, २, १२; तै **१**, ३, १, २; २, २; ६, १; ६, १, १; ८, ११, १; **४**, १, ४, ४; २, ८, १; ९, २; **५**, १, ५, ९; मै **१**, २, १; ५, ३; ६, २; **२**, ६, ८; **३**, ६, ३¶; **४**, १४, ६‡[g]; १७; काठ **२**, १; **१५**, ६; **३९**, १; क **१**, १३; जै **४**, २५, १†; शौ **१**, २, २; **१०**, ५, ३६; **१३**, १, २०; **१६**, ९, १; पै **३**, ३३, ६; **५**, ६, ८?[h]; **७**, १५, ४; **१२**, ६, ८; **१४**, १, ९; **१६**, १३२, १; –तीनाम् खि **१**, ५, ५; –*तीम्[e] पै **५**, २६, ७; ९; –०ते शौ **५**, ७, ८; –०ते शौ **५**, ७, १; २; ७; **१४**, २, १९; पै **७**, ९, १–३; ५; –†तेः

---

[a] 'अरातिम्' इति केषांचिद् मूको. पा. ।

[b] '-तीः' इति ऋ (९, ९७, १०) पाभे. ।

[c] प्रकृते सूक्ते प्रथमे मन्त्रे पूर्वोत्तरविरहितस्य 'रा?' इत्यस्य पूर्तिकरं द्वितीये च मन्त्रे 'अरात्याः' इति रू.; ४थे, ६ठे, ८मे च मन्त्रेषु मूको.'रातीयम्'(=*अरातियम्) इति रू.; ९मे च मन्त्रे मूको.'रात्रीम्' (=अरातीम्) इति रू. च *अराती-(>तु. खि १, ५,५ '-तीनाम्') इत्यस्य ङीषन्तस्य (पावा ४, १, ४५) सद्भावप्रामाण्ये संकेतः द्र. । एस्थि. १मे मन्त्रे 'रा'=*अरात्याः, २ये मन्त्रे 'रात्यात्' =*अरात्याः, ४थे, ६ठे च मन्त्रयोः 'अरातिम्'=*अरातियम्, ७मे मन्त्रे 'अरातीन्'=*अरातीम्, ८मे मन्त्रे 'अरातीन्'=*अरातियम्, ९मे च मन्त्रे 'अरातिम्' =*अरातीम् इत्येवं शोध-परम्परा द्र. (अनयैव दिशाऽन्येष्वपि बहुषु स्थ. मूको. अनुसंधानतो दीर्घान्तस्य प्राति. सद्भावोऽङ्गीकार्येतेति संभाव्येत) ।

[d] तु. नापूटि. ।

[e] प्र१ छन्दोऽनुरुद्धं दीर्घत्वम् (तु. सा. =अरातिरिति, L ३७६; वैतु.सा. द्वि३ इत्येवमपि मृषा विकल्पुकः) । यद्वा *अरातिर्-[=६अ+*रा-तिर्-(=√२रा+भावे वा कर्तरि वा+तिर्-(<√तॄ) इति तस.) इत्यस्य प्र१ द्र. (तु. *अमतिर्-)] ।

[f] सुपा. स्वरश्लेषः द्र. ।

[g] विशिष्ट इह ऋ (७, ८२, १) पाभे. ।

[h] नकारान्तः सुपा. सु-शोधः द्र. । अन्त्यनकारहीनः मूको. पा. विसर्जनीयेन पूर्येत, न तु नकारेण । पुंसि प्रयोगस्य श्रुत्यप्रसिद्धत्वात् ।

ऋ ८,७१,१; कौ १,६; जै १,१, ६; –स्या शौ ३, ३१, १; –स्याः ऋ ९, ७९, ३^{2}; शौ १०, ३,७; १३, ८, २; –स्याः पै ५, २६, १[a]; २[a]; १६,६३,७; –स्यै तै १, १, ४, २; काठ १, ४; ३१, ३; क १, ४; ४७, ३; शौ ५, ७,१०. [°ति- अन्°]

अराति-दब्धि[b]– -ब्धिम् खि १, ५, ११.

अराति-दूषण[c]– -णः शौ १९, ३४, ४; पै ११, ३, ४.

अराति-दूषि[d]– -षिः शौ २, ४, ६.

अराति-हु[e]– -हम् शौ १९, ३५, २; पै ११, ४, २.

अराति-हन्– -हनम् काठ ३९, ५.

अरातिघ्नी– -घ्नीः काठ ३९, १.

√अरातिय्[f], अरातियात् शौ ४, ३६, १.

*अ-रातिर्- *अरातिर्-वन्- *?अ-राती- अराती-वन्- टि. द्र.

√अरातीय्[f], अरातीयति तै १, ३, २, १; ६, ३, १[g]; ३, ५, ८, १; मै १,२,१०; ३,८,८¶; काठ २, ५; ९; ११; १२; ३, ३; ७, ६; २५, ९; क २, ५; ५, ५¶; ४०, २; अरातीयन्ति खि २, ८, ३; मै ४, ३, १^{2}; ८,२¶; काठ २८, ४¶; क ४४, ४¶; अरातीयात् मा ११,८०; का १२, ७, १५; तै ४, १, १०, ३; मै २, ७, ७; ३, १, ९; काठ १६, ७; १९, १०; क ३०, ८; पै १, ४२, ४.

अरातीयत्[h]– -यतः[i] ऋ १, ९९, १; मा १२, ५; का १३, १, ६; तै १, ६, १, १; ५, २; ४, २, १, १; ९, २; मै १, २, १०; २, ७, ८; काठ १६, ८; क २, ५; –यन् काठ ३१, १४; –¶यन्तम् तै ३, १, ४, ४; मै ३, १, ३.

*अरातीया- अरातीया-वन्- अराती-वन्- टि. द्र.

अरातीयु[j]– -योः शौ १०, ६, १; पै १६, ४२, १.

†अराती-वन्[k]– -वा ऋ १, १४७, ४[l]; २, २३, ७; ८, ६२, ११; ९, ११४, ४; तै ७, ४, १५, १; काठ ४४, ४.

?अरादविदुरश्वसहनुः[l] पै ५, २, ५.

अ-राद्धि[m]– -द्ध्यै मा ३०, ९; का ३४, २, १.

†अ-राधस्[n]– -धसः ऋ ५, ६१, ६; ८, ६४, २; १०, ३२, २; ६०, ६; कौ २, ७०५; जै ४, ७, १०; शौ $१२, १०, १४; ११, ४; २०, ९३, २; –धसम् ऋ १, ८४, ८; ९, १०१, १३; कौ १, ५५३; २, ६९३; ७३६; जै १, ५६, ९; ३, १२, ८; ५६, २०; ४, २६, १; शौ $५, ११, ७; ८; २०, ६३, ५; $पै ८, १,७; ८; १६, १४६, १०.

---

[a]) तु. टि. -तिम् (पै ५, २६, ३–६)।

[b]) षतस. सासस्व. (पा ६, १, २२३) । मुपा. व्यर्थमाद्यन्तोभयस्वरः सन् सु-शोधः द्र.।

[c]) उस.उप.√दुष्>दूषि+कर्तरि ल्युः प्र. कृत्-प्रस्व. च (पा ६, २, १३९)।

[d]) उस. इन्नन्त-कृत्-प्रस्व. (पा६,१,१९७;२,१३९)।

[e]) सस्व. एपू. द्र.।उप.√हन्+डः प्र.(पा३,२,४९)।

[f]) क्यजन्तः नाधा.। दीर्घत्वभावाऽभावौ यस्था. द्र.।

[g]) आत्मन इच्छायां क्यचं ब्रुवाणः भा. चिन्त्यः। अरातेरात्मन इच्छाया विषयत्वाऽयोग्यत्वात्।

[h]) शतृशपोर्निघाते धास्व. (पा ६, १,१८६;१६२)।

[i]) विभक्तिरुदात्ता भवति (पा ६, १, १७३)।

[j]) ताच्छीलिकः उः प्र. तत्-स्वरश्च (पा ३,२,१७०)।

[k]) व्यु.?। *अराती- इति दीर्घान्त उपपदे √वन्+कर्तरि क्विप् प्र. (पा ३,२,७६) इति कृत्वा उस. उपप्रस्व. (पा ६, २, १३९) इति प्रथमः कल्पः। √अरातीय्> *अरातीया- (पा ३, ३, १०२) इत्युपपदे पूर्ववत् उस. कृते सति नैप्र. *अरातीया-वन्->यनि. इत्यन्तोदात्तप्रयोजिततत्पूर्वलोपात्मकः परिणाम इति द्वितीयः कल्पः। अथ पाप्र. √अरातीय्+वन् प्र. उसं. (पा ३,२,७५)। ततोऽकारयकारयोर्लोपः (यक. पा ६, ४, १४८; १, ६६) इति वा। *अरातीया+वन् प्र. तद्धितः उसं. (पावा ५, २, १०९) इति कृत्वा भत्वे उसं. (पा १, ४, २०) पूर्ववद् अवर्णलोपे यलोप इति वा। *अरातिर्+वन्- (गपू.) प्र. इति वेत्येवं कल्पपञ्चतयं समूढं द्र.। तत्राऽपि द्वितीये कल्प आस्थाविशेषश्चेति दिक् [तु. अमती-वन्-; वैतु. पपा. PW. प्रभृ. च अराति-वन्- इत्यवग्रहमुखा भवन्तो मध्ये दीर्घं नोपपादुकाः; भा. तै. (७, ४, १५, १) सा. ऋ (१, १४७, ४) चोत्तरांऽशं वनिप् प्र. इति वचनतः पित्-स्वरतः प्रसज्यमानलक्ष्यविघातं प्रति पर्यनुयोज्यावित्यपरो विशेषः]।

[l]) 'अर्धे विषिते ससन्तु' इति शौ. (४,१,६) पामे.। प्रकृते कूटे पा. 'अरात्' 'अविदूरः' 'सह-नुः' इति पिपठिष्यते।

[m]) तस. नञ्-स्वरः (पा ६, २,२)। उप. यद्र.।

[n]) बस. अन्तोदात्तः (पा ६, २, १७२)। उप. यद्र.।

१अ-राय[a]- -यासः ऋ ८, ६१, ११.

२अराय[b]- -०य पै २, ६७, २; -यः पै २, ६७, १; ६, १४, ७; ८; -यम शौ २, २५, ३; पै ४, १३, ४; ६; ७, ११, ६; -याः शौ १२, १, ५०; -यान् शौ ८, ६, ४-६; १२; ११, ६, १६; १६, ६; ७; पै १५, १४, ९; १६, ७९, ४-६; ८०, ३; ८१, २; ५; -येभ्यः शौ ८, २, २०; पै ५, ३४, ५[c]; १६, ४, १०.

अरायी[d]- -०यि ऋ १०, १५५, १;२; -य्यः शौ १, २८,४; २, १४,३; ४, १७,५; १८, ७; ८; ७, २३, १; पै २, ४, ५; ५, २३, ७; २४, ७; ८; -य्यम् ऋ १०, १५५, २.

अराय-क्षयण[e]- -णम् शौ २,१८,३.

अराय-चातन[e]- -नम् शौ २,१८,३.

?√*अराय्[f]

अराय्य[g]- -य्यम् खि ५, १०, २.

*अरार्ध- अराटकी-, अराड- टि. द्र.

अराल[h]- -लाः खि ५, १७, १.

†अरावन्[i]- -रावा ऋ ७, ५६, १५; ६८, ७; ८, २८, ४; ९, २१, ५; १०, ३७, १२; -राव्णः ऋ १, ३६, [१५; (७, १, १३)];

---

[a]) तस. नञ्-स्वरः (पा ६, २, २)। उप. *राय- (=√२रा+कर्तरि णः प्र. युक् च), वैतु. या. (६,२५) प्रभृ. बस. इति कृत्वा उप. रै-पर्यायीकुर्वाणा घञन्तमिव प्रतिपादुकाः सन्तः प्रसज्यमानाऽन्तोदात्ताः (पा ६, २, १७२) चिन्त्याः ।

[b]) व्यु.?। रक्षोऽसृक्पाव-गर्भाद-जिघत्सुत्वादिहिंसाप्रधानविशेषणसहश्रुतिभिः (तु. यनि. स्थ.) लिङ्गितं भवति, यथेह √*६अर् >*५अर्- +(√इ+भावे घञ् प्र.=) *आय- इति कृत्वा बस. पूपप्रस्व. (पा ६, २, १) ='अराऽऽय-' इति [वैतु. या. (६, ३०) प्रभृ. तस. इति कृत्वा नञ्-पूर्वत्वे सति √२रा इत्यत एव निष्पादुकाः सन्तः स्वरतश्चिन्त्याः] ।

[c]) '-यभ्यः' इति मुपा. शोधाऽर्हः ।

[d]) रक्षोजातिविशेषीयत्वाद् योपधत्वे सत्यपि ङीष् प्र. उसं. (पा ४,१,६३)। यनि. रू. आमन्त्रिताद्युदात्तः द्र.। [वैतु. सा. (शौ १,२८,४) स्त्री. पुंयोगीयम् (पा ४, १, ४८) प्र. प्रस्तावुकः] ।

[e]) कास. ल्युडन्त-कृत्-प्रस्व. (पा ६,१,१९३;२,१३९)।

[f]) √*७अर् [मौस्थि. <√*ह (घ, ग, ख, क, श, क्ष, स्क)र् <√*अस्कृ खनने] >*६अर्- (अस्य गृहरक्षित्रोरर्थे शरण- इत्येतत्-साजात्यमित्यभिसंधिः) >यनि. नाउ. व्यु. औपयिकः क्यङ्ङन्तः नाधा. रक्षितृभावे द्र. ।

[g]) भावे यः प्र. कृत्येषु उसं. (पा ३,१,९५ उउ.) प्र. स्वरश्च [तु. मूको. √*मृ >मराय- इति शौ. (२०,१२७, ८), शांश्रौ (१२, १७, २) कुलाय- (=मौस्थि. साजात्यभाक् यह्.) इति च पाभे.] ।

[h]) व्यु. ?। √*८अर् (तु. WW १, १५७)। यद्वा √*४अर् [तु. WR. (शौ २०, १३४, १) ?*आ-सन्नाः' इति पठन्तौ]+आलः प्र. [वैतु. आलच् प्र. इति भो. इति पाउना. (तथा˘ सति स्वरस्तु नोपपद्येतेति दिक्)] प्र.स्वरश्च। यत्तु *अरालाच्,ञ्च्->-लाक् इतीव गपू.शौ. (पाण्डु.) अश्रावि, तन्नेष्टम् । नाउउ. मन्त्रेषु प्रागादीनाम् अधरागन्तानां चतुर्णामेव क्रिवि. सतां पदानामावृत्तिदर्शनाद् न प्रकृतं पदं तत्सजातीयमित्यस्य विषयस्य सुवचत्वाच्च नाउउ. मन्त्राणां वा. दि. एव च प्रपु३ सता क्विप.कर्तृसंबन्धेन युक्तस्य सतः प्र३ कस्यचिन्नाम्न एवाऽऽकाङ्क्षितत्वाच्च ।

[i]) व्यु.?।(√*२ वा ६ वा अर्+भावे अप् प्र.=)*अर- (>स्वार्थे *अरक->नैप्र.) *अरा- +*वन्- (=√वन्+भावे क्विप् प्र.)='अरे (प्रतिबन्धे वा हानौ वा) वन् (मनः) यस्य (पाप्र. वन् प्र. तद्धितः उसं. (पावा ५, २, १०९) इति बस. पूपप्रस्व. (वैतु. पपा. अनवगृह्णन् नञ् पूप. इतीव विज्ञापुकः)। PW. प्रभृ. तु ६अ +*रावन्- (<√२रा) इति तस. इति संवादुकाः । यत्तु ऋ ७,६८,७ इत्यत्र यनि. भिन्नं सदपरं सरूपं प्राति. इति कृत्वा भिन्नायाः व्यु. विषयः [तु. सा. (<√*१अर् इत्यभिसंधाय) 'अरणवानभिगन्ता' इति; PW. =२अर्वत्- (=रथ-) इति (तथा च सति स्वरस्तु दुरुपपदः द्र.)] इति पराऽभिप्रायो भवति, तदनिष्टम् । यनि. प्राति. प्राकरणिकाऽर्थतः सुसंगतत्वात् कल्पनान्तरस्याऽन्यथासिद्धेः ['यदा भुज्युं तस्याऽऽत्मीयत्वेनाऽनुभूयमानाः सखायोऽपि पापवृत्तयो भूत्वा मध्येसमुद्रं जहुः, तदा किल कश्चिदपर एव नितान्तमसंबद्धः (=१अरणः) शत्रुबुद्धिर्वाऽपि सन्नश्विनोः संभक्तत्वाऽभिसंबन्धेन मनोम्रदिम्ना नेदीय इव प्रेरितो भूत्वा तं निस्तारयामास' इति श्रुतिस्वरस इत्यभिसंधेः (वैतु. वें. सा. च भुज्युरेव 'अरावा' इति व्यशेषीति कृत्वा 'पर्षत्' इति क्रिप. प्रपु१ सदपि मपु२ भावयित्वा व्याचक्षाणौ; PW. प्रभृ. च दैवताभिसंबन्धेन परस्याऽप्यात्मीयभावस्य महिमानमपश्यन्तः गपू. व्यु. चाऽर्थांश्च वितथं प्रतर्कुकाः) ।

१६[a]; ८,६०,१०[a]; ९,[१३,९; ६३,५; (३९,५)]; ६१, २५; कौ १,५१०; २,५४५; ५६३; ८९५; जै १, ५२, १४; ३, ४३, १; ४४,९; ४, १४, २; –राणे ऋ ७,३१,५; शौ २०, १८, ५.

१अरि॒[b]– -रयः खि ४, ५, १; –रये ऋ ६,१३,५; –॑रिः ऋ १, ४, ६; ९,१०; १५०,१; ७, ६४, ३; ८, २, १४; ५१, ९; ७२, १६; ९, ७९, ३; १०, २८, १; ३९, ५; खि ३, ३, ९; ५, ११, १; मा ३३, ८२; का ३२, ६, १३; कौ १, ९७; २, ९५९; जै १, ११,१; ४, १९,१; शौ २०,६८, ६; ७१, १६; १२७, ११; –रिम् ऋ २,८,२; ५,४८,५; –॑र्यैः ऋ १,७०,१; ७१,३; ७३,५; ११८, ९; १६९, ६; १८४, १[c]; १८५, ९; २,१२,४[d]; ५; ३,४३,२[c]; ४,२,१८[c]; १६, १९; २०, ३[e]; २९, १; ३८,२; ४८, १; [५०, ११; ७, ६४, ५; ६५, ५; ९७, ९]; ५, २, १२; ३३, २; ६; ३४, ९; ५४, १२; ६, १४, ३; [१५, ३; (१६, ३३); १०, ११५, ५]; १६, २७^{2}; २०, १; २४, ५[c]; २५, ७; ३६, ५[c]; ४५, ३३; [४८, १६; ५९, ८]; ७, ८, १; २१, ९; ३४, १८; ४८, ३^{2}; ५६, २२; ६०, ११; ६८, २; ८३, ५; ९२, ४; ८, १, ४; २१, १६[c]; २४, २२[c]; ३४, १०[f]; ३९, २; ४८, ८; ६०, १२; ६५, ९[c]; ६६, १२; ९४, ३; ९, २३, ३; [६१, ११; १०, १११, १]; ७९, [१; १०, १३३, ३]; १०, २०, ४; २७, ८^{2}; ४२, १; ५९, ३; ७६, २; ८६, १[c]; ११६, ६[c]; १४८, ३; मा १५, ३०[g]; २६, १८[g];

---

[a]) सतोबृहत्यां विषमयोर्जागतयोः पादयोरवसाने लगौ स्यातां (तु. तृतीये पादे) इति कृत्वा '**अ॒रावणः**' इत्येवमत्र मूलतः पा. संभाव्येत [येनाऽक्षरद्वयेनोनेऽत्र पादेऽक्षरमप्येकं सुपूरं स्याच्छन्दश्च सुपठमित्यभिसंधिः (तु. L ५२५)] ।

[b]) √*अर्+इः प्र. उसं. (पाउ ४,१४०) । तत्स्वरः । ननु स्वामि-स्तोत्राद्यर्थपरं प्राति. अन्यच् शत्रुपरं चाऽन्यदिति प्रागर्वागभिमतं विवेकं [तु. या. (५, ७) प्रभृ.] आदाय पृथगङ्किते द्वे प्राति. किमिति न निर्दिश्येयातामिति । व्यु. च वृत्ते च विशेषाऽभावाच्छब्दतोऽभेदप्रतिपत्तेरिति । ननु शत्रुपरस्य प्राति. ६अ॒+*रि॒- (<√२रा भावे) बस. इति कृत्वा प्रकाराऽन्तरेण व्यु. इष्यतां (वैतु. या. गपू.) तेन च प्राति. भिन्ने निर्दिश्येयातामिति । नेति । कथमिति । उक्ताया व्यु. अन्यथासिद्धत्वादिति । कुत इति । गतितत्प्रतिबन्धप्रभृत्यनेकाऽर्थवाचकत्वेनोपगतस्य सतः √*अर् (तु. यस्था. टि.) इत्यस्यैव तत्तदर्थवाचकस्य सतः **अरि॒-** इत्यस्य मूलतयाऽभ्युपेयत्वादिति । अथ तत्र तत्र विषयविभागे विदुषां वैमत्यादपि भिन्ने प्राति. न निर्दिश्येयातामिति । कथमिति । उच्यते । तद् यथा । ऋ १,४,६ इत्यत्र शत्रु-पर इति सा. । न तथेति PW. प्रभृ. । ऋ १, ७३, ५ इत्यत्र शत्र्वर्थ इति सा. PW. च । न तथेति GW. । ऋ १, ११८, ९ इत्यत्र शत्र्वर्थ इति सा. PW. च । न तथेति NW. । ऋ १, १८४, १ इत्यत्र शत्र्वर्थ इति PW. । न तथेति सा. GW. च । एवमन्येष्वपि भूरिसंख्याकेषु स्थ. प्रतिपत्तिभेदो भवति । अथाऽद्याऽवधि प्रसिद्धिं प्राप्तवतो विषयविभागस्याऽपर्याप्तत्वादपि द्वे एव भिन्ने प्राति. निर्दिश्येयातामिति नोचितम् । तथाहि । मा ६, ३६ इत्यत्र प्रजाऽर्थः साक्षाच्छ्रौतप्रमाणोपबृंहितो भवति (तु. माशब्रा. ३, ९, ४, २१) । ऋ ९, ७९, ३ इत्यत्र **वृ॒क-** इत्यस्य साहचर्याद् हर्यर्थः संभाव्येत । एवमनुसंधानभूयस्त्व-निबन्धना विशिष्टतराऽर्थभूयस्त्व-प्रसिद्धिः संभवेदिति किमु वक्तव्यम् । ननु तत्तत् स्थ. सम्यगनुसंधाय तत्तदर्थविषयविभागमनुपतन्ति कामं तानि तानि भिन्नभिन्नानि प्राति. निर्दिश्येरन्निति । सत्यम् । एवमेव कर्त्तव्यं न त्विहेति । तत् कुत्रेति । वैश. इति । कुत इति । अर्थविवेकाऽधीनविषयविभागाऽनुपातिनो निर्देशविभागस्य तत्रैव प्राप्ताऽवसरतरत्वाच्चाऽनुसंधेयसाधनसामग्रीसमृद्धिजस्य पर्याप्ततरस्य विभागप्रकारस्य संभवाच्चेति । अथ किमिति **२अ॒-रि-** इतीहाऽपि पृथग् निर्दिश्येतेति । स्वरतो भेदात् व्यु. भेदस्य शब्दस्वाभाव्य-प्राप्तत्वादिति । अत्र यत्र यत्र '**अ॒र्यः**' इति शब्दरूपं १अरि॒- इत्यस्य द्वि३ वा पं१ वा ष१ वा सत् १अ॒र्य- इत्यस्य प्र१ इतीवाऽन्येषां मिथ्या प्रतीतं भवति तत्र तत्र यस्थ. टि. समकेतीति दिक् (तु. टि. इहैव '**अरे**' इति) ।

[c]) १अ॒र्य- इत्यस्य रू. इति सा. तद् विमृश्यम् ।

[d]) १अ॒र्य- इत्यस्य रू. इति PW. तच्चिन्त्यम् ।

[e]) यत्तु '१अ॒र्य->अ॒र्ये' (स१)='इन्द्रे' इतीव PVS. (१७२ टि.१) इत्यत्रोक्तं भवति । तच्चिन्त्यम् । '**त्व॒या**' इति पदेन तस्य गतार्थत्वात् ।

[f]) '**अर्य**' इति सं१ इति पठन् सा. चिन्त्यः ।

[g]) उ. म. द्विपूटि. दि. मन्वानौ चिन्त्यौ ।

का १६,५,११; तै २,६,११,४; ४,४,४,४; मै २, १३,७; ४, १४, १५; काठ २, १५; ८, १७; १७, १८; कौ १, ७०; ५५५; २, २४; ११५३; ३, १, ८; जै १, ७, ८; ५७, २; २, ५, ५; ३, ३, ३; ४, १, ६; १०, १०; शौ ६, ६३, ४; १८, ३, २३; २०, ३४, ४; ५; ६६, १; ८५, ४; ८९, १; ९५, ४, १२६, ३; पै १३, ७, ४; ५. [°रि- ?अंह°, ?अङ्ग°, अङ्घ°, कव°, भिन्न°, मृग°, सु>स्व्°]

अरी[a]– -रीः मा ६, ३६; का ६, ८,७; मै[b] १, ३,४; ४, ५, ७; काठ[b] ३, १०; क २,१७; –र्यः[c] कौ १,३२७; जै १, ३४, ५.

अरे[d] मा २३,५५;५६; का २५, १०,३; ४; मै ३, १, ४; पै ५, ३४, ६.

अरि-क्रुव[e]– -वेभ्यः पै १६, १०४,२.

अरि-गूर्त[f]– -र्तः ऋ १, १८६,३.

अरि-धायस्[g]– -यसः ऋ १,१२६,५.

अरि-यमन्- अर्यमन्- टि. द्र.

अरि-ष्टुत[h]– -तः ऋ ८, १, २२.

२अ-रि[i]– -रिः शौ ७, ९३,१^{२}; १३, १,२९.

अ-रिक्त[j]– -क्तः काठ ४०,५; –¶क्ताः तै ६, ४, ९, ५; काठ २७, ५; क ४२,५; –¶क्तानि तै ६, ४, ९, ५^{२}; –क्ताय तै ७, ३, २०, १; काठ ४३, १०.

¶अ-रिक्तत्व[j]– -त्वाय मै ४, ६, २.

?अरित[k]– -तः पै ४, १४, ६.

अरितृ-, अरित्र- √*अर् द्र.

अ-रिप्र,प्रा[l]– -प्रम् ऋ ७, ४७, १; १०, ७१, १; –ॆप्रा ऋ ८,८, ९; –प्राः ऋ ७, ९०, ४; १०, १२०, ९; शौ १०, ५, २३; १६, १, १०; पै ५, २, ६; ६, १, ९†; १६, १३०,२; –प्रे†[m] शौ ५, २, ९; २०, १०७,१२.

***अरिय** ?३अर्य- टि. द्र.

अ-रिषण्य[n]– -ण्या ऋ २, ३९,४.

†अ-रिषण्यत्[j]– -ण्यन् ऋ १, ६३, ५; २, ३७, ३; ६, २४, ९; २५, २; मै ४, १४, १२.

अ-रिष्ट,ष्टा[j]– -ॆष्ट°[o] शौ १९, ७, ३; –॰ष्ट शौ ८, २, २४; –ष्टः ऋ [१, ४१, २; (५, ५२, ४; ६७, ३;) ८, २७, १६; १०, ६३, १३]; ५, १८, ३; ३१, १; १०,१६६, २; मा १०,२१; का ११, ७, १; तै ३, २,८,४; शौ ४, ५, ७; ७, ५५, ५; ८, २, ८; १०, ३, १०; पै १, ६१, ४; ९६, ४; २, ८७, ५; ४, ६, ७; १३, ३, ११†; १५, १२, २†; १६, ३, ९; ५, ४; ६३, १०; –ष्टम् ऋ २, ३४, ७; मा २, १३; का २,३, ११; काठ ३४, १९; पै ४, ४०, २; –ष्टा मा ११, ६९; ३७, २०; का १२,७,४; ३७,३,६; तै ४, १, ९, २; ५, ५, ९, २; मै २, ७, ७; काठ १६, ७; १९,१०;

---

[a] स्त्री.ङीष् [पावा ४,१,४५(तु.माशब्रा.३,९,४,२१)]।

[b] ‘अरिः’ इति पा. (वैतु. मै. १मे स्थ. मूको. ‘अरीः’ इत्यपि पा.)। एस्थि. अपि मै. काठ. च रू. स्त्रीत्वपरत्वं शाखान्तरसामान्येन सुस्थितं द्र.।

[c] तरुषी->‘-षीः’ इत्येतत्-सामानाधिकरण्यात् यनि. द्र. (वैतु. सा. ‘अरीन्’ इति व्याख्यानात् ‘१अरि-’ इत्यस्य पुं. द्वि३ एतदिति प्रतिपन्नः संश्चिन्त्यः)।

[d] मौस्थि. प्रजाऽर्थस्य सतः १अरि- इत्यस्य सं१ संभाव्येत [वैतु. WW.(१,८९) शब्दाऽर्थकाद् √*अला (तु. पंजा. अलाअ-<आलाप-) इत्यतो निष्पादुकः]।

[e] बस. पूपप्रस्व. [=‘कर्तनगुणविशिष्टक्लवविशिष्ट-’] तु. अलि-क्लव- इति शौ (११, २,२) पाभे.।

[f] तस. [=अरिरिव वा अरिरिति वा अरि (=समृद्धं पुष्कलं यथा स्यात्तथेति कृत्वा क्रिवि. सत् न. द्वि१ [तु. PW. प्रभृ., WW १,६९; NW.]) वा गूर्त-]। थाथीयः स्वरः [वैतु. सा. सतस. इति; B.JAOS ४५, १६५ च तृतस. इति वदन्तौ स्वरतश्चिन्त्यौ (तु. पा ६, २, २; ४८; विश्व-गूर्त- इति प्राति. च)]।

[g] बस. पूपप्रस्व.(=‘समृद्धधायोविशिष्ट-’)। उप. भावे धायस्- यद्र. [वैतु. सा. उप. कर्मणीति कृत्वा तृतस. इति, GW. च उप. कर्तरीति कृत्वा उस. इति च वदन्तौ स्वरतश्चिन्त्यौ (सा. उप. गुणवचनत्वे सति पूप. कृतत्वस्येष्टत्वादस्य विशेषणद्वयस्यापि प्रकृते चाभावात् GW. च कृद्-उपप्रस्व. प्राप्तत्वात् पूपप्रस्व. अनुपपत्तेरित्यभिसंधिः)]।

[h] सस्व. द्विपू. दि. द्र. (तु. WW. गपू., PW.,MW.; वैतु. सा. प्रभृ. तृतस. इति वदन्तः पूर्ववच्चोद्याः)।

[i] तस. नञ्-स्वरः (पा ६, २, २)। उप. √ऋ+ कर्तरि इक् प्र. उसं. [पावा ३,३,१०८; यद्वा पाउ ४, १४२ (=अनृजुः सन् परान् परिपन्थुकः)]।

[j] तस. नञ्-स्वरः (पा ६, २, २)। उप. यद्र.।

[k] कूटं भवति। तु. सस्थ. टि. √षि>सित-।

[l] बस. अन्तोदात्तः (पा ६, २, १७२)। उप. यद्र.।

[m] ‘-प्राः’ इति बाह्वृचः (१०, १२०, ९) पाभे.।

[n] उप.√रिषण्य+कर्तरि अच् प्र.। शेषं त्रिपूटि. द्र.।

[o] संबुद्धेरनपेक्षातः अरिष्टम् इति मूपा. संभाव्यते (तु. WI.)। ‘अरिष्ट-मूलम्’ इतीव सा. पिपठिषन्

क ३०, ८; पै ११, १, ७; -ष्टाः ऋ २, २७, २; ७; १६; ५, ४२, ८; ६, १९, ४; ७, ४३, ५; १०, १२८, ३; तै ४, ७, १४, २†; ५, ७, ९, १; काठ ४०, १०†; शौ ५, ३, ५†; १०, ५, २३; पै १, १०६, २: ३, २६, ६; ५, ४, ५†; १५, ३; १६, ७; ६, ८, ८; १६, १००, ३; १३०, ३; -†ष्टान् ऋ ७, ४०, ४; ९७, ४; काठ १७, १८; -ष्टानि शौ १९, ६०, २; -ष्टाभिः ऋ ६, ५४, ७; -ष्टाम् ऋ १०, ८५, २४; काठ २, ३; क १, १५; -ष्टासः शौ ७, ५२, ७; १९, ४७, २; २०, ८९, १०‡[a]; पै ६, २०, २; -ष्टे का २, ६, २; पै ८, ७, ३; -¶ष्टेन तै १, ६, ११, २^{२}; मै ४, ५, ५; ६, ८; काठ २६, १०; क ४१, ८; -†ष्टेभिः ऋ १, ११२, २५; ८, २७, ४; मा ३४, ३०; का ३३, १, २४; -†ष्टैः ऋ ६, ६९, १; तै ३, २, ११, २; मै ४, १२, ५; काठ १२, १४.

अरिष्ट-गातु[b]- -तुः ऋ ५, ४४, ३.

अरिष्ट-गु[c]- -गुः शौ १०, ३, १०; पै १६, ६३, १०.

अरिष्ट-ग्राम[b]- -माः ऋ १,१६६,६.

†**अरिष्ट-ताति**[d]- -तये ऋ[१०,६०, ८-१०]; ९७,७; मा १२, ८१; का १३, ६, ७; तै ४, २, ६, ४; मै २, ७, १३; काठ १६, १३; क २५, ४; §शौ ३, ५, ५; ५, ३०, १२; ६, १९, २; ८०, २; ८, २, ६; ५, २०; ७, ६; २७; १९, ३८, ३; §पै १, ३१, ३; ३, १३, ५; ५, १७, ८†; ७, ५, ११; ८, ३, ९; ९, १४, २; १५, १८, ८; २१, ६; १६, ३, ६; १४, ६†; २८, ९; -तिभिः ऋ १०, १३७, ४; शौ ४, १३, ५; पै ५, १८, २.

अरिष्ट-नेमि[b]- -मिः ऋ १,८९, ६; मा १५, १८; २५, १९†; का १६, ४, ७; २७, ११, ६†; तै ४,४, ३, २; मै २,८, १०; ४, ९, २७†; काठ १७, ९; ३५, १†; क २६, ८; कौ २, १२२५†; -†मिम् ऋ १,१८०, १०; १०, १७८, १; खि २, ४, १; कौ १, ३३२; जै १, ३५, १; शौ ७, ९०,१; -०मे ऋ ३, ५३, १७; काठ ४०, ३.

अरिष्ट-पशु- -शुः पै १, ९७, ४.

अरिष्ट-भर्मन्[b]- -०र्मन् ऋ ८, १८, ४.

अरिष्ट-रथ[b]- -थः ऋ १०, ६, ३.

अरिष्ट-वीर,रा[b]- -राः ऋ १,११४, ३; काठ ४०,११†; शौ ३,१२, १; पै ३, २०, १; -राम् पै ७, ६, ५.

अरिष्टा(ष्ट-अ)सु[b]- -सू शौ १४, २, ७२.

अ-रिष्टि[e]- -ष्टिम् ऋ २, २१, ६; -ष्टयै मा २, ३^{२}; ३०, १३; का २, १, ३; ४^{२}; ३४, २, ५; ¶तै ७, ४, ११, ३; ५, १, ४; काठ ३३, ३¶; ३५, १०^{२}; क ४८, १२^{२}.

अ-रिष्यत्[e]- -ष्यन् मै १, २, ९^{२}; -ष्यन्तः ऋ[२, ८,६; ८, २५, ११; (९,३५,३)];४,५७,३; ८, २५,१२; मै ४,११,१†; शौ २, ४,१; १९,५०, ३; २०, १४३, ८†; पै २,११,१; १९,४,१३; -ष्यन्तम् ऋ १०, ६३, १४.

अ-रीव्ह(ढ)[f]- -व्हम् ऋ ४, १८, १०.

१**अरु**[g]- -रुम् पै १,९४,४. [°रु- पाक°]

*२**अरु**[b]- अरुणि-,अरुणी-,अरुष-टि.द्र.

?**अ-रुक्म**[i]- -क्मम् पै १४, ४, ८.

अ-रुग्ण[e]- -ग्णाम् ऋ ६, ३९, २; पै १, ९४, ३[j].

अ-रुच्[k]- -रुचः ऋ ६, ३९, ४.

अ-रुज्- -रुक् पै ६, ९, १०; -रुजा पै ११, २, ८.

अरुण,णा[l]- -०ण मै ४,१४,९[m]; -णः ऋ १, १०५,१८; १३०,९; ९, ४०, २; १०, ३०, २; ५५, ६; मा १६,६; १७, ६०†; २४,३;

(तु. पाण्डु.) चिन्त्यः । छन्दोदोष-प्रसङ्गात् ।

[a] विशिष्ट इह बाह्वृचः (१०, ४२, १०) पाभे. ।

[b] बस. पूप्रस्व. (पा ६, २, १) । उप. यद्र. ।

[c] सस्व. कृते नापूटि. द्र. । उप.<गो- यद्र. ।

[d] भावे तातिल् प्र. लित्-स्वरश्च (पा ४, ४, १४४; ६,१,१९३) ।

[e] तस. नञ्-स्वरः (पा ६, २, २) । उप. यद्र. ।

[f] सस्व. कृते नापूटि. द्र. । उप. √रिह्+क्तः प्र. ।

[g] व्यु.? । √*२अर् इत्यतः संभाव्येत (='प्रति-बन्धकः) । 'बिले' इत्यस्य स्थाने 'बिलम्' इति च पृथक् पदमिति कृत्वा सुपा. सु-शोधः द्र. ।

[h] संप. न वि. (वैतु. ww १, १५९ वि. इति) ।

[i] संस्कारान्तरसापेक्षः सुपा. भवति ।

[j] सुपा. णत्वाऽभावश्चिन्त्यः ।

[k] बस. अन्तोदात्तः (पा ६,२,१७२) । उप. यद्र. ।

[l] √*३अर्+उनच् प्र. [वैतु. पाउ. (३, ६०) <√*१अर् इति; तु. टि. अरुणि-] । चित्स्वरः ।

[m] 'असुर' इति ऋ. (२, २८, ७) पाभे. ।

२९, ५८; का १७, १, ६; १८, ५, ११†; २६, १, ५; ३१, ६, १; तै २, १, ६, ३¶; ४, ५, १, २; ६, ३, ४‡[a]; ५, ५, २२, १; ¶६, १, ९, २; ४, ५, १; ¶मै १, ४, १०[b]; ५, ९; २, ५, ९^{२}; ९, २$; १०, ५‡[a]; ३, ६, ४; ६; ७, ४; ८, ६; १०, ५; १३, ४$; ४, १४, १४$; काठ १३, ४; १७, ११; १८, ३‡[a]; २१. ८; २६, १०; ३२, ७; ३७, ७; ४८, १; क २७, १; २८, ३‡[a]; ४१, ८¶; †कौ २, २७५; ११३३; †जै ३, २३, ७; शौ ५, २३, ३; ११, ७, १२; पै १, ४५, २; १३, १, ४; १४, २, ९; १६, १५४, २; –णम् ऋ १, ७३, ७; ७, ९८, १; ८, १०१, ६; ९, ४५, ३; ७८, ४; १०, १४४, ५; तै २, १, ६, २¶; काठ १३, ४¶; शौ १२, १, ५२; १३, २, ३६; ८, ६; २०, ८७, १†; –¶ण्या तै ६, १, ६, ७; –णस्य ऋ १०, ९४, ३; –णा ऋ १, १३४, ३; मै ३, ७, ४¶; ४, २, ४; १४¶; –णाः ऋ १, ९२, २; तै ५, ६, १५, १; मै ३, १३, २०; ४, २, ११; काठ ४९, ५; कौ २, ११०६†; शौ १०, २, ११; ११, १२, ७; पै १६, ६०, ३; –णान् ऋ १, ९२, १५; मा २४, ११; का २६, ३, १; कौ २, १०८३†; –णानाम् ऋ १, १२४, ११; –णानि ऋ १०, १६८, १; पै १, १०७, १; –†णाम् ऋ ५, ६३, ६; मै ४, १४, १२; –णाय ऋ ९, ११, ४; मा १६, ३९; का १७, ६, ३; तै ४, ५, ८, १; ७, ३, १८, १; मै २, ९, ७; काठ १७, १५; ४३, ८; क २७, ५; कौ २, ७९४†; शौ ६, २०, ३; पै १३, १, २; –णासः ऋ ६, ६४, ३; –णेभिः ऋ १, ८८, २; ११३, १४; २, ३४, १३; ५, ८०, ३; –णेषु काठ ४०, ४; –णैः ऋ २, १, ६; ३४, १२; तै १, ३, १४, १†; शौ ११, १२, २. [°ण- त्रि>त्र्य्°]

¶**आरुणि**[c]- -णयः काठ १३, १२; –णिः काठ ७, ६; ९; क ५, ५; –णिम् काठ ७, ६; ८; क ५, ५.

¶**आरुणि-वि॒द्**[d]- -विदः मै ३, ६, ४.

?**अ॒रुणी**[e]- -णीभिः मै २, १२, ३; ३, ४, ४; –णीषु ऋ १, ६४, ७.

¶**अरुण-पिश॒ङ्ग**[f]- -ङ्गः तै ६, ६, ११, ६.

†**अरुण॒-प्सु**[g]- -प्सवः ऋ १, ४९, १; ८, ७, ७; –प्सुः ऋ ८, ५, १; ७३, १६; कौ १, २१९; जै १, २३, ६; –प्सुम् ऋ ५, ८०, १.

अरुण॒-बभ्रु[h]- -भ्रुः मा २४, २; का २६, १, ३; तै ५, ६, ११, १; मै ३, १३, ३; काठ ४९, १.

अरुण-यु॒ज्[d]- -युग्भिः ऋ ६, ६५, २.

अरुण॒-ललाम,मा[g]- -माः तै ५, ६, १२, १; २०, १; काठ ४९, २; १०.

अरुणा॒(ण॒-अ)श्व[g]- -श्वाः ऋ ५, ५७, ४.

अरुणै(ण-ए)त॒[i]- -ताः तै ५, ६, १८, १; काठ ४९, ८; –ताय तै ७, ३, १७, १; काठ ४३, ७.

अरुणि॒[j]- -णयः ऋ १०, ९५, ६.

---

[a]) 'अरु॒पः' इति ऋ. (पा ५, ४७, ३) पाभे. ।

[b]) यनि. काठ. स्थ. 'आहारुणः' इत्यत्र 'आरुणः' इत्येवं दीर्घाऽऽदितया द्वितीयं पदं विसंदधानः SIM. विसंस्कार इत्युपेक्ष्यः ।

[c]) अपत्यार्थे इञ् प्र. (पा ४, १, ९५) ।

[d]) उस. क्विबन्त-कृत्-प्रस्व. (पा ६, २, १३९) ।

[e]) यनि. सत्तातः संदिह्येत । मै. पा. प्रतियोगित्वेन 'अरुणी॒-' इत्यस्य शाखान्तरे श्रुतेश्च (तु. मा १२, ७४) । ऋ. स्थ. अपि 'य॒दा॒रुणीषु' इत्यत्र (मूलतः='य॒दा॒रुणी॒षु' इति संभाव्य) 'य॒त् आ॒ अरुणी॒षु' इति त्रिपदविभागस्य सुप्रस्तावाच्च [तु. ऋ ५, ५८, ७; वैतु. पपा. (य॒त् आ॒रुणीषु' इति), GW. ? ('यदा॒ अरुणी॒षु' इति)] । यस्थि. व्यु.? यनि. तद्धिते अनि प्र. कृते सति स्त्री. ङीप् इत्येवं वा 'आ॒ अरुणी॒-' इति प्रास. पूपप्रस्व. इत्येवं वेत्येतयोर्विकल्पयोर्मध्ये विनिगमनाया दुःशकत्वादिति दिक् ।

[f]) तस. पूपप्रस्व. प्राप्ते 'पिश॒ङ्ग-' इत्येतदपि पर्युदस्यतया उसं. (पा ६, २, ३) । तेन सासस्व. द्र. (पा ६, १, २२३) ।

[g]) बस. पूपप्रस्व. (पा ६, २, १) । उप. यद्र. ।

[h]) तस. पूपप्रस्व. (पा ६, २, ३) । उप. यद्र. ।

[i]) 'वर्णः' (पा ६, २, ३) इत्यत्र एत॒- इत्यस्य पर्युदासात् सासस्व. (पा ६, १, २२३) ।

[j]) पाप्र.व्यु.अरुणि॒- इत्यस्य साजात्ये सति प्र. एव विशेषः स्यादिति सुवचम् । तद् यथा । तत्र अकारान्तः प्र. इह त्विकारान्तः उनिच् प्र. उसं. (पाउ ३, ६०) इति, तद्वच्च चित्-स्वरः । नैप्र. तूभयत्र तस. इति कृत्वा (√*३अर्>)*२अ॒रु- (तापः, तद्विशिष्टविशेषो वा) इति पूप. द्र. । (√जन्<>√*गन्>) *ग्न॒- इति अरुण॒-

१अरुणी[a]- -र्णीः ऋ १, ११२, १९; १२१, ३; ४, १, १६[b]; २, १६; १४, ३[c]; मा १९, ६९; का २१, ४, १९; तै २, ६, १२, ४; काठ २२, ६¶; क ३४, १¶; कौ ३, ३, ५; जै २, १, ७: शौ १८, ३, २१; -र्णी म् ऋ १०, १५, ७; मा १९, ६३; का २१, ४, १३, शौ १८, ३, ४३; -णीषु ऋ १०, ६१, ४; -ण्यः ऋ १, १४०, १३.

*?२अरु-णी- नापू. टि. द्र.

¶३अरु*-णी[d]- -णीः तै ५, ६, ४, १; -णीभिः मा १२, ७४; का १३, ५, १३; तै ५, ६, ४, १; काठ २२, ५.

?*अरुण्ड[e]-

*अ-रुत[f]-

अरुत-हनु[g]- -नुः ऋ १०, १०५, ७.

*अ-रुन्धत्[h]-

अरुन्धती[i]- -०ति काठ ३७, १०^{२}¶; शौ ४, १२, १; ५, ५, ५; ९; ६, ५९, १; पै २, २०, ५; ६, ४, ४; ९; १०; ८, ७, ९; १५, १५, १; ७; १६, २-९; १७, १-७; -ती खि ३, १७^{२}, ५; ४, ७, १, ५; ६; ७^{२}, ४; ९; १०; काठ ३७, १०^{२}¶; शौ ६, ५९, २; पै १, ८५, ३; २, २०, ५; ९, ११, १०; १५, १५, ४; ८; ९; -तीम् शौ ८, ७, ६; पै ८, ७, १०; १६, ३, ६; १२, ६; -त्यः पै १५, १६, १. [°ती-वसिष्ठ°]

अरुश[j]-

अरुश-हन्[k]- -हा ऋ १०, ११६, ४.

१अरु-प[l]- -पः ऋ ३, १५, ३; २९, ६; ४, ५८, ७: ५, १, ५; ४७, ३; ५६, ७; ६, ३, ६^{२}; ४८, ६^{२};

इत्यत्र *ग्नि- इति चेह उप. इति (तु.टि. अरण्यानि-)। यत्तु PW. प्रभृ. अरुण- >अरुणी-(=नाउ.)> -णयः(प्र३) इति प्रतिपद्यमानाः यनि. पार्थक्यं नैवाऽनुजानीरन्, तन्नोचितम्। अरुण- इत्यस्मादननुदात्तान्तात् सतः स्त्री. ङीषः प्र. (पा ४, १,४०) असंभवात्। नाउ. प्रादुर्भावोऽपि यनि. प्रकृत एव समश्रायीत्येवं सुवचत्वात्। अथाऽपि ङ्यन्तस्य प्राति. पूर्वसवर्णैकादेशवद्वा यणादेशवद्वा रू. अजादौ सुपि प्रसिध्येद् न तु पराभिमतं सदप्यपुष्टं गुणाऽऽदेशवत् रू. इत्यपरा दिक्।

[a] ङीष् प्र. (पावा ४, १, ४५) तत्स्वरश्च।

[b] प्र१ भवति। तत् कथं सोरलोप इति। छान्दस इति सा. [=वेदे सर्वविधिविकल्प इत्यभिसंधिः (तु. L३७६)]। स्याद्वेह प्रकृतात् यनि. भिन्नं सदपरं *२अरु-णी- इति प्राति. द्र. [=*२अरु-+(√नी>) *नी-(= 'अरुं सूर्यमग्निं वा तत्पूर्ववर्तिनी सती नयति') इति कृत्वा उस. उपप्रस्व.]। अथवा 'अरुणी ईः (<*ई- यद्र.)' इति पदद्वयं द्र. (= 'इयमेवाऽरुणी')। अथवा 'अरुणी- ईः' इत्येकं समस्तं पदं द्र. (यत्र उप. *ई- इति मौस्थि. सना. सद् अवधारणाऽर्थे निपातायमानं (तु. हिं. ही) सामासिकं वृत्तमनुधावति [यथा 'चित्' (मौस्थि.=*चित्-) इति नि. इत्यभिसंधिः ('चित्' इत्यत्र निघातः बस. प्रयोजित इति कृत्वा यस्था. उपपाद्यमानः द्र.)]। एस्थि. प्रकृते सुप्सुपीयः स. सासस्व. च। यदपीह सा. प्रभृ. 'अरुणवर्णा' इति वर्णवचनाद् 'अरुण-' इत्यतः ङीषः प्र. (पा ४, १,४०) आगममभिसंदधीरन्, तद् यथा न सत् तथा प्रतिपादितपूर्वमिति नेह पुनरुपात्तमिति दिक् (तु. टि. अरुणि-)।

[c] द्वि३ भवति [=(उषाः) 'अरुणीः (=रश्मिगवीः) आवहन्ती ज्योतिषाऽऽगात्' इति वा. द्र. (वैतु. सा. स्वरूपतः प्र३ सदर्थतः प्र१ इति वदन् (नापू. टि. संकेतितचरीं स्वीयां सुलोपाऽभावपरां दिशमपि विस्मारुकश्चाऽऽवहनक्रियाया निगदसिद्धं कर्म परित्याजितः सँस्तदर्थमध्याहारमुखेन वा. पूरुकश्च); L३३६ प्र१ (तु. नापू.टि.) इति चेत्यावहनस्य कर्मणो विषये पर्यनुयोज्यः)]।

[d] *२अरु-+(√नी भावे=) *२नी- इति बस. पूपप्रस्व. (भिन्नं स. उपजीव्य स्वरभेदवत्-समानार्थसरूपप्रवृत्तिर्वक्तृविवक्षाऽधीनेति किमु वक्तव्यम्)।

[e] 'उरुण्ड-' (शौ ८, ६, १५) इत्यस्य स्थाने सा. यनि. पठति। तत् यस्था. द्र.।

[f] तस. नञ्-स्वरः (पा ६,२,२)। उप. २रुत- यद्र.।

[g] बस. पूपप्रस्व. (पा ६, २, १)। उप. यद्र.।

[h] सस्व. एपूटि. द्र.। उप. यद्र.।

[i] आक्रोशभिन्नेऽप्यर्थे 'संज्ञायाम्' (पा ६, २, १५९) इति नञः परस्याऽन्तोदात्तत्वम् उसं.।

[j] नाउ. व्यु. औपयिकं प्राति. द्र.। व्यु.? १अरु-+शः प्र. (पा ५, २,१००) स्यात् [=शत्रुः (तु. सा.); वैतु. PW. प्रभृ. =नाउ. इति]।

[k] उस. क्विबन्त- कृत्-प्रस्व. (पा ६, २, १३९)।

[l] व्यु.?। *२अरु-+(√सन्+डः प्र.=)*स->*प- इति उस. कृत्-प्रस्व. (='लालिमविशिष्टदीप्तिभाज्-')। पाप्र. अनु तु√*३अर्+उषच् प्र. उस. (पाउ ४,७५)। चित्स्वरः [तु. सा. (ऋ १, ११४, ५) 'आरोचमान-' इति पर्यायं प्रयुञ्जानोऽपि तत्त्वमपर्यालोचुकः, WW १, १५९ (वैतु. टि. *२अरु-); वैतु. सा. (ऋ १, ६, १)

